97(A)
R.AS

B. J. 63

II.
C.
I

3

BIBLIOTHECA INDICA:

Library 9/11/
(92)

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, NOS. 181, 184, 185, 187, 196, 198, 202,
213, and 260

ASIATIC SOCIETY LIBRARY BENGAL

SRAUTA SU'TRA OF LA'TYA'YANA

AS: SOC: B

WITH THE

COMMENTARY OF AGNISWA'MIN.

II C. I

EDITED BY

A'NANDACHANDRA VEDA'NTAVA'GI'S'A.

981

CALCUTTA:

PRINTED BY K. K. CHAKRAVARTY, VALMIKI PRESS.

1872.

BI 63 B

SL no 19448
15890

5

सर्वस्य प्रयोगो दृष्टः । न च तावता तस्याम्नानमनर्थकं भवति पदार्थाभिसम्बन्धादिति यदुक्तमिति तन्न ब्रूमः । न ह्येकस्मात् पदार्थाभिसम्बन्धान्मन्त्रप्रयोगो भवति, रूपसम्पन्ना अपि हि श्रुत्या विधीयन्ते, तं प्रोहेद्दानस्यत्योसीतिवत्. दुर्विज्ञानत्वाच्च मन्त्राणां न ह्येषु प्रत्यक्षमस्त्यनृषेरतपसो वेति । शेषविशेषविधिरिति यदुच्यते, तन्न ब्रूमः । शेषविशेषविधिस्तद्विषयोऽपि गम्यते । स्थाली पुलाकवत् तद्विषय इति यदुक्तं, अनैकान्तिकोऽयं दृष्टान्तः, व्यभिचारकत्वादिति. एकेनोदनसिक्थेन स्थाली न कृत्स्ना परीक्ष्यते, पाकवैषम्यादेव व्यभिचारित्वाद्दृष्टान्तः । अन्यच्च यावद्गुणग्रहणादिति यदुक्तं, अनेन वचनेन प्रसक्ते कृत्स्नमन्त्रप्रयोगे अयजति समर्थस्योङ्कारो विधीयते, यदप्युक्तमुत्तरसूत्रारम्भादित्येतदपि अनेनैव प्रत्युक्तं । एवमेतानि सूत्रानारम्भकारणानि प्रत्युक्तानि । तत्र यदुक्तमनारभ्यं सूत्रमिति तदयुक्तं ।

मन्त्रविधिस्त्वादिग्रहणेन । अयमर्थः. आदि प्रदिष्टो मन्त्रः कृत्स्नः प्रयोक्तव्य इति । अथ विधिग्रहणं किमर्थमिति चेत्, अधिकृत एव विधिर्विध्यव्यपदेश इति । अत्रोच्यते विधिग्रहणेन तथा एतत्सुब्रह्मण्यामाहूय यजमानं वाचयतीति एवं चिराह्वयेति विध्यादि गृह्यते । अथ चशब्दः किमर्थमिति अर्थादि च विधिर्भवति इदमहमयं रथ इमा गावः सर्वाश्रियेति । अपर आह, मन्त्रविधिस्त्वादिग्रहणेनेति यथा यजुःसमाम्नाये मन्त्रः पठितः

श्रोमा भूदेरवदिति, मह्यन्तेजसे ब्रह्मवर्चसायेति च ममायुष इत्यस्य च प्रत्याम्नायो माभूदित्यत आदिग्रहणेनेत्याह। अथ वा च शब्दः समुच्चयार्थः। आदिग्रहणेनाव्यपदेश इति वर्त्तते अवदृष्टतचादिवत्। एवमुक्तार्थं सूत्रं ॥ २ ॥

एवं मन्त्रविधिश्चादिग्रहणेनेति सिद्धे कृत्स्नमन्त्रप्रयोगे अथ मन्त्रान्तः कथं विज्ञातव्य इत्यत्रोच्यते।

उत्तरादिः पूर्वान्तलक्षणं* ॥ ३ ॥

उत्तरस्य मन्त्रस्यादिना पूर्वस्य मन्त्रस्यान्तोलक्ष्यते, तल्लक्षणं उत्तरादिः पूर्वान्त इति। सिद्धे लक्षणग्रहणं किमर्थमिति चेत्, अत्रोच्यते। यदि ह्ययं लक्षणग्रहणं न कुर्यादुत्तरस्य मन्त्रस्यादिः पूर्वस्य मन्त्रस्यान्तः स्यात्, एवं पूर्वस्य मन्त्रस्यान्तस्य उत्तरस्य मन्त्रस्य चादेः संसर्गः क्रियेत, एवं मा भूदित्यत आह लक्षणमिति ॥ ३ ॥

इह वृतप्रतिमन्त्रणादीनि कर्माण्युपदेक्ष्यन्ते एकं कर्त्तारमधिकृत्य, अविशेषचोदिताश्च त्रय उद्गातारः। यत्त्वित्याऊर्वाचान्यानृत्विजो वृणते कस्मादुद्गातारो वृता आर्त्विज्यं कुर्वन्तीति। तत्रेदं संशेते अविशेषचोदितानां सर्वेषां प्राप्ता कस्येमानि भवन्ति, अत आह आचार्यः।

एकश्रुतिविधानान्मन्त्रान् कर्माणि चोद्गातैव कुर्य्यादनादेशे ॥ ४ ॥

एकवचनश्रुत्या ये विधीयन्ते, त एकश्रुतिविधानाः मरुन्मेवोच इति करिष्यन् प्रतिमन्त्रयेतेत्येवमाद्या मन्त्राः। कर्माणि च पृथक्सावित्रोपादैर्मधुपर्कस्य पिबेदित्येवमादीनि उद्गातैव कुर्यादनादेश इति, आदेशादन्यत्रानादेशे। आदेशः, प्रस्तोता हविर्धानं गच्छेत् मध्यन्दिने कृतआदित्यपष्ठे प्रतिहर्त्ता भवति। अथ वा एकश्रुतिविधानाद्धेतोः उद्गातैवोक्तः, एकस्य श्रुतौ विधानं उद्गाता सामवेदेनेति। अथैवशब्दः किमर्थमिति चेत्, अवधारणार्थः। सामान्यत्वादुद्गातृशब्दस्य यस्यैवानन्यशब्द संयोगः स एव मुख्यः। अनादेशग्रहणस्य प्रयोजनमुक्तं प्रथमसूत्रेण ॥ ४ ॥

उक्तमुत्तरादिः पूर्वान्तलक्षणमिति, एतल्लक्षणं मरुद्दादीनां यजुषां उत्क्रान्तिरसीति पर्यन्तानां येषु पुनरिदं लक्षणं न सम्भवति, तामुच्छ्रयतीत्येवमादिवत्, तेषां कः प्रयोगः इत्यत्राह।

यावद्यजुरनादिष्टान्तान् मन्त्रान्* ॥ ५ ॥

येषां मन्त्राणामन्तोनादिश्यते तान् एव यजुः प्रतीयात् तेषु यावदेव यजति समर्थन्तावदेव प्रयोक्तव्यमिति। ये ब्राह्मण मध्ये पठितास्तेषामुद्धार इति ॥ ५ ॥

उक्तं मन्त्रविधिरादिग्रहणेनेति, न चोक्तं मरुद्दादिषु यजुःषु मन्त्रशब्दोऽस्य वर्त्तत इति। अथ स्वकमार्गो को विधिरित्यत्राह।

---

* लाट्यायनेऽप्येवं। मन्त्रादिति का० पु० पाठः।

ऋचश्चादिग्रहणेन* ॥ ६ ॥

समाम्नाये या ऋक् तस्या ऋचः आदिग्रहणेन विधिर्भवति। अवधूय पवित्रमुदग्दशमवाङ्नाभि वितनुयुः पवित्रं त इति। साम्नश्चेति च शब्दः, साम्नश्चादिग्रहणेन विधिर्भवति, अध्वर्युप्रेषितस्त्यश्रायिरिति गायेदित्यादिवत्। आदिनेति सिद्धे ग्रहणं किमर्थमिति चेत्, उच्यते। आदिना च ग्रहणेन चेत्येवमर्थं ग्रहणं अग्निष्टयतीत्यवभृथसामवदतिवत्॥ ६ ॥

इति परिभाषा।

उक्तं कर्माण्युद्गातैव कुर्यादनादेशे, तत्रोद्गातेत्युक्ते किं लक्ष पुनरुद्गातारं कुर्यादित्युच्यते। तदुद्गातृलक्षणं विवक्षुराचार्यः साधारणत्वादृत्विग्गुणानां सर्वर्त्विजोऽधिकृत्य लक्षणमारभते।

ऋत्विगार्षेयोऽनूचानः साधुचरणोवाग्म्यन्यूनाङ्गोनतिरिक्ताङ्गो द्वयसतश्चानतिकृष्णोऽनतिश्वेतः* ॥ ७ ॥

ऋत्विगिति जातिशब्देन। ऋत्विक्, आर्षेयः, अनूचानः, साधुचरणः, वाग्मी, अन्यूनाङ्गः, अनतिरिक्ताङ्गः, द्वयसतश्च, अनतिकृष्णः, अनतिश्वेतः, दशपदं सूत्रं। अथेदानीमर्थो वक्ष्यते। ऋत्विक्, ऋतौ यजतीति ऋत्विक्, प्रजापतिरकामयत बहुः स्यां प्रजायेयेति स आत्मन् वृत्यमपश्यत्तत ऋत्विजोऽसृजत यदृत्यासृजत तदृत्विजामृत्विक्त्वं। ऋत्विक् कस्मादीरिणः, ऋग्यष्टा भवतीति

---

* द्राह्यायणोऽप्येवं।

शाकपूणिः, ऋतुयाजो भवतीति नैरुक्ताः । आर्षेयः, ऋषेरपत्यमार्षेयः, ऋषिर्दर्शनात् स्तोमान्ददर्शेत्यौपमन्यवः, तद्यदेनांस्तपस्यमानान् ब्रह्म स्वयं लभ्यानर्ष तदृषीणामृषित्वमिति विज्ञायते, आदशमात् पुरुषादव्यवच्छिन्नं आर्षं यस्य स आर्षेयः । अनूचानः, अनूक्तवाननूचानः शिष्येभ्योविद्यासम्प्रदानं यः कृतवान् सोऽनूचानः । साधुचरणः, साध्विति प्रशंसा, प्रशस्तकर्मेत्यर्थः, बहु ब्राह्मणकर्मस्ववस्थितः । वाग्मी, वक्तुं समर्थः, अथ वा संस्कृतवाक् वाग्मी, योहि संस्कृतां वाचमुच्चारयति स वाग्मी, कः पुनर्व्वाचः संस्कारः, शब्दार्थन्यायेभ्योऽवगमः, यस्त्वेवं लक्षणां वाचमुच्चारयति स वाग्मी, न यो बहुतरं वचनमनर्थकं भाषते तद्धि वाक्छलायालमित्युच्यते, योहि बहुभाषणः स न वाग्मी वाचालो वाचाट इत्युच्यते, वाचोग्मिन्यालजारचौ बहुभाषिणीति, सर्वथा यः प्रतिवचनसमर्थः स वाग्मी, योहि पृष्टः सन् न्यायेन प्रतिवचनं प्रददाति, स वाग्मी, मतिद्वैधे उत्पन्ने संशयच्छेत्ता, उदाहरणं चात्र कौषीतकिनः, कस्मात्कौषीतकीनां न कश्चनातीव जिहीते यज्ञावकीर्णाद्धीत्यप्रतिवचनदानात् । अन्यूनाङ्गः, ऊनमेव न्यूनं न न्यूनाङ्गः, स अन्यूनाङ्गः । अनतिरिक्ताङ्गः, अङ्गानां चातिरिक्तता पुरुषलक्षणे सिद्धा, तत्र चोक्तं, ज्योतिषं पूर्वप्रकृतमिति, तस्य चाङ्गं पुरुषलक्षणं, चतुःषष्ठ्यङ्गत्वात् । द्वयसतस्य, प्रमाणतस्य अन्यूनः, अनतिरिक्तः, प्रमाणे प्रमाणे द्वयं द्वयं समं यस्य स द्वयसतः । अन्येषां द्वे सतस्येति पाठः । तेषां कारिकयार्थौ वर्ण्येते, अधस्तोर्द्धस्य नाभेस्तु समोयस्मात् प्रमाणतः । पादाङ्गुष्ठा-

कुविष्टस्य: स वै द्वमत उच्यते इति। अनतिकृष्णः, न अतिकृष्णः अनतिकृष्णः। अनतिश्वेतः, न अतिश्वेतः अनतिश्वेतः। अपरे वयसि निपातयन्ति, कृष्णश्वेतशब्दौ नातिबालो नातिवृद्ध इति पञ्चमस्यार्थं सूत्रं॥ ७॥

ऋत्विजां लक्षणमुक्तं, अथ याज्यः किं लक्षणः स्यादिति अत आह।

याज्यश्च प्रथमैस्त्रिभिर्गुणैर्व्याख्यातः* ॥ ८॥

आर्षेयः अनूचानः साधुचरण इति। अथ वा याज्यश्च एवं लक्षणः यादृग्लक्षणाहृत्विजः। प्रथमैर्वा त्रिभिर्गुणैर्व्याख्यात। लुप्तविभाषं सूत्रं। गुणग्रहणं क्षत्रियवैश्ययोर्यथासम्भवं गुणा ग्राह्याः॥ ८॥

सोमप्रवाकमकरिष्यन्नमः सोमाय राज्ञ इत्युक्त्वा प्रत्याचक्षीत* ॥ ९॥

साम्प्रतं विधिर्विवक्षितः, सोमं प्रब्रूते, सोमप्रवाकः, नमकरिष्यन् कर्म नमः सोमाय राज्ञ इत्येतद्यजुरुक्त्वा प्रत्याख्यानं कुर्यात् किञ्चिदेव व्याक्षेपं कृत्वा अपरुध्य प्रत्याचक्षीत। अथ करिष्यत एव, तावद्विधौ वक्तव्ये कस्मादकरिष्यतः पूर्वमुच्यते प्रत्याख्यानमावश्यवक्तव्यत्वादकरिष्यतः पूर्वमुक्तं, करिष्यतो हि वृतप्रतिमन्त्रणादिः समिदाधानाहवनीयोपस्थानान्तो विधिर्वक्तव्यः स उच्यते॥ ९॥

अकरिष्यतो विधिरुक्तः, अथ करिष्यतो विधिं विवक्षुराह।

---

* द्राह्यायणेप्येवं।

महन्मे वोच इति करिष्यन् प्रतिमन्त्रयेत* ॥१०॥

महन्मे वोचइत्यनेन यजुषा करिष्यन् प्रतिमन्त्रणं कुर्यात् ॥१०॥

तन्न जह्यादप्रोक्तेपि करिष्यामीति विदित्वा* ॥११॥

तत् कृतप्रतिमन्त्रणं यजुः न जह्यात् नोत्सृजेत् अप्रोक्तेपि सोमप्रवाकेणेति करिष्यामीति विज्ञाय। कोऽस्य विषयः साध्यकाः† ॥११॥

अथ कृतप्रतिमन्त्रणं कृत्वा अनन्तरं सोमप्रवाके किं प्रतिपत्तव्यमित्यत्राह ।

आवसथः ससोमप्रवाकाय लवणमन्नन्दध्नाहारयेत*॥१२॥

आवसन्ति तमित्यावसथः, सोमं प्रब्रूते सोमप्रवाकः, तस्मै सोमप्रवाकाय तादर्थ्ये चतुर्थी। लवणमन्नं लवणेन सम्पृक्तमन्नं लवणमन्नन्तत् दध्ना सह हारयेत् भोजयेत्, एवं सूत्रार्थः। आवसथश्च सोमप्रवाकाय कर्त्तव्यः। तत्रैव चास्य भोजनन्देयमिति॥१२॥

प्रहिणुयात् प्रस्तोतृसुब्रह्मण्यौ पुरस्तात् कर्म्मभ्यः*॥१३॥

सोमप्रवाकायान्नं हारयित्वाथानन्तरं प्रहिणुयात् प्रस्तोतृसुब्रह्मण्यौ पुरस्तात् कर्मभ्यः, प्रहिणुयात् प्रेषयेदित्यर्थः।

---

* द्राह्यायणेप्येवं। † असमीचीनः पाठः किन्तु पुस्तकत्रयेऽपि समानत्वात् तादृश एव रक्षितः।

प्रस्तोता च सुब्रह्मण्यश्च प्रस्तोतृसुब्रह्मण्यौ पूर्वं कर्म्मण आरम्भात् अथ वा तादर्थ्ये चतुर्थी यानि पुरस्तात् कर्म्माणि तान्यंषामादीनि तदर्थं ॥ १३ ॥

उक्तं प्रहिणुयात् प्रस्तोतृसुब्रह्मण्याविति। तयोः कर्म्मार्थं प्रागमनं। कर्म्माणि च देवयजने क्रियते। अत आचार्यो देवयजनलक्षणं विवक्षुराह।

प्रागुदक्प्रवणन्देवयजनं लोमशमवृक्षं समं* ॥ १४ ॥

प्रागुदक्प्रवणं देवजयनं। आपः प्राच्य उदीच्यो वा यत्र गच्छन्ति। अथ वा प्रागुदीचीं दिशं यत्रापः प्रवर्त्तन्ते तत् प्रागुदक्प्रवणं चात्वालमारिण्योयत्रापः स्युरित्यर्थः। देवयजनं देवाः अस्मिन्निज्यन्त इति देवयजनं. लोमशं, अतिलोमशं तृणौषधं च बहुलमित्यर्थः। अवृक्षन्नास्मिन् वृक्षाः सन्त्यवृक्षं। समं, यत्र नावषमाभूमिस्तत्समं। एवं लक्षणं देवयजनं स्यात् ॥ १४ ॥

किञ्च।

पुरस्ताच्चास्यापः स्युः* ॥ १५ ॥

पुरस्तादिति दिङ्नियमः क्रियते। पूर्व्वप्रदेशे देवयजनस्य आपः स्युरिति च शब्दः क्रियते। पुरस्तान्नियमः अन्यासु च दिक्षु निप्रतिषेध इति। अस्येति समीपलक्षणा षष्ठी, स्युरिति स्वभावतः स्युर्न कृत्रिमा इति ॥ १५ ॥

---

* द्राह्यायणोऽप्येवं।

उक्तं च स्वभावतः स्युरिति । अथ पुनरुपपत्तिर्न स्यात् ततः किं स्यात् । अत्रोच्यते ।

तदभावे महावृक्ष उदपानोमहापथो वा* ॥ १६ ॥

तदिति पूर्वनिर्दिष्टः, तासामभावः, भवनं भावः, न भावः अभावः, अपामभावे महावृक्षादयः स्युः । महांश्चासौ वृक्षश्च महावृक्षः आन्महतः समानाधिकरणजातीययोरित्याकारः । अपरे वर्णयन्ति उदुम्बर इति । प्राजापत्य उदुम्बरः प्रजापतिर्वाव महानिति पूर्व एव तु साधीयान् । महतः समानाधिकरण इति । उदपानः कूपः । देशान्तरगामी पन्था महापथः ॥ १६ ॥

न चास्य स्थलतरमदूरे स्यात्* ॥ १७ ॥

एवं लक्षणं चैव स्यात्, न चास्य देवयजनस्य स्थलतरं समीपे स्यात् आतिशायनिकस्तरः प्रत्ययो. देवयजनमपि न स्थले भवतीत्येतद्दर्शयति । स्थलतरः पर्वतः, अस्येति सर्वेषु कल्पेषु स्यात् अनन्तरस्य विधिर्माभूदिति ॥ १७ ॥

देवय [illegible] स्य पुरस्तात्* ॥ १८ ॥

न चास्य [illegible] क्तं । किञ्च देवयजनप्रमाणं

च [illegible]

विपर्यस्याभिचरणीयेषु, स्थलादन्यद्देवयजनमात्राच्च* ॥ १९ ॥

उक्तमविशेषेण देवयजनलक्षणं। अथाभिचरणीयेषु विशेषविवक्षुराह। विपर्यस्याभिचरणीयेष्विति। यदिदं देवयजनलक्षणमुक्तं एतदभिचरणीयेषु विपर्यस्तं भवति। विपर्यासः प्रातिलोम्यं। किं सर्वमेव विपर्यस्तं नेत्युच्यते। किन्तर्हि, स्थलादन्यद्देवयजनमात्राच्च। विपर्यासेऽपि सति नैव स्थलतरमदूरे स्याद्देवयजनमात्रस्य पुरस्तान्नैव स्यात्॥ १९ ॥

स्वयं व्रजेत् क्रय उपवसथ्ये वा† ॥ २० ॥

उक्तं प्रहिणुयात्प्रस्तोतृसुब्रह्मण्यौ पुरस्तात् कर्मभ्य इति। अथ तस्य गमनकालः क इति। अत्रोच्यते। आत्मना गच्छेत् क्रये उपवसथ्ये पुनः स्वयं व्रजेदनाहूतोऽपि ॥ २० ॥

उदङ्ङेव तु गृहेभ्यः प्रथमं देवो देवमेत्विति† ॥ २१ ॥

अथ तस्य गमनक्रिया उच्यते। उद[illegible] तु गृहेभ्यः प्रथमं निष्क्रामेत्। देवो देवमेत्वित्यनेन [illegible] शब्दः किमर्थं उच्यते। अन्यतोऽपि गन्तव्ये उ[illegible] प्रस्थानं कुर्यात्। अथ तुशब्दः किमर्थं [illegible]

---

* द्राह्यायणोऽ

दूरं व्रजित्वा विहाय दौष्कृत्यमिति* ॥ २२ ॥

दूरमध्वनोगत्वाल्पेवशिष्टे विहाय दौष्कृत्यमित्येतत् यजुर्जपेत्। विहाय दौष्कृत्यं व्रजामीत्यस्याध्याहारमपरे वर्णयन्ति। अपरे यावद्ग्रहणं कस्मादवचनात् ॥ २२ ॥

बद्धानामासीति पन्थानमापद्य† ॥ २३ ॥

देवयजनगामी यः पन्था तमापद्य अनन्यगामिनं बद्धानामासीत्येतत् यजुर्जपेत् ॥ २३ ॥

उत्तरं वेद्यन्तमाक्रम्य दक्षिणमीक्षमाणः पितरोभूरिति† ॥ २४ ॥

यस्योपवसथ्येऽह्नि आगमनं भवति स देवयजनमहावेदेरुत्तरमन्तमाक्रम्य दक्षिणमन्तमीक्षमाणः पितरोभूरित्येतद्यजुर्जपेत्। यस्य पुनः क्रयेऽह्नि आगमनं भवति स पत्नीसंशालायां वेदिमाक्रमते महावेदेरभावात् ॥ २४ ॥

यजुरन्तरयेन्वाहारस्थानञ्जप्यः* ॥ २५ ॥

यजुषामन्तरयेऽन्वाहारस्थानजप्योमन्यते। अन्तरयस्त्यागः, उत्सर्गः। अन्वाहरणमन्वाहारः अनुत्सर्ग इत्यर्थः। कः पुनर्विषयः। सान्निपातिकोविधिः। तत्रानुजपः अलोपार्थः ॥ २५ ॥

---

* शाङ्खायनाप्येवं।

† शाङ्खायनोप्येवं किन्तु तेन सूत्रद्वयेनैकसूत्रं कृतं।

उपेक्षणं शाण्डिल्यः* ॥२६॥

उपेक्षणं वर्जनमकरणमित्यर्थः। एवं शाण्डिल्योमन्यते। कस्मात् निमित्तापायात्। अपर आह। पितरोभूरिति कृत्स्नं यजुः अन्तरितं समाम्नाये। त्रयोहनु वै पितरः अवमा ऊर्वा काव्या इति। तस्यान्वाहारस्थानं जप्योमन्यते। कस्मादलोपात्। उपेक्षणं वर्जनं शाण्डिल्यः कस्मादपाठात् ॥ २६ ॥ १ ॥

इति प्रथमस्य प्रथमा कण्डिका ॥

अथ द्वितीया कण्डिका।

उक्तं स्वयं व्रजेत् क्रय उपवसथ्येवेति। तत्र उदङ्ङेत्य तु गृहेभ्यः प्रथममित्युद्वाहकर्म प्रकृतमेतदादि। तत्रोक्तमुत्तरं वेद्यन्तमाक्रम्य दक्षिणमीक्षमाणः पितरो भूरित्येतद्यजुर्जपेदिति। अस्यानन्तरं मधुपर्कविधिर्विवक्षितः। तं विवक्षुराह।

पृथक् सावित्रीपादैर्मधुपर्कस्य पिबेत्* ॥ १ ॥

पृथक् नानेत्यर्थः। सावित्रीपादैः सविता देवता यस्याः सेयं सावित्री तस्याः पादैः पिबेत्। मधुना पृक्तन्दधिपयःकृतान्नं वा मधुपर्कः। दधनि पयसि वाथ वाकृतान्ने मधु दद्यान्मधुपर्कमेतदाहुः। दधिमधुसलिलेषु सक्तवः पृथगेवेति विहितास्त्रयस्तु मन्थाः। तस्य मधुपर्कस्य पिबेत् अस्येति अवयवलक्षणा षष्ठी।

---

* द्राह्यायणोऽप्येवं।

कथं पिवेद्यथा शेषः स्यादिति। ननु सावित्रीपादैरिति सिद्धे किं पृथक् ग्रहणमिति। उच्यते। उक्तं, सवितृदेवता सावित्रीति। एवं सर्वासां सवितृदेवतानां प्रसङ्गः प्राप्तः। अत आचार्यः पृथक्ग्रहणं करोति। यस्य ऋक्समाम्नाये पृथगाम्नानं तयेति। ननु यद्येवमर्थं न तस्मात् मुख्यां अद्य नो वेदेत्येतां सावित्रीमुत्सृज्य गौणीं गृह्णीयात्। तन्न, इयमेव मुख्या। कथं मुख्येति चेत्। उच्यते। अथोपसीदत्यभिधीहि भोः सावित्रीं मे भवाननुब्रवीत्विति। अस्मिन्नेतस्या एवानुवचनं। तस्या उत्तरा ऋक्समाम्नायाभिव्यक्तेश्च सावित्री चतुर्थी भवतीत्येतस्या एव श्रुतौ विधानं। तथा शाखान्तरीयायामथावशिष्टायां श्रुतौ एतामेव प्रतिजानते। तस्मात् पृथक्ग्रहणं नानार्थत्वादेवमुक्तं ॥ १ ॥

तत्रैतदाहरन्ति विष्टरं पादप्रक्षालनमर्घ्यमाचमनीयं मधुपर्कमिति[*] ॥ २ ॥

तत्र तस्मिन् मधुपर्कविधौ एतदानयन्ति। विष्टराद्याहरणकर्म कर्तव्यनियमार्थं बहुवचनं। दर्भासनं विष्टरः। पादप्रक्षालनार्थं उदकं पादप्रक्षालनं। अर्घार्थमुदकमर्घ्यं। आचमनार्थमुदकमाचमनीयं। मधुपर्कं उक्तलक्षणः। अस्य तत्र ग्रहणं किमर्थमिति चेत्। उच्यते, मधुमन्थोदमन्थयोर्मधुपर्ककल्पार्थं। ते च वक्ष्यन्ते। तच्च तत्रैतदाहरन्ति विष्टरादि ॥ २ ॥

---

[*] द्राह्यायणस्तु अर्हयिष्यन्त आहरन्ति विष्टरौ पाद्यमर्घ्यं इत्येव विशेषं सूचितवान्।

तस्य पिबेत्[*] ॥ ३ ॥

तस्य मधुपर्कस्य पिबेत् ! कथं ॥ ३ ॥

इदद्न्नमयं रस इमा गावः सहश्रियेति तु पुरस्तादेकैकस्य[*] ॥ ४ ॥

सावित्रीपादस्येति शेषः । तुशब्दो विशेषणार्थः ॥ ४ ॥

वाग्वहु बहु मे भूयादिति प्रथमस्योपरिष्टात् प्राणो वै वाचो भूयान् बहुर्मे भूयो भूयादिति द्वितीयस्य मनो वाव सर्वं सर्वं मेभूयादिति तृतीयस्य[*] ॥ ५ ॥

सावित्रीपादस्योपरिष्टादिति वर्त्तते । प्रथमद्वितीयतृतीयग्रहणं चतुर्थनिषेधार्थं । तूष्णीं चतुर्थमिति प्राप्ते ॥ ५ ॥

सर्वे स्वाहाकारान्ताः[*] ॥ ६ ॥

सर्वे भक्षमन्त्राः स्वाहाकारान्ताः । स्वाहाकारान्ता इति बहुवचनात् सिद्धेः किमर्थं सर्वग्रहणमिति चेत् उच्यते । मधुमन्थादीनामपि भक्षमन्त्राः स्वाहाकारान्ताः स्युरित्येवमर्थं सर्वग्रहणं ॥ ६ ॥

रसोसि वानस्पत्यो रसं मयि धेहीति मधुमन्थस्य पिबेदिति गौतमो, वानस्पत्य इति प्रवचनं[†] ॥ ७ ॥

---

[*] एतानि द्राह्यायणीयेऽत्र न सन्ति ।

[†] द्राह्यायणेऽप्येवं किन्तु तेनैतेन सूत्रद्वयं कृतं ।

रसोसि वानस्पत्य इति। अनेन मन्त्रेण मधुमन्थस्य पिबेदिति गौतम आचार्य आह। यथोक्तं विष्टरादीनि द्रव्याण्येकैकशस्त्रिस्त्रिर्वेदयेरन्निति, तत्र मधुमन्थस्यावेदने प्राप्ते आह। वानस्पत्य इति प्रवचनमिति। वानस्पत्यो वानस्पत्य इत्यावेदनन्तिः ॥ ७ ॥

तथा दधिमन्थोदमन्थयोः, पयस्योपयस्य इति तु रसादेशः* ॥ ८ ॥

यथा मधुमन्थस्य तथा दधिमन्थोदमन्थयोः पिबेत्। तेन प्रकारेणेत्यर्थः। अयं तु विशेषः। पयस्योपयस्य इति तु रसादेशः। वानस्पत्य इत्येतस्य स्थाने स्यातामित्यर्थः। रसोऽसि पयस्य रसोस्यो पयस्यः, यथासङ्ख्यं ॥ ८ ॥

एते नैव प्रवचने कालिन्दः सारस्वत इति वा† ॥ ९ ॥

एते एव पूर्वोक्तप्रवचने दद्यात्। पयस्योपयस्य इति। कालिन्दः सारस्वत इति वा, याथासङ्ख्येन ॥ ९ ॥

शेषं ब्राह्मणाय दद्यात्† ॥ १० ॥

उक्तं मधुपर्कस्येत्यवयवलक्षणा षष्ठी क्रियते। तत्र पानमुक्तं। अथ शेषे का प्रतिपत्तिरिति। उच्यते। शेषं ब्राह्मणाय दद्यात् पुत्रादेः ॥ १० ॥

---

* द्राह्यायणेनैतेन सूत्रद्वयं कृतं।

† द्राह्यायणेऽप्येवं।

तद्भावेऽद्भिः संप्रोक्ष्याब्राह्मणाय* ॥ ११ ॥

शूद्रवर्जं । उच्छिष्टयोर्ग्यं पुत्रशिष्याभावेऽद्भिः संप्रोक्ष्य क्षत्रियवैश्ययोः ॥ ११ ॥

कुरुतेति गवि प्रोक्तायां ब्रूयात्* ॥ १२ ॥

उक्तं आचान्तोदकाय गौरिति नापितस्त्रिर्ब्रूयात्। एवं गवि प्रोक्तायां कुरुतेति ब्रूयात् ॥ १२ ॥

उत्सृजत गां तृणानि गौरत्त्विति वा† ॥ १३ ॥

कुरुतेति ब्रूयादेवं वा ॥ १३ ॥

सर्वेषां यज्ञोपवीतोदकाचमने नित्ये कर्मापयतां‡ ॥ ॥ १४ ॥

उद्गातृकर्मोक्तं । अथ सर्वेषां साधारणमुच्यते । सर्वेषामुद्गातॄणां यज्ञोपवीतञ्च उदकाचमनञ्च एते च नित्ये कर्म कुर्वतां एवं यज्ञोपवीती भवत्येवमाचान्तोदको भवतीति। यज्ञोपवीतञ्च उदकपूर्णञ्च कमण्डलुं । आचमन्ति तस्मादित्याचमनं। यज्ञोपवीतनित्यत्वे ब्रह्मचर्यं ज्ञापयति। अथ सर्वग्रहणं किमर्थं । उच्यते। सुब्रह्मण्यं चतुर्थानां ब्रह्मपञ्चमानां यजमानषष्ठानां सम्बन्धस्तदर्थं ग्रहणं॥ १४ ॥

---

* द्राह्यायणोप्येवं ।

† द्राह्यायणे विशेषोस्ति ।

‡ द्राह्यायणोप्येवं किन्तु च्छेदविषये विशेषोऽस्ति ।

अव्यवायोऽव्यावृत्तिश्च यज्ञाङ्गैः* ॥ १५ ॥

न व्यवायः अव्यवायः, न व्यावृत्तिः अव्यावृत्तिः, अन्तरा गमनं व्यवायः, अनभिमुखता व्यावृत्तिः । केनाव्यवायोऽव्यावृत्तिश्च यज्ञाङ्गैः, कर्मोपयतामिति वर्त्तते ॥ १५ ॥

प्राङ्मुखकरणञ्चानादेशे† ॥ १६ ॥

प्राङ्मुखकरणमादेशादन्यत्र स्यात्, आदेशः प्रत्यङ्मुखस्तिष्ठञ्छिरसि गायत्रङ्गायेदिति । चशब्दः समुच्चयार्थः, अव्यवायोऽव्यावृत्तिश्च यज्ञाङ्गैरनादेश इति ॥ १६ ॥

क्रीते राजनि सुब्रह्मण्य उत्तरेण सोमवहनं गत्वान्तरेणेषे शमीशाखां पलाशशाखां वा सपलाशां पाणौ कृत्वाऽवतिष्ठेत• ॥ १७ ॥

उक्तं प्रक्रिणुयात् पश्चात्सुब्रह्मण्यो पुरस्तान्क्रमस्य इति । तत्र सुब्रह्मण्य कर्म विवक्षुरिदं सूत्रमारभते, क्रीते राजनि सुब्रह्मण्य इति । अथ कस्मात् क्रमभेदः क्रियते, प्रस्तावाय तावद्वक्तव्य [illegible] तार्क्ष्यसामादीनामित्यत्राह कृताकृतत्वात् [illegible]र्क्ष्यसामादीनां क्रमभेद इति । क्रीते राजनि क्रीते सोमे, सुब्रह्मण्य इति कर्त्तृनिर्देशः, उत्तरेण सोमवहनं गत्वा उत्तरेणेति दिङ्नियमः, गत्वेति क्रियोपदेशः । अन्तरेणेषे सोमवहनेषयोरन्तराले शमीशाखां पलाशशाखां वा सपलाशां दक्षिणेन पाणिना गृहीत्वावतिष्ठेत ॥ १७ ॥

---

* द्राह्यायणेऽप्येवं, किन्तु तत्र कर्त्तृविषये विशेषोऽस्ति ।

• द्राह्यायणेऽप्येवम्

अध्वर्युसम्प्रैषं सर्वत्राकाङ्क्षेत् सुब्रह्मण्यायाम्* ॥ १८ ॥

संप्रैषणं मन्त्रान्तम् आकाङ्क्षेत् तावत्प्रतीक्षेत यावत् संप्रैषणमिति सर्वत्र ग्रहणं सर्वासु सुब्रह्मण्यासु न केवलं शाकल्यामिति ॥ १८ ॥

रश्मी धारयंश्छाखया¶ प्रेष्योद्गावौ दक्षिणं पूर्व्वं ॥ १९ ॥

रश्मी अभीशू प्रग्रहावित्यर्थः धारयन् सव्येन पाणिना शाखया दक्षिणेन पाणिना गृहीतया प्रस्थापयेत् गावौ सोमवहनयुक्तौ दक्षिणं पूर्वम्, दक्षिणस्यां धुरि यो युक्तस्तं पूर्वं पश्चादुत्तरमित्यर्थः ॥ १९ ॥

सुब्रह्मण्योमिति त्रिराह्वयेत्प्राचि वर्त्तमाने† ॥ २० ॥

प्राङ्मुखे वर्त्तमाने सुब्रह्मण्योमिति प्रणवं त्रिर्ब्रूयात्, वर्त्ततिर्गत्यर्थः ॥ २० ॥

षट्कृत्वः प्रतीचि* ॥ २१ ॥

प्रत्यङ्मुखे वर्त्तमाने षट्कृत्वः प्रणवं ब्रूयादिति वर्त्तते ॥ २१ ॥

पूर्व्वेण पत्नीशालां विमुक्ते च्छदिषि शाखामवगुह्य तामेवैषामनूत्क्रम्य§ यथार्थं स्यात् ॥ २२ ॥

---

* द्राह्यायणेऽप्येवम् ।

¶ प्रेष्येदिति द्राह्यायणः । तेनैतेन सूत्रद्वयं कृतम् ।

† द्राह्यायणे मध्यमया वाचेत्यधिकमस्ति ।

§ द्राह्यायणे किञ्चिदधिकमस्ति ।

पत्नीशालायाः पूर्वप्रदेशे विमुक्ते अर्द्धविमुक्ते भति छादिषि छादनकटे शाखाम् अवगुह्य अवलम्ब्य तामेवैषामनतिक्रम्य अवतीर्य्य ततो यथार्थं स्यादिति कर्मणः समाप्तिं दर्शयति ॥ २२ ॥

दक्षिणमनड्वाहꣳ सुब्रह्मण्याय दद्यात् * ॥ २३ ॥

दक्षिणस्यां धुरि यो युक्तोऽनड्वान् तं सुब्रह्मण्याय दद्यात् यजमानः सामर्थ्यात् ॥ २३ ॥

उभाविति शाट्यायनकं विज्ञायते कर्मसंयोगात् * ॥ २४ ॥

उभावप्यनड्वाहौ देयाविति शाट्यायनके श्रुतिः कर्मसंयोगात् उभाभ्यां हि कर्म कृतं छेत्पादानं क्रियते कर्मसंयोगादिति यस्य येन कर्मसंयोगः स तद्द्रव्यं लभत इत्यर्थः ।

यस्मिन् कर्मणि यद्द्रव्यं यस्य सन्निहितं भवेत् ।
तत्तस्यैव प्रदातव्यं होतुर्गोत्रपटो यथा ॥ २४ ॥

इति प्रथमस्य द्वितीया कण्डिका ।

अथ तृतीया कण्डिका ।

आतिथ्यायाꣳ सꣳस्थितायां दक्षिणस्य द्वारबाहोः परस्तात्तिष्ठन्नन्तर्वेदिदेशेऽन्वारब्धे यजमाने पत्न्याश्च सुब्र-

---

* द्राह्यायणे विशेषोऽस्ति

ह्मण्योमिति त्रिरुक्त्वा निगदं ब्रूयादिन्द्रागच्छ हरिव आगच्छ मेधातिथेर्मेषवृषणश्वस्य मेने गौरावस्कन्दिन्नहल्यायै जारकौशिकब्राह्मणगौतमब्रुवाणैतावदहे सुत्यामिति यावदहे स्यात् * ॥ १ ॥

उक्ता शाकटी सुब्रह्मण्या सुब्रह्मण्योमिति त्रिराह्वयेत् प्राचि वर्तमाने षट्कृत्वः प्रतीचीति प्रणवमात्रक्रियोक्ता इदानीं तस्याः ¹कालदेशक्रियाविधयो विवक्षिताः, तान् विवक्षुराचार्य्य इदं सूत्रमारभते, आतिथ्यायां संस्थितायामिति। आतिथ्या इष्टिः तस्यां संस्थितायां समाप्तायामित्यर्थः दक्षिणस्य द्वार्बाहोः पत्नीशालायाः पूर्वप्रदेशे तिष्ठन्। कथं गम्यते पत्नीशालाया स्येति उच्यते, सम्बन्धादातिथ्यायां संस्थितायामिति पूर्वेण पत्नीशालायां तिष्ठन्नित्यूर्द्धता विधीयते। अन्तर्वेदिदेशे अकृतं वेदिकरणं भवत्यतो देशइत्याह। अन्वारब्धे यजमाने पत्न्याञ्च, अन्वारम्भणं स्पर्शनम्, सप्तमी क्रियते यस्य च भावेन भावलक्षणमिति समासः क्रमार्थः। सुब्रह्मण्योमिति त्रिः प्रणवमुक्त्वा निगदं ब्रूयात्। इन्द्रागच्छेत्येतदादि निगदग्रहणं सव्यवहारार्थम् वक्ष्यत्यग्निष्टुत्स्वाग्नेयो निगद इति। एतावदहे सुत्यामिति यावदहे स्यादिति एतावदित्यत्र सुत्या निर्देश्या यावद्भिरहोभिः सुत्या तावद्भिः परिगणनां कृत्वा निर्द्देशः कार्य्यः ॥ १ ॥

---

* द्राह्यायणेनैतेन सूत्रत्रयं कृतम्।

[1] कालभेदक्रियेति का० पु० तथा स० पु० पाठः।

अद्येति समानाह्नि* ॥ २ ॥

यस्मिन्नहनि सुत्या भवति तस्मिन्नहन्यद्येति ब्रूयात्, समानाह्नीति किमर्थमद्येति सुत्यामिति सिद्धेः, उच्यते, कदाप्येकस्मिन्नहनि कृत्स्नं कर्म क्रियते, तस्मिन्नपि अद्य सुत्येत्येवं ब्रूयात्, कोऽस्य विषयः। साद्यस्क्राः ॥ २ ॥

देवा ब्राह्मण आगच्छतागच्छतागच्छतेति गौतमः* ॥३॥

सुत्यादेशानन्तरमेतद्ब्रूयात् इत्येवं गौतम आचार्य्य आह ॥ ३ ॥

आगच्छेति पूर्वं देवाह्वानाद्धानञ्जय्यः* ॥ ४ ॥

एवं धानञ्जय्य आचार्य्यो मन्यते ॥ ४ ॥

आगच्छ मघवन्नित्येके* ॥ ५ ॥

एके आचार्य्याः पूर्व्वं देवाह्वानान्मन्यन्ते ॥ ५ ॥

पूर्व्वयोः प्रणवयोर्विरमेत्‘ ॥ ६ ॥

अवस्यादित्यर्थः, विरामोऽवसानम् ॥ ६ ॥

मेने ब्रुवाणयोः+ ॥ ७ ॥

एतयोश्च पदयोर्विरमेत् ॥ ७ ॥

---

* द्राह्यायणोऽप्येवम्।

‘ द्राह्यायणे प्रणवान्तयोरिति विशेषः।

+ द्राह्यायणे ब्रुवाणेति चेति विशेषः।

षणि जारे चाग्नेय्याम्* ॥ ८ ॥

आग्नेय्यां सुब्रह्मण्यायां एतौ च विरामौ षणे जारे चेति ॥ ८ ॥

पृथग्यजते शब्देषु च† ॥ ९ ॥

विरमेदिति वर्तते पृथक्कानेत्यर्थः, यजते शब्देषु चेति उक्ते किं पृथग्ग्रहणमिति चेत् उच्यते, पितृपितामहप्रपितामहशब्दानां च समासो माभूदिति ॥ ९ ॥

एवं त्रिः† ॥ १० ॥

अनेन प्रकारेण त्रिः क्रिया सुब्रह्मण्यायाः ॥ १० ॥

आहूय‡ ॥ ११ ॥

आहूयेति विधिर्गृह्यते, एवं त्रिराहूय यजमानं वाचयति ॥ ११ ॥

पत्नीयजमानावुपहवमिच्छमानौ सुब्रह्मण्योपह्वयस्वेति† ॥ १२ ॥

पत्नी च यजमानश्च पत्नीयजमानौ तावुपहवं काङ्क्षमाणौ सुब्रह्मण्योपह्वयस्वेत्येवं ब्रूयातां उपह्वानमुपहवः ॥ १२ ॥

उपहूत इत्युपहवः" ॥ १३ ॥

सुब्रह्मण्यो याचित उपहवं दद्यात्, कः पुनरुपहवः उपहूत इत्युपहवः अयमुपहवप्रकारः ॥ १३ ॥

---

* द्राह्यायणे विशेषोऽस्ति ।

† द्राह्यायणेऽप्येवम् ।

‡ द्राह्यायणेन सूत्रद्वयमेकसूत्रं कृतम् ।

उपसत्य यथार्थꣳ स्यात् * ॥ १४ ॥

स्पष्टार्थं ॥ १४ ॥

एवꣳ सर्वेषपसन्दतेषु• ॥ १५ ॥

बहुवचनसामर्थ्यात् तत्सिद्धेः सर्वग्रहणं निरर्थकमिति चेत् तत् कथं प्रतीष्टिषु स्यादिति उपसद्ग्रहणादिष्टिद्वये उपसत्प्रत्ययो माभूदिति ॥ १५ ॥

याश्चोर्द्ध्वमुपसद्भ्य उत्करे तु तत्र तिष्ठन्+ ॥ १६ ॥

याश्चोर्द्ध्वमुपसद्भ्यस्सादेत्यन्तं सुब्रह्मण्यास्तासामप्येष एव विधिः अयन्तु विशेषः, उत्करे तु तत्र तिष्ठन्निति, तिष्ठन्निति वक्तव्यं तत्र ग्रहणं किमर्थमिति चेत् उच्यते, माभूत् समीपसप्तमी प्रत्यय इति आह्वे नोत्करे वक्तव्या । अपर आह उत्करे चाह तत्र तिष्ठन्निति हि ब्राह्मणं तस्मादुत्करे तिष्ठन् सुब्रह्मण्यः सुब्रह्मण्यामाह्वयतीति ॥ १६ ॥

प्राक् सुत्यादेशान्नामग्राहः‡ ॥ १७ ॥

एवं चैता उत्करे भवन्ति किन्तु प्राक् सुत्यादेशान्नामग्राहो भवति एतावदहे सुत्यामिति प्रागस्माद्वचनात् ॥ १७ ॥

अग्नीषोमीयवपायाꣳ हुतायाम् परिहृतासु वसतीवरीषु

---

* द्राह्यायणे अन्यथास्ति ।

• द्राह्यायणेऽप्येवम् ।

+ द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

‡ द्राह्यायणेऽप्येवम् । किन्तु तत्र छेदविषये विशेषोऽस्ति ।

प्रातरनुवाकोपक्रमवेलायामसौ यजत इति प्रत्येकं गृह्णीयाद्यजमाननामधेयान्यमुष्य पुत्रः पौत्रो नप्तेति पूर्वेषां* ॥ १८ ॥

अग्नीषोमीयस्य पशोर्वपायां हुतायां वसतीवरी परिहरणे कृते प्रातरनुवाकस्य आरम्भणवेलायां यजमाननामधेयानि गृह्णीयात् प्रत्येकम् एकमेकं प्रति प्रत्येकम् असाविति सर्व्वनाम्ना यजमानस्य नामधेयानि यजमाननामधेयानीति बहुवचनं क्रियते तत्सम्बन्धेन सर्वाण्येतानि पितृप्रभृतीनि यजमाननामधेयानि। अपर आह नक्षत्रास्य यं नित्यं तृतीयं यत्तद्गुह्यमेव भवति। सर्वनाम्नः स्थाने पितृपितामहप्रपितामहानां नामधेयानि गृह्णीयात् अमुष्य पुत्रः पौत्रो नप्तेति यथासंख्यम्। यथामुष्य पुत्रः पौत्रो नप्तेत्येतेषां पूर्वत्वे सिद्धे पूर्वेषामिति किमर्थमारभ्यते, उच्यते, एकशेषविधिप्रज्ञापनार्थं, कथमेकशेषो गृह्यतइति पूर्वेषां च पूर्वासां च ॥ १८ ॥

अथावरेषां यथाज्येष्ठꣳ स्त्रीपुꣳसा ये जीवेयुः¶ ॥१९॥

अथानन्तरमवरेषां नामानि गृह्णीयात् अवरे पुत्रपौत्रप्रपौत्राः, कथमेतद्गम्यते तेषामपि त्रयाणामेवेति अथशब्दसामर्थ्यात् यथाज्येष्ठम् यो ज्येष्ठः यथाज्येष्ठम् उत्पत्तिक्रमतः किमविशेषेण न जीवेयुः ॥ १९ ॥

जनिष्यमाणानामित्युक्त्वा सुत्यादेशप्रभृति समापयेत्† ॥२०॥

---

* द्राह्यायणेऽप्येवं, किन्तु छेदविषये विशेषोऽस्ति।

¶ द्राह्यायणेऽप्येवम्।

† द्राह्यायणे विशेषोऽस्ति।

अनिष्यमाणानामिति सिद्धे उक्तेति किमर्थमारभ्यते, उच्यते, पृथग्यजते शब्देषु च विरमेदित्युक्तम् तदिहापि प्राप्तं तन्निवृत्त्यर्थम् उच्यते समासेन पितृपितामहप्रपितामहशब्दं कृत्वा यजत इति ब्रूयात् ॥ २० ॥

याग्नीषोमीयवपायां लुप्ता सा साद्यःक्रेषु* ॥ २१ ॥

याग्नीषोमीयवपा होमानन्तरकाला सुब्रह्मण्या सा साद्यःक्रेषु लुप्ता लोपः क्रियते, अथ सामर्थ्यादेव लोपे प्राप्ते निमित्तापाये नैमित्तिकस्याप्यपायइति सूत्रं किमर्थमारभ्यते, अत्रोच्यते, तिस्रः सन्नियोगशिष्टाः सनामयाज्याः तासां सन्नियोगशिष्टानां सतीनां पूर्वस्याः लोपे उत्तरयोरपि लोपो गम्यते । सन्नियोगशिष्टानामन्यतमापायेऽपाय इति, अपर आह प्रतिनिधौ माभूदिति, साद्यःक्रेष्वग्नीषोमीयस्य पशोः स्थाने अग्नीषोमीयं पुरोडाशं निर्वपतीति, अथाहेत्वनिर्देशो किमर्थमिति चेत्, अत्रोच्यते, सूत्रकारस्यायमभिप्रायः सैव लुप्ता । अन्यच्च निमित्तापायेऽपि नैमित्तिकानि भवन्तीति । यथा सन्ततिस्वप्रस्तावास्वपि कुशाविधानमिति ॥ २१ ॥

इति प्रथमस्य तृतीया कण्डिका ।

---

*शाङ्खायने विशेषोऽस्ति ।

अथ चतुर्थी कण्डिका ॥

अग्निष्टुत्स्वाग्नेयो निगदः* ॥ १ ॥

सुब्रह्मण्यायाः सार्वक्रतुको विधिरुक्तः, साम्प्रतं विशेषो विवक्षितस्तं विवक्षुराचार्य्य आह, अग्निष्टुत्स्वाग्नेयो निगद इति। अग्निष्टुत्सु यज्ञेषु आग्नेयो निगदो भवति अग्निर्देवता अस्येत्याग्नेयः, निगदश्च उक्तलक्षणः, अग्निष्टुत्स्वाग्नेयेति वक्तव्ये निगद इति कथं निगदस्यैव प्रत्याम्नानं स्यान्नेतरस्येति ॥ १ ॥

तत्र गौतमीयमग्न आगच्छ रोहिताभ्यां बृहद्भानो धूमकेतो जातवेदो विचर्षण आङ्गिरस ब्राह्मणाङ्गिरस ब्रुवाणेति प्राक् सुत्यादेशात्* ॥ २ ॥

तत्र तस्मिन्नित्यर्थः। गौतमस्येदं गौतमीयम्। अग्न आगच्छेत्येवमादिर्निगदः। प्राक् सुत्यादेशात् एतावदहे सुत्यामिति प्रागस्मात् ॥ २ ॥

देवानाꣳ स्थानेऽग्नयः* ॥ ३ ॥

देवानां स्थाने अग्नय इति ब्रूयात् ॥ ३ ॥

अथ धानञ्जय्योऽग्न आगच्छ रोहिताव आगच्छ भरद्वाज-

---

* लाट्यायनेऽप्येवम्।

स्याजसत्वसः घनो वारावस्कन्दिन्नघसो जारेत्याङ्गिरसप्रभृति-समानम्[*] ॥ ४ ॥

अथशब्द आनन्तर्ये गौतमीयो विधिरुक्तः, आग्नेयी च सुब्रह्मण्योक्ता । तत्रायं धानञ्जय्योक्तो विशेषः अग्न आगच्छ रोहिताश्व इत्येतदादिः प्राक् सुत्यादेशादिति वर्तते, किञ्च ॥ ४ ॥

इन्द्र३ आगच्छेति ब्रूयाद्विश्व इति देवाननिरुक्तेषु[†] ॥ ५ ॥

आग्नेयी सुब्रह्मण्योक्ता । साम्प्रतं अनिरुक्त उच्यते, आगच्छेति विश्वे ब्रह्माण इत्येवं ब्रूयात्, अनिरुक्तेषु उपहव्यादिषु । आनिरुक्तं देवतानामधेयं पारोक्ष्यम ॥ ५ ॥

अनिरुक्तप्रातःसवनयोश्च[†] ॥ ६ ॥

एवमेव सुब्रह्मण्या स्यात्, अनिरुक्तं प्रातःसवनं यस्य सोऽनिरुक्तप्रातःसवनः अनिरुक्तप्रातःसवनश्चानिरुक्तप्रातःसवनश्चानिरुक्तप्रातःसवनौ तयोरनिरुक्तप्रातःसवनयोः, कथं पुनर्गम्यते, यथायं बहुव्रीहिः समासः । अथ पुनरयं तत्पुरुषः कल्पेतेति । यदि ह्ययं बहुव्रीहिरभविष्यत् सुक्तसंशयमेव सूत्रमभविष्यत् । अनिरुक्तापूर्ववाजपेयेष्विति । एवं क्रियमाणे एवं सूत्रम् अभविष्यत् । समासे च संशयो नाभविष्यत् । येन पुनरयं पृथक्सूत्रमारभ्यते, अनिरुक्तप्रातः-

---

[*] द्राह्यायणेऽत्र नास्ति ।

[†] द्राह्यायणेऽप्येवम् ।

सवनयोस्त्विति ज्ञापयति तत्पुरुषः समास इति अनिरुक्तश्च तत् प्रातःसवनं वानिरुक्तप्रातःसवनमिति। तेनापूर्ववाजपेययोः प्रातरनुवाकोपक्रमणकालेव सुब्रह्मण्या निरुक्ता स्यादिति उच्यते, न क्रतुसम्बन्ध एवायं गृह्यतां तदुच्यते मुक्तसंशयं सूत्रमभविष्यत् एवं चेत् अनिरुक्तापूर्ववाजपेयेष्विति एवं क्रियमाणे सूत्र इत्यत्र ब्रूमः, यद्येवं सूत्रमभविष्यत् वाजपेयविचाराणां सर्वेषां प्रसङ्गोऽभविष्यदेवं माभूदित्यत आह, अनिरुक्तप्रातःसवनयोस्त्विति ॥ ६ ॥

अभिषेचनीयदशपेयावन्तरेण सदा नामग्राहः* ॥ ७ ॥

अभिषेचनीयस्य दशपेयस्य अभिषेचनीयदशपेयौ तावन्तरेण याः सुब्रह्मण्याः ताः सर्वाः सनामग्राहाः अन्तरान्तरेण युक्त इति द्वितीया भवति। सदाग्रहणं सत्राद्यपेक्ष्यम्, अपरे ब्रुवते नामग्रहणमात्रमेवास्त्विति न निगदः ॥ ७ ॥

अहर्गणेष्वहराद्यन्तयोराह्वयेत्* ॥ ८ ॥

द्विरात्रप्रभृतिष्वहर्गणेषु अह्नः आदौ चान्ते चाह्वयेत्। अथ किमर्थमिदमारभ्यते, विद्यमाने आह्वाननिमित्ते प्रत्यहं वसतीवरीपरिहरणे प्रातरनुवाके च। उच्यते, वक्ष्यत्ययम् एकाष्टकादीक्षिण उपसर्गिनस्ते तूष्णीमेकत्रिंशमहरासीरन् सवनविधेन वा पशुना यजेरन्निति, अत्रापि कथं स्यादिति ॥ ८ ॥

उत्तरार्थौ ह्वरन्तिकौ* ॥ ९ ॥

---

* द्राह्यायणेऽप्येवम्।

या अङ्कः अन्ते सुब्रह्मण्या सोत्तरार्था, उत्तरार्थमहर्गणेष्वहराद्यन्तयोराकर्षयेदिति । अत्रातिरात्रान्ते प्राप्ता तत्प्रतिषेधार्थमारभ्यते, उत्तरार्था हरन्तिकीति ॥ ९ ॥

अग्नीषोमीयप्रभृत्यहीनेषु सर्वाः सनामग्राह्याः* ॥ १० ॥

अग्नीषोमीयादि यत्कर्म अहीनेषु तस्मिन् याः सुब्रह्मण्याः ताः सर्वाः सनामग्राह्याः स्युः । ननु अग्नीषोमीयप्रभृतयः सनामग्राह्या एव भवन्ति, तत् किमिदम् अग्नीषोमीयप्रभृतीत्यारभ्यते, उच्यते, वक्ष्यत्ययं सर्वाः सनामग्राह्या इति । यद्ययमग्नीषोमीयप्रभृतीति न ब्रूयात्, तदा शाकल्या आरभ्य सर्वाः सनामग्राह्याः स्युः, सर्वा इति वचनात्, न हि तदस्ति यद्वचनान्न भवति । वचनस्यातिभारो नास्ति वचनमुपलब्धुं शक्यते । अथाहीनग्रहणं किमर्थमिति चेत्, एकाहिको विधिरुक्तः । सात्रिको वक्ष्यते, दीक्षानुपूर्व्येण दीक्षितानां सत्रेषु नामग्राह इत्यत आरभ्य तदेवमुभयत्रोक्ते विशेष उच्यमानः प्रत्याख्यायाहीनादन्यत्र न स्यात् । तथा च सूत्रे उक्तम्, एकाहाहीनसत्राणीति चतुर्थी सोमजातिर्नास्ति । अतएव सिद्धेऽहीनग्रहणं न कर्तव्यम्, क्रियमाणे कारणं वक्तव्यम् । उच्यते, कर्तव्यमहीनग्रहणम्, अक्रियमाणे मुख्याहीनशब्दो गृह्यते येऽहीनकाण्डे पठितास्तएव गृह्येरन् मुख्यत्वात् गौणमुख्ययोर्मुख्ये सम्प्रत्यय इति कृत्वा सोऽयमाचार्योऽहीनग्रहणं करोति । येऽप्यहीनकाण्डे न परिपठिताः । यथा वरुणप्रघासद्विदिवसाकमेधश्चव्युष्टिर्द्विरात्र इति । द्वादशाहीनसा-

---

*शाङ्खायनेऽप्येवम् ।

हीनभूतः, कथम् एतेषु सर्वेषु एष विधिः स्यादित्यतोऽर्थमहीनग्रहणम् ॥ १० ॥

दीक्षानुपूर्वेण दीक्षितानाꣳ सत्त्रेषु नामग्राहः* ॥ ११ ॥

आहीनिको विधिरुक्तः । साम्प्रतं सात्त्रिक उच्यते, येनानुपूर्वेण दीक्षिताः सत्त्रिणस्तेनैव क्रमेण तेषां सुब्रह्मण्यायां नामग्रहणं स्यात् । आनुपूर्वं क्रमः । आनुपूर्वेणेति सिद्धे किं दीक्षाग्रहणमिति, उच्यते, अनेनोक्तम्, असौ यजत इति प्रत्येकं गृह्णीयादिति, तत्र प्रत्येकग्रहणे प्रयोजनमनेकयजमानतायां प्रत्येकं गृह्णीयादिति एकाहाहीनेषु तत्रापि दीक्षणानुपूर्वेणैव । अथ दीक्षितानामिति किमर्थम् उच्यते नेदिष्ठिनि दीक्षितं प्रेतस्यैव नामग्रहणं स्यादिति । य एव प्रथमं सत्त्रित्वेन दीक्षित इति ॥ ११ ॥

ऊर्द्ध्वमतिरात्रादग्रहणम्* ॥ १२ ॥

प्रायणीयादतिरात्रादूर्द्ध्वमग्रहणं नाम्नाम् ॥ १२ ॥

तस्यान्ते श्वः सुत्या गौतमस्य* ॥ १३ ॥

तस्य प्रायणीयस्यान्ते या वसतीवरी परिहरणान्तकाला सुब्रह्मण्या, तस्यां श्वः सुत्यामागच्छेति ब्रूयात् । तस्येति निर्देशः क्रियते अहीनद्वादशाहवैदत्रिरात्रार्थं, तस्य तस्येति ॥ १३ ॥

नार्मेधान्त एके* ॥ १४ ॥

---

*द्राह्यायणोऽप्येवम् ।

एके आचार्या मन्यन्ते, श्वः सुत्या संयुक्ता नामधान्ता सुब्रह्मण्या स्यादिति। अहरादाद्य सुत्या स्यादित्यर्थः ॥ १४ ॥

अद्य सुत्या शाण्डिल्यस्य* ॥ १५ ॥

प्रायणीयस्यातिरात्रस्यान्ते शाण्डिल्य आचार्योऽद्य सुत्येति मन्यते ॥ १५ ॥

अनाज्ञातं धानञ्जय्यस्तिसृषु चोत्तमासु नामग्राहः¶ ॥१६॥

अतिरात्रस्यान्तेऽनाज्ञातं धानञ्जय्यो मन्यते, तिसृषु च सर्वोत्तमासु नामग्राहः स्यादिति ॥ १६ ॥

उत्तमयोरिति गौतमः* ॥ १७ ॥

सर्वोत्तमयोर्नामग्राहः स्यादिति गौतम आचार्यो मन्यते एतस्मिन् कल्पे ॥ १७ ॥

तथा सत्यग्नीषोमीयवपायामग्रहणं धानञ्जय्योऽनाज्ञातं वा† ॥ १८ ॥

तथा सति कल्पे अग्नीषोमीयवपायामग्रहणं नाम्नां धानञ्जय्य आचार्यो मन्यते। समाधिप्रधानत्वादनाज्ञातमेव वा ॥ १८ ॥

---

*द्राह्यायणोऽप्येवम् ।

¶द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

†द्राह्यायणे वेति विशेषः, तेनैतेन सूत्रद्वयं कृतम् ।

सर्वत्र सत्रेष्वग्रहणꣳ शाण्डिल्यः* ॥ १९ ॥

सर्वासु सुब्रह्मण्यासु सत्रेषु नामग्राहो न स्यादित्येवं शाण्डिल्य आचार्य्यो मन्यते ॥ १९ ॥

ऊर्द्ध्वमतिरात्रादाग्नेय्येका द्वितीये पञ्चदशरात्रे* ॥२०॥

प्रायणीयादतिरात्रादूर्द्ध्वमेका सुब्रह्मण्या आग्नेयी भवेत्। द्वितीये पञ्चदशरात्रे ॥ २० ॥

द्वे वा¶ ॥ २१ ॥

द्वे वा सुब्रह्मण्ये आग्नेय्यौ भवेयाताम् ॥ २१ ॥

सर्वाः प्राक् त्रिकद्रुकेभ्यस्तृतीये* ॥ २२ ॥

तृतीये पञ्चदशरात्रे आतिथ्यासंस्थानकालाया आरभ्य याः सुब्रह्मण्या ताः सर्वा आग्नेय्यः स्युः। प्राक् त्रिकद्रुकेभ्यः ॥ २२ ॥

कौण्डपायिनतापश्चितयोर्द्वादशाहे सुत्येति विदित्वा परिमाणाह्वानं धानञ्जय्यः* ॥ २३ ॥

कौण्डपायिनामयनं कौण्डपायिनं, तापश्चितामयनं तापश्चितं, कौण्डपायिनञ्च तापश्चितञ्च कौण्डपायिनतापश्चिते तयोः कौण्डपायिनतापश्चितयोः। द्वादशाहे सुत्येति ज्ञात्वा परिमाणाह्वानं धानञ्जय्यो मन्यते। एतावदहे सुत्यामिति यावदहे स्यादित्युक्तम् ॥२३॥

---

*द्राह्यायणोऽप्येवम्।

¶द्राह्यायणे चेति विशेषः।

सुत्यामागच्छेतीतराः* ॥ २४ ॥

अथ या अन्याः प्राक् परिमाणाक्कामाम्नानात् तासु को विधिरत्रोच्यते, सुत्यामागच्छेतीतरा इति ॥ २४ ॥

ऊर्द्ध्वं चातिरात्रात् प्रथमस्य सारस्वतस्य प्राक् श्वः सुत्यायाः* ॥ २५ ॥

व्यत्ययम् कौण्डपायिनसारस्वतयोरिष्व्ययनेषु सुत्यावदिति। तत्र सारस्वते ऊर्द्ध्वमतिरात्रात् प्रायणीयाद्याः सुब्रह्मण्याः तासु च सुत्यामिति ब्रूयात्। प्राक् श्वः सुत्यायाः। तत्र प्रथमस्य सारस्वतस्येति प्रथमग्रहणमतिरिच्यते। यावता मन्त्रलक्ष्ये एवोत्तरे। अथ प्रथमग्रहणं क्रियते कौण्डपायिनार्थम्। कौण्डपायिनेऽपि तत्र पक्षे तस्योपसदं न उपवसथ्यकर्म कृत्वातिरात्रमुपेयुरिति। तस्मादूर्द्ध्वमतिरात्रात् सुत्यामागच्छेति ब्रूयात् प्राक् श्वः सुत्याया इति ॥२५॥

कौण्डपायिनसारस्वतयोरिष्व्ययनेषु सुत्यावच्छाण्डिल्यः*॥२६॥

शाण्डिल्य आचार्यो मन्यते। अहरादन्तयोराक्रयेदिति ॥ २६ ॥

तथाग्निहोत्रमासे तथाग्निहोत्रमासे* ॥ २७ ॥

कौण्डपायिनसारस्वतयोरिष्व्ययनेषु यथाग्निहोत्रमासे कौण्डपायिनेन प्रकारेणेत्यर्थः ॥ २७ ॥

इति प्रथमस्य चतुर्थी कण्डिका।

---

* माध्यायनोऽप्येवम्।

अथ पञ्चमी कण्डिका ।

सर्वत्रानादेशे परिसामानि प्रस्तोता गायेत् स्वाध्यायवत् स्वासु* ॥ १ ॥

उक्तं प्रहिणुयात् प्रस्तावात्सुब्रह्मण्यां पुरस्तात् कर्मभ्य इति तत्र सुब्रह्मण्यायमुक्तम् अनन्तरं प्रस्तावीयं वक्तव्यम् । तत्र क्रमभेदस्य प्रयोजनमुक्तम् सुब्रह्मण्यप्रकरणेन साम्प्रतं प्रस्तावकर्म विवक्षुरिदं सूत्रमारभते, सर्वत्रानादेश इति । तत्र पदानि सर्वत्र अनादेशे परि सामानि प्रस्तोता गायेत् स्वाध्यायवत् स्वासु । तत्र सर्वशब्दो निरवशेषवाची । सर्वनिर्दिष्टविषयो निर्देशः सर्वक्रतुष्वित्यर्थः । अनादेश इति आदेशादन्यत्र, आदेशः यथा अथ महाव्रते इति त्रिरुद्गाता गायेदिति । परिसामानीति कर्मनिर्देशः, परिच्छिन्नकर्तृकाणि सामानि परिसामानि परिगतलिङ्गानि वा सामानि परिसामान्युच्यन्ते । प्रस्तोतेति कर्तृनिर्देशः । गायेदिति क्रिया निर्दिश्यते । स्वाध्यायवदिति धर्मउच्यते स्वाध्यायेन तुल्यः क्रिया स्वाध्यायवत् स्वासु, स्वासित्याश्रयविशेषो नियम्यते । स्वासस्वासु च साम्नां द्वयी वृत्तिर्दृश्यते सर्वपदानामर्थः । अथ समुदायार्थः । यान्येतानि तार्क्ष्यसामादीनि उदंशीयान्तानि दीक्षणीयादिषूदवसानीयान्तेषु कर्मसूपदिश्यन्ते एतानि सर्वाणि प्रस्तोतृकर्मेति । अत्रोच्यते, सर्वत्रग्रहणं तावन्न कर्त्तव्यम्, किमर्थम् अक्रियमाणेऽपि सर्वत्रग्रहणे प्रत्येष्यत एतत् यथा सर्वत्रेति

---

* द्राह्यायणोऽप्येवम् ।

कथम् विध्यपदेशे सर्वक्रत्वधिकार इति वचनात् अधिकारनिवृत्त्यर्थमिति चेत्, दीक्षानुपूर्वेण दीक्षितानामिति तन्न । कस्मात्, प्रकरणसमाप्तेः । न प्रकृतमतिदेशा बाधन्त इति न्यायोपदेशात् । अनादेश इत्येतदपि शक्यमवक्तुम् । कस्मात्, सामान्यविशेषाभ्यां प्रवृत्तिविधीनाम् । अत्र सामान्यो विधिरौत्सर्गिकः तस्यापवादो विशेषः, तत्र औत्सर्गिको विधिरपवादेन बाध्यते । तस्माच्छक्यमवक्तुमनादेश इति । परिसामानीति च वक्तव्यम् । कस्मात्, सर्वथा संव्यवहारार्था संज्ञा शास्त्रे भवन्ति । न चानया संज्ञया कश्च संव्यवहारोऽस्ति । प्रस्तोतृग्रहणमप्यतिरिच्यत एव । कस्मात् प्रकृतत्वात् प्रतिहर्त्र्यात् प्रस्तोतृसुब्रह्मण्यौ इति, तत्संयोगादुद्गातृप्रसङ्ग इति चेत्, तन्न कस्मात् असम्भवात् स्वयं व्रजेत् कथ औपवसथ्येति । प्रतिहर्त्ता स्यादिति चेत्, तदपि न प्रकृतहानिः स्यात् अप्रकृतप्रत्ययश्च । प्रकृतो हि प्रस्तोता, अप्रकृतो हि प्रतिहर्त्ता । अथ गायेदित्येतदपि अतिरिच्यत एव साम चोद्यमानं गानादन्यत्र किं भजते । स्वाध्यायवदित्येतदपि न वक्तव्यम् । अगृह्यमाणविशेषं साम स्वाध्यायवदेव भवति, विशेषस्तु यथा मन्द्रमिवाद्य [illegible] तारतरमथ तारतममिति अनिरुक्तं गानं स्वबलानुरूपम् । अन्तेणाक्षरेण प्रतिष्ठापयेतादृग्यमिति । स्यादित्येतदपि अवक्तव्यम् । कस्मात्, अन्याभिरसंयोगात् । अविशेषणादित्यस्मात् [illegible] उद्धृत्वा कथमस्यासु क्रियते अन्याभिरसंयोगः । गायत्र्यन्तकसंयोगात्, विश्वेदेवा इति वसिष्ठस्यैव सूक्तम् । तथा संयामीनि सर्वत्राभिरूपतराण्यसंयामीनि न इति । एतेषां प्रतिपदमुद्धार उक्तः ।

अथवोच्यते, प्रयोजनमुच्यताम्, अत्राह यदुच्यते, नारब्धव्यानीत्यारब्धव्यानीति ब्रूमः। कस्मादारम्भे विधिप्रसिद्धेः। यत्तावदुच्यते, सर्वत्र शब्दोऽतिरिच्यतइति तन्न, न केवलमस्मिञ्छास्त्रे अयमादेशः, अन्यत्रापि यथा अध्वर्युर्वित्याहोद्गातेति। यत् सर्वत्रेति न ब्रूयाद्विस्वरूपाणां गानं प्रस्तोतुः स्यात् परिसामशब्दत्वात् अत आह सर्वत्रानादेश इति। आदेशग्रहणमुक्तार्थं प्रथमसूत्रएव विकल्पसमुच्चयप्रत्याम्नायप्रसङ्गो माभूदिति। यदुच्यते परिसामानीति न वक्तव्यम् शास्त्रे संव्यवहाराभावादित्यत्र ब्रूमः। अस्ति संज्ञासंव्यवहारः शास्त्रेण च सम्पदतिरेको यथान्यैः परिसामभिरिति यदुच्यते। प्रकृतत्वात् प्रस्तोतृग्रहणं न कर्त्तव्यमित्यत्र ब्रूमः। कर्त्तव्यमेव कस्मान्नियमार्थम्। व्याहृतिसामानुगापनञ्च प्रस्तोतुः स्यादिति व्याहृतिसामानि गापयेद् यजमानमित्येकश्रुतिविधानात् उद्गातुर्माभूदिति। अथ यदुक्तं गायेदिति न वक्तव्यम् साम चोद्यमानं गानक्रियां भजतइत्यत्र ब्रूमः। आख्यातप्रचोदनान्नास्ति दोषः। दृश्यन्ते हि वाक्यान्युभयोर्वेदलोकयोः उच्यमानार्थानि गम्यमानार्थानि अर्थगृहीतानि च। उच्यमानार्थानां तावद् यथाद्वारं दीयतामिति यथा गम्यमानार्थद्वारमिति दीयताम् अपिधीयतां वेति, यथा शीर्षमिति संग्रहकारेण तथा वेदे ज्योतिष्टोमेनातिरात्रेणर्द्धिकामो यजेतेति। अथैष गौरथैष आयुरिति इदमाख्यातप्रयोगे न दोषः। अथ यदुक्तं गायत्ररथन्तरवद्विशेषग्रहणाभावात् कथमन्यधर्मं भजतइति तस्मात् स्वाध्यायवदिति न वक्तव्यमित्यत्र ब्रूमः। परिसाम्नां प्रयोगे संशयः किमनुद्धृतान्यनुसंस्तोभानि

क्रियन्ताम् अथोदुहितान्येवोपसंहृतस्तोभानि च क्रियन्ताम् केन वा स्वरेण क्रियन्तामिति एष संशयः। आम्नाये कानिचिदनुसंहृतस्तोभानि पठ्यन्ते कानिचिदाद्यन्तस्तुभ्यानि केषुचित् पादश्लिष्टा गीतिः पठ्यते। तत्रायं संशयः, किं तेनैव धर्म्मेण युज्यतामथान्यो धर्म इति। तथोदूहः किं प्राप्नोति चतुर्थोदात्ततमात् स्वराद्व्यन्तरानुदूहति प्रागुपायाश्च चेत् समानपुरुषवचने तृतीयप्रभृतीनामुदात्ततमः कश्चित् स्वरो भवति, तमुदूह इत्याचष्टे। तथाच यज्ञे क्रियत इति च शार्ङ्गादीनामुदूहः प्राप्नोति एतस्मिन् प्राप्ते स्वाध्यायवदित्याह। अतः शार्ङ्गादिषु उदूहो निवर्त्तते अनुपदस्य स्तोभानुसंहारः स्यादित्येष स्वाध्यायधर्मः। ननु यद्येष स्वाध्यायधर्मः, किमर्थमुद्धृतस्तोभानि पठ्यन्ते। उच्यते, लाघवार्थमत्राह, यदि लाघवार्थमुद्धारः, किमर्थमन्यान्यनुपदस्तुभ्यानीति उच्यते स्तोभस्थानस्वरनिदर्शनार्थम्। कथं पुनरेतद्गम्यते यथा निदर्शनार्थम् न नियमार्थमिति निदर्शनार्थमेवेति गम्यताम् स्मृतिलेशात्, स्मृतिर्नाम अमूल आगमः पारम्पर्यमित्यर्थः। एवं विशिष्टाः स्मरन्ति। पदाय पदाय स्तोभा अनुवर्त्तन्त इति लिङ्गम्, यदिहकारेणाभ्यस्तमिति च, कथं पुनरेतद्गम्यते, यथा निदर्शनार्थमिदमिति। पदाय पदाय स्तोभा अनुवर्त्तन्त इति रात्रोप्न एवायं विधिरिति, नेति ब्रूमहे। नित्यानुवादोऽयन्तस्याहावोहाव इति स्तोभांस्तोभति विश्वं समन्विणं दह विश्वं समन्विणं दहेति। तद्धा अतिच्छन्दःसु भवति यद्वै सप्तपदासु भवति तस्य त्रिर्निधनमिति अवगम्यते नित्यानुवाद इति। पाञ्चविध्योपपत्तेस्तानुसंहारः कर्त्तव्य इति।

अनुसंहारे क्रियमाणे विधावशाकल्यो भवति उपासनविधानाच्च साम्नां क्रियेष्यते । उपासनमन्त्रोऽपि तावल्लोकेषु पञ्चविधं सामोपासीतेति । कुतस्त्विदानीं प्रयोगः, तथाच

स्मृतेर्लिङ्गाच्च शास्त्राच्च प्रयोगे याज्ञिको विधिः ।
पाञ्चविध्योपपत्तेश्च स्तोभसंहार इष्यते ।
उद्धारः पुनराचार्यैः स्वाध्याये लाघवार्थिभिः ।
प्रोक्तस्तस्मिन् प्रतिष्ठा च संहारस्तेन चेष्यते ॥ इति ।

एवं च श्रूयते । नग्नानि ह वा एतानि सामानि भवन्ति यान्यस्तुभानीति । तस्मात्स्तोभाननुसंहरान्ते साम्नामनग्नताया इति अत आह, स्वाध्यायवदिति, एष स्वाध्यायधर्मः, ये पुनर्वर्णयन्ति नानुसंहार इति तेषामेते दोषाः प्रसज्यन्ते अथ यदुक्तमन्याभिरसंयोग औत्पत्तिकः संयोगादिति । अतः स्वास्विति न वक्तव्यमित्यत्र ब्रूमः । आभिरूप्यमलिङ्गम् अस्ति राणायनीयके तु शुक्रचन्द्रयोः* ऋगन्तरं इह च ऋगन्तरं गृह्यते नियुत्वान्वाय वागह्यत्राह, गोरमन्वतीति । अतो नियमार्थमाह, स्वास्विति एवमेतेषां पदानामारम्भकारणानि सर्वाणि, तस्मादयुक्तः सूत्रारम्भ इति ॥ १ ॥

तृचापत्तीनि तृचेषु त्रिरितराणि† ॥ २ ॥

यानि तृचापत्तीनि स्युस्तानि तृचेषु कर्त्तव्यानीति । यान्यतृचापत्तीनि तानि त्रिः कर्त्तव्यानि । स्वास्वित्येतदनुवर्त्तते ॥ २ ॥

---

* श्रेयोः श्रेयान्तरम् इति स० पु० तथा का० पु० पाठः ।

† दाह्यायणोऽप्येवम् ।

अन्तरेण चात्वालोत्करौ सञ्चरः सर्वत्रानादेशे* ॥ ३ ॥

चात्वालोत्करयोरन्तरा सञ्चरः सञ्चरन्ति तेनेति सञ्चरः । सर्वत्र सर्वकर्मणामित्यर्थः । अनादेशे आदेशादन्यत्र सर्वत्र । ग्रहणं तस्मादेतेनैव प्रसुते प्रपद्येतैतेन निष्क्रामेदिति । सुत्यायामेव केवलं माभूदिति ॥ ३ ॥

तदाप्लानं तीर्थं* ॥ ४ ॥

य एष सञ्चर उक्तः, चात्वालोत्करावन्तरेण तस्याप्लानमिति संव्यवहारिकी संज्ञा । आप्लानेन स गच्छेदिति तीर्थमिति संव्यवहारिकमेव, तरन्ति तेनेति तीर्थम् संव्यवहारः दक्षिणं नयेयुस्तीर्थेन ॥ ४ ॥

अग्नौ चीयमाने पश्चिमेन पुच्छङ्गत्वा दक्षिणेऽपिकक्षे तिष्ठेद्यत्र वोपदध्युः* ॥ ५ ॥

अग्नौ चीयमाने अग्निचित्यायामिदं कर्मोपदिश्यते । चीयमान इति वर्त्तमानकालोपदेशः । पश्चिमेन पुच्छं गत्वा । पश्चिमेनेति दिङ्नियमः । गत्वेति क्रियोपदेशः । उपविश्य दक्षिणेऽपि कक्षे तिष्ठेदिति । स यावदङ्गानि निवर्त्त्यन्ते, लक्षितश्चाग्निचित्रं भवति तस्मिन् काल इत्यर्थः । अपिकक्षो वक्ष्यते यत्र वोपदध्युः यस्मिन्वा

---

* द्राह्यायणेऽप्येवम् ।

देशे अध्वर्यव उपधानं कुर्युः तस्मिन् वा तिष्ठेदिति देशोपदेशः। सोद्गाता ॥ ५ ॥

पश्चिमेन पक्षावपिकक्षौ* ॥ ६ ॥

उक्तं दक्षिणेऽपि कक्षे तिष्ठेदिति, कः पुनः प्रदेशोऽपिकक्षसंज्ञ इति अत्राह, पश्चिमेन पक्षाविति ॥ ६ ॥

पूर्वेणोपवल्लयौ* ॥ ७ ॥

पूर्वेण पक्षयोः उपवल्लयौ वक्ष्यति, उत्तरे चोपवल्ले स्वं हृदयमालभ्य प्रजापतिर्हृदयमिति ॥ ७ ॥

पुष्करपलाशउपधीयमाने हिरण्मये पुरुषे स्वयमातृण्णासु च शर्करासु व्याहृतिसामानि गायेद् यजमानꣳ सत्यं पुरुषो भूर्भुवः स्वरित्येतासु पृथक्* ॥ ८ ॥

उक्तमग्नौ चीयमाने पश्चिमेन पुच्छं गत्वा दक्षिणेऽपि कक्षे तिष्ठेदिति। अथ तस्मिन्देशेऽवस्थितस्य किं कर्मेत्यत्रोच्यते पुष्करपलाशउपधीयमान इति, पुष्करं पद्मं तस्य पत्रं पलाशं तस्मिन्नुपधीयमाने हिरण्मये पुरुषे सुवर्णमये पुरुषे तस्मिन्नुपधीयमाने। स्वयमातृण्णासु च शर्करासु स्वभावभिन्नास्वित्यर्थः। औत्पत्तिकानि न कृत्रिमाणि यासां शर्कराणां छिद्राणि ताः स्वयमातृण्णाः तासु चोप-

---

*द्राह्यायणेऽप्येवम्।

धीयमानासु व्याहृतिसामानि व्याहृतिषु भवानि सामानि व्याहृतिसामानि तानि गापयेद् यजमानम् सत्यं पुरुषो भूर्भुवस्स्वरित्येतासु एतानि सामानि यथोद्दिष्टानि पृथग्गानेत्यर्थः एकस्मिन्नेकस्मिन्नुपधीयमाने एकमेकं साम गापयेत् प्रतिद्रव्यमानुपूर्वेण ॥ ८ ॥

तेषाꣳ स्थाने स्वयं चिन्वान ऋतनिधनमाज्यदोहं पुरुषव्रतमेकानुगानं रथन्तरं वामदेव्यं बृहदिति* ॥९॥

तेषां व्याहृतिसाम्नां स्थाने स्वयञ्चिन्वान इति मान्त्रिको विधिरुपदिश्यते तस्मिन्नेतानि सामानि यथोद्दिष्टानि भवन्ति ॥९॥

रथन्तरप्रभृतीनि विकल्पन्ते लोकसामभिरावृत्तैः* ॥१०॥

रथन्तरं वामदेव्यं बृहदिति विकल्पन्ते लोकसामभिः प्रतिलोमैः सह ॥ १० ॥

सञ्चितमग्निं दक्षिणेन गत्वाग्न आयूꣳषीति प्रत्यङ्मुखस्तिष्ठञ्छिरसि गायत्रं गायेन्निरुक्तम* ॥ ११ ॥

चीयमाने गानमुक्तम् इदानीं सञ्चितगानमुच्यते, सञ्चितमग्निं समस्तश्चितः सञ्चितः अथाग्निग्रहणं किमर्थम् अग्नौ चीयमान इति प्रकृतोऽग्निः, अत्रोच्यते, शिरआदीन्यङ्गानि प्रकृतानि तेषु गानमुपदिश्यते सोऽयमाचार्योऽग्निग्रहणं करोति. कथम्, अविद्य-

---

* द्राह्यायणेऽप्येवम् ।

मानेऽवकृष्यापि गानं प्रवर्त्तत एव यथा चक्रचितमभि[illegible]श्चिन्वीते-त्यादिषु [illegible] वाजसनेयके च अनाविष्कृतचित्याग्नौ दक्षिणेन [illegible] [illegible] [illegible] अग्न आयूंषीत्येतस्यामृचि शिरसः समीपे प्रत्यङ्मुखः तिष्ठन् त्रिगायत्रं गायेदित्युक्तम् प्रत्यङ्मुख इति प्राङ्मुखकर्म[illegible]नादेशादिति प्रकृतं निरुक्तम् एतद्वै गायत्रस्य क्रूरं यन्निरुक्तमिति । निरुक्तता अनुपपद्यमाना सेह वचनादारभ्यते निरुक्तमिति [illegible] [illegible] भवति ॥ ११ ॥

प्रत्याव्रज्य रथन्तरं दक्षिणे पक्षउदङ्मुखः पश्चाद्वा प्राङ्मुखः* ॥ १२ ॥

प्रत्याव्रज्य येनैव गतस्तेनैवाव्रज्य दक्षिणे पक्षे उदङ्मुखः तिष्ठन् रथन्तरं गायेत् पश्चाद्वा पक्षस्य तिष्ठन् प्राङ्मुखो गायेत् ॥ १२ ॥

पश्चिमेन पुच्छं गत्वा बृहदुत्तरे पक्षे दक्षिणामुखः पश्चाद्वा प्राङ्मुखः* ॥ १३ ॥

पश्चिमेन पुच्छं गत्वा उत्तरस्य पक्षस्य समीपे दक्षिणामुखस्तिष्ठन् बृहद्गायेत् पश्चिमेन वा प्रदेशे तिष्ठन् प्राङ्मुखो गायेत् ऊर्द्धता ॥१३॥

प्रत्याव्रज्य यज्ञायज्ञीयं पुच्छे संवत्सरस्वेदेनः सौत्यो वा* ॥ १४ ॥

---

* द्राह्यायणेऽप्येवम्

प्रत्याव्रज्य पुच्छस्य पश्चिमे प्रदेशे तिष्ठन् यज्ञायज्ञीयं गायेदिति अत्र प्राङ्मुखता सिद्धा प्राङ्मुखकरणस्यानादेशादिति यदि संवत्सरो दैक्षः सौत्यो वा भवति ॥ १४ ॥

ऋतुष्ठा यज्ञायज्ञीयमन्यत्र* ॥ १५ ॥

यदि दैक्षः सौत्यो वा संवत्सरो न भवति ततः ऋतुष्ठा यज्ञायज्ञीयं गायेत् ॥ १५ ॥

वामदेव्यं दक्षिणेऽपि कक्षे तिष्ठन् गायेत् प्रजापतिहृदयमुत्तरे* ॥ १६ ॥

प्रजापतिहृदयमुत्तरेऽपि कक्षे तिष्ठन् गायेत् ॥ १६ ॥

एतानि गौतम उत्तरेणाग्निं गत्वा* ॥ १७ ॥

एतानि यथाविहितानि तेनैव क्रमेण गायेदिति गौतम आचार्यो मन्यते अयं तु विशेषः उत्तरेणाग्निं गत्वा ॥ १७ ॥

एतान्येव प्रदक्षिणं प्रत्यन्ताद्धानस्याप्तो यज्ञायज्ञीयं पुच्छे प्रजापतिहृदयस्थाने च वामदेव्यम्" ॥ १८ ॥

एतान्येव यथाविहितानि प्रदक्षिणं गायेत् प्रतिपक्षस्थानं

---

*द्राह्यायणेऽप्येवम् ।

" द्राह्यायणेऽप्येवम् । किन्तु तेनैतेन सूत्रत्रयं कृतम् ।

यावदन्तर्दति अयं तु विशेषः यज्ञायज्ञीयं पुच्छे प्रजापतिहृदयस्थाने च वामदेव्यमिति ॥ १८ ॥

दक्षिणेनाग्निं गत्वा गौतमीये व्यत्ययं ये पक्षयोः शाण्डिल्यः* ॥ १९ ॥

शाण्डिल्यो मन्यते एष एव गौतमोक्तः कल्पो भवति अयं तु विशेषः दक्षिणेनाग्निं गत्वा ये च पक्षयोः सामनी विहिते ते च व्यत्ययेन भवतः अन्योन्यस्थानापत्तिर्व्यत्ययः ॥ १९ ॥

शिरसि च गीत्वोत्तरे पक्षे* ॥ २० ॥

अयं च विशेषः शाण्डिल्यो मन्यते, शिरसि च गीत्वा तत उत्तरे पक्षे गेयमिति ॥ २० ॥

यथागीतमितराणि* ॥ २१ ॥

गतं सू. ॥ २१ ॥

उत्तरे चापल्लये स्वं हृदयमालभ्य प्रजापतिहृदयमन्वर्धपदे गौतमः† ॥ २२ ॥

उत्तरे चापल्लये स्वं हृदयमालभ्य प्रजापतेर्हृदयम् चशब्दः

---

* द्राह्यायणोऽप्येवम्।

† द्राह्यायणोऽप्येवम्। किन्तु तेनैतेन सूत्रद्वयं कृतम्।

आणिडस्यमन्त्रानुकर्षणार्थः स्वं हृदयमिति स्वशब्दः क्रियते अग्नेरङ्गानि प्रत्यङ्गानि प्रकृतानि अतः स्वशब्दं करोति । अध्वर्युपथे गीतम् येन पथा अध्वर्युरग्निमारोहति तस्मिंश्चैतम् ॥ २२ ॥

इति प्रथमस्य पञ्चमी कण्डिका ।

अथ षष्ठी कण्डिका ।

प्रवर्ग्यवत्युत्तरेण सम्राडासन्दीं गत्वा पश्चात्तिष्ठन्नध्वर्युप्रेषितस्त्वग्नायिरिति गायेत् पदाय पदाय स्तोभेन* ॥ १ ॥

आग्निकं सामगानमुक्तं पुष्करपलाश उपधीयमान इत्यत आरभ्य अध्वर्युपथे गीतमित्येवमन्तम् इदानीं प्रवर्ग्यकर्मोच्यते नन्विहाह प्रवर्ग्यवतीति । अत्रोच्यते, किमर्थं पुनरिदं भिन्नक्रमादादिश्यते तार्क्ष्यसामादीन्येव तावदादेष्टव्यानि आसन्नतमानि । अत्राह, एतानि तावदवश्यम्भावित्वात् पूर्वमादिश्यन्ते, तार्क्ष्यसामादीनि पुनः कामतः प्रयुज्यन्ते, तस्मादेषामवश्यम्भावित्वाद्भिन्नक्रम आदेशः प्रवर्ग्योऽस्मिन्नस्तीति प्रवर्ग्यवत्तस्मिन् प्रवर्ग्यवति कर्मणि उत्तरेण सम्राडासन्दीं गत्वा सम्राड् घर्मः स यस्यां निधीयते सा सम्राडासन्दी तस्याः पश्चिम प्रदेशे तिष्ठन्नध्वर्युप्रेषितस्त्वग्नायिरिति गायेत् प्रैषं नाम संस्कारार्थं सम्बोधनं प्रेषितः सन् त्वग्नायिरिति एतत् साम गायेत गानञ्चायमा

---

*द्राह्यायणेऽप्येवम् । केवलं तेनैतेन सूत्रद्वयं कृतम् ।

चार्य्यप्रवृत्तिः सर्वत्राय प्रकरणादौ गानग्रहणं करोति। पदाय पदाय स्तोभेत्, अनुपदं स्तोभमनुसंहरेत्। अथेदं किमर्थमारभ्यते, यथासिद्धमेतत् स्वाध्यायवदिति। अत्रोच्यते, आधिकारिकमिदं सूत्रं प्रकरणादौ प्रकारप्रदर्शनार्थो विधिः ॥ १ ॥

निधनायैव स्तोभीं वाचं विसृजेत्* ॥ २ ॥

इह पूर्वः स्तोभः अनुपायः उत्तरः सोपायः अत्र किं पूर्वस्यानुसंहारः उत उत्तरस्येति, एतस्मिन् संशये सति आचार्य्य आह, निधनायैव स्तोभीं वाचं विसृजेदिति। निधनायैव अर्थे सोपायः स्तोभः कार्य्यो न पदायेत्यर्थः एवशब्दादन्येष्वप्येवमेव ॥ २ ॥

उपग्रहप्रभृतीनि स्वरयन्त उपेयुर्यं धर्म उपयुक्ताः स्युः* ॥३॥

उपग्रहादीनि निधनानि स्वरयन्त उपेयुः स्वरेण सह ब्रूयुः एकार उपग्रहः अथ किमर्थमारभ्यते, उपायपरत्वादेकारस्य कथं वा न निधनाङ्गं स्यादेकारः, उच्यते, एकादशाक्षरनिधनो भवतीति सर्वश्रुतेरनिधनाङ्गमपि कल्प्येतोपग्रहः अतो नियमार्थमाहोपग्रहप्रभृतीनि ॥ ३ ॥

पत्नी च* ॥ ४ ॥

निधनमुपेयात् ॥ ४ ॥

---

*द्राह्यायणोऽप्येवम्

एवं मध्ये* ॥ ५ ॥

योऽयं विधिरुक्तः स एवमेव मध्ये कार्यः ॥ ५ ॥

प्राप्य चाहवनीयायतनम्* ॥ ६ ॥

प्राप्य चाहवनीयस्याग्नेः स्थानं एवमेव सामगानम् अनेनैव प्रकारेणेत्यर्थः ॥ ६ ॥

परिषिच्यमानेऽप उपस्पृश्य वार्षाहरम्* ॥ ७ ॥

परिषिच्यमाने घर्मे ऽप उपस्पृश्य वार्षाहरं साम गायेत ॥ ७ ॥

इष्टाहोत्रीयं परिषिक्ते* ॥ ८ ॥

परिषिक्ते घर्मे इष्टाहोत्रीयं साम गायेत ॥ ८ ॥

तस्य सर्वे निधनमुपेयुः* ॥ ९ ॥

तस्येष्टाहोत्रीयस्य सर्वे ऋत्विजो निधनं ब्रूयुः ॥ ९ ॥

दीपं चेद्घर्मपात्राणि ह्वरेयुर्नाकाद्रेन [illegible] ॥ १० ॥

दीपश्चेद्घर्मपात्राणि ह्वरेयुः [illegible] प्रतीत गायेदेव साम यत्परि[illegible] [illegible] प्रायश्चित्तापः

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणे विशेषोऽस्ति ।

आभिरूप्यात् कर्त्तव्यानीत्येके* ॥ १६ ॥

आभिरूप्यं नाम लिङ्गं तस्मादाभिरूप्यात्कर्त्तव्यानि श्रुतिर्नास्ति एवमेके आचार्या ब्रुवते ॥ १६ ॥

न वा कुर्यात्* ॥ १७ ॥

न वा कुर्यादश्रुतत्वात् अपरे ब्रुवते अग्नीषोमीयसवनीययोरपि पशुबन्धयोराभिरूप्यात् सामगानप्रसङ्ग इति इष्टिषु च सामिधेन्यनुवचनीयादिषु तस्मान्न कुर्यात् ॥ १७ ॥

स्वे वा यज्ञे कुर्यादित्येके* ॥ १८ ॥

भिन्नेष्वाचार्य्यमतेषु अलोपो लोपान्यायतर इति न्यायात्कर्त्तव्यानि, यदप्युक्तमाभिरूप्यप्रसङ्गात् सोमाङ्गभूतेषु हविर्यज्ञेषु सामगानप्रसङ्ग इति तन्नोपपद्यते वक्ष्यति हि यावद्वचनं कर्मयोग इति, अपरे ब्रुवते गणः सामान्युत्तराण्याभिरूप्याद्वा क्रियेरन् यानि वा विधास्यन्ते तार्क्ष्यसामादीनि ॥ १८ ॥

दीक्षणीयायां तार्क्ष्यसामनी गायेत्त्यमूष्वित्येते* ॥ १९ ॥

दीक्षणीयायामिष्टौ तार्क्ष्यसामनी गायेत् त्यमूष्वित्येते अत्रोच्यते किमन्यान्यपि तार्क्ष्यसामानि सन्ति येन त्वकूग्रहणं कृतमिति अत्रोच्यते, सन्त्यन्यान्यपि तार्क्ष्यसामानि शाखान्तरेषु नास्वेकं

---

* द्राह्यायणीऽप्येवम् ।

ब्राह्मणे ब्राह्मणानुसारी च कल्पः तस्मात्सत्स्वपि अन्येषु तार्क्ष्यसामसु सूक्तग्रहणं विशेषणार्थं कृतमिति तथा तार्क्ष्यः सुपर्ण इति पर्यायशब्दात् सौपर्णान्यपि गृह्येरन् एवं माभूदतो विशेषणार्थं कृतमिति अत्रोच्यते, यदि विशेषणार्थं सूक्तग्रहणं कृतमिति पुनर्निर्देशः किमर्थमेते इति अत्रोच्यते, नैवायं सामनिर्देश इति किन्तर्हि, कालनिर्देशोऽयं एते आदते आगते आमन्त्र हविषि गानं स्यादिति ये पुनः सामनिर्देशं वर्णयन्ति तेषां नियमार्थो निर्देशः तत्र ह्याग्नावैष्णवं हविः तार्क्ष्यसाम्नोऽस्याभिरूप्यं नास्ति तदसत्यस्याभिरूप्ये अपि नाम्नामानं शब्दमालोच्य स्वस्त्ययइत्येतत आहितदिति किञ्चान्यत् यदाप्यनेकं हविः दीक्षणीयायां भवति तदाप्येते एव ॥ १९ ॥

प्रायणीयायां प्रवद्भार्गवं* ॥ २० ॥

प्रायणीयायामिष्टौ प्रवद्भार्गवं साम गायेदिति वाक्यशेषः ॥ २० ॥

उदयनीयायामुद्वत्* ॥ २१ ॥

उदयनीयायामिष्टौ उद्वद्भार्गवं गायेत् प्रकृतस्य भार्गवशब्दस्यानुकर्षणार्थः उदयनीयायामक्रमे सामोपदेशो लाघवार्थः ॥ २१ ॥

आतिथ्यायां गायत्रीसामौशनम्* ॥ २२ ॥

आतिथ्यायामिष्टौ औशनङ्गायेत् गायत्रीसाम बहून्यौशनानि सन्ति अतो विशेषणार्थं गायत्रीग्रहणम् ॥ २२ ॥

---

*द्राह्यायणे नास्ति

अञ्जन्ति घर्मं तत्र शार्ङ्गम्* ॥ २३ ॥

अञ्जन्तीत्यत्र बहुवचनं कालार्थं यस्मिन् काले महावीरं आज्येनाध्वर्युरनक्ति तत्र गायेत् त्रिः शेषाणि यानि वक्ष्यन्ते तानि सर्वाणि सकृत् सकृद्गायेत् आरूढवदाङ्गिरसञ्च त्रिर्गायेत् कथमेतद्गम्यते, उच्यते. तत्र शब्दसामर्थ्यात् द्राह्यायणके हि पाठे शार्ङ्गारूढवदाङ्गिरसे त्रिरभ्यस्येदितराणि पराचा तथा च होता लिङ्गोपपत्तिस्त्रैवमिति तदिह तत्र शब्देनागार्ग्यौ गुरुकरणेन ज्ञापयति, असमासगुरुक्रमभेदः पुनर्वचनमर्थापत्तयः शेषमर्थमभिवर्त्तयन्तीति ॥ १३ ॥

रजतजातरूपे उपदधाति तच्छुक्रचन्द्रे* ॥ २४ ॥

राजतसौवर्णयोः शतमानयोरुपधानं करोत्यध्वर्युर्यस्मिन् काले तत्र शुक्रचन्द्रे गायेत्, राजते शुक्रं सौवर्णे चन्द्रम् तच्छब्देनानयोः कर्मणोर्नानाकालत्वमपि ज्ञापयति ॥ २४ ॥

अभीन्धन्ति तद्घर्मस्य तन्वौ* ॥ २५ ॥

रोचनार्थं घर्मन्धनैरभीन्धन्ते अध्वर्यवः घर्मस्य तन्वौ गायेत् ॥२५॥

रुचितं प्राङ्क्स्तद्घर्मस्य वा रोचनमिन्द्रस्य वा* ॥ २६ ॥

---

* लाट्यायनेऽप्येवम् ।

यदा रुचितं घर्मं प्राहुरध्वर्यवः रुचितो घर्म इति तद्घर्मस्य वा रोचनं गायेत् इन्द्रस्य वा तत् ॥ २६ ॥

धेनू उपसृजन्ति तद्धेनु* ॥ २७ ॥

गौर्धेनुरजा च धेनुस्ते वत्सबर्कराभ्यां मिश्रयन्ति तत्र धेनुं गायेत्, सकृदेव न प्रतिद्रव्यम् ॥ २७ ॥

तस्य देवतायै सोपायं स्तोभमाहरेन्न पादायेति गौतमः¶ ॥ २८ ॥

तस्य साम्नः देवतार्थं सोपायं स्तोभं कुर्य्यात् न पादार्थमुपायम् एवमाह गौतमः ॥ २८ ॥

उत्तमं पादं पुनरभ्यस्येद्यथा पञ्च निधने वामदेव्ये† ॥२९॥

धेनोरुभयं पादं पुनरभ्यस्येत् कथम्, यथा पञ्च निधने वामदेव्ये तेन प्रकारेणेत्यर्थः ॥ २९ ॥

पय आहरन्ति तत्पयः* ॥ ३० ॥

धेनू दुग्ध्वा तत्पय आहरन्ति तत्र पयो गायेत् सकृदेव तद्ग्रहणसामर्थ्यात् ॥ ३० ॥

---

* द्राह्यायणेऽप्येवम्।

¶ द्राह्यायणे विशेषोऽस्ति।

† द्राह्यायणेऽप्येवं किन्तु कर्दविषयं विशेषोऽस्ति।

आसिञ्चन्ति तत्सिन्धुसामा त्वा विशन्त्विति* ॥ ३१ ॥

तत्र घर्मे ततायश्चासिञ्चन्ति तत्र सिन्धुसाम गायेत् सकृदेव ॥३१॥

शफाभ्यां परिगृह्णन्ति तद्वसिष्ठस्य शफौ* ॥ ३२ ॥

शफाभ्यां परिग्रहाभ्यां महावीरं परिगृह्णन्ति तत्र वसिष्ठस्य शफौ गायेत् ॥ २२ ॥

ह्रियमाणे व्रतपक्षौ* ॥ ३३ ॥

होमार्थं घर्मे ह्रियमाणे व्रतपक्षौ गायेत्, अत्र तद्ग्रहणं न करोति अविप्रतिपत्तिः सर्वेषामध्वर्यूणामतास्मिन्नानुपूर्वे ॥ २३ ॥

हुतेऽश्विनोर्व्रते अहोरात्रयोर्वा* ॥ ३४ ॥

हुते घर्मेऽश्विनोर्व्रते गायेत्, अहोरात्रयोर्वा व्रते गायेत् विकल्पः. अपरे विनिवेशं वर्णयन्ति, अतिरात्रे अहोरात्रयोर्व्रते अन्यत्राश्विनोर्व्रते ॥ २४ ॥

रौहिणाभ्यां पुरोडाशाभ्यां चरन्ति तद्राजनं रौहिणके* ॥ ३५ ॥

रौहिणसंज्ञौ पुरोडाशावेककपालौ तयोर्हूयमानयोराजनरौहिणके गायेत् एकत्र राजनमन्यत्र रौहिणकं यथाकालम् ॥ ३५ ॥

---

*द्राह्यायणे [illegible] एवम

परिघर्म्यँ सम्राडासन्द्याँ समारोपयन्ति तदारूढवदाङ्गिरसमित एत इति स्वर्णिधनं[*] ॥ ३६ ॥

महावीरधचित्रशफादिद्रव्यं घर्मोपकरणं घर्मम् तदासन्द्या समारोपयन्ति, तदारूढवदाङ्गिरसं गायेत्, इतएत तदारूढवदिति स्वर्णिधनं स्वःशब्दं निधनं कुर्य्यात्, त्रय्या विद्यया संस्कृतोऽभिष्टुतोऽनुशस्तस्य घर्मो भवत्यत आह ॥ ३६ ॥

ऋङ्मयो यजुर्मयः साममयो घर्मो भवतीति ह्याह[¶] ॥३७॥

एवं ब्राह्मणमाह, ऋङ्मयो यजुर्मयः साममयो घर्मो भवतीति ॥३७॥

अग्निं प्रणयन्ति तत्राग्नेर्व्रतम[*] ॥ ३८ ॥

यस्मिन् कालेऽध्वर्यवोऽग्निं प्रणयन्ति, तत्राग्नेर्व्रतं गायेत्, तत्र शब्दादत्र केचिदनुव्रजनम् इच्छन्ति ॥ ३८ ॥

अग्नीषोमौ तत्रोभयोर्व्रते[*] ॥ ३९ ॥

अग्नेश्च सोमस्य अग्नीषोमौ तयोः प्रणीयमानयोरुभयोर्व्रते गायेदनुलिङ्गम् अग्निप्रणयनवत् ॥ ३९ ॥

सुत्यायां यज्ञमारथ्यन्तरञ्च[†] ॥ ४० ॥

---

[*] द्राह्यायणेऽप्येवम् ।

[¶] द्राह्यायणे एतदत्र नास्ति ।

[†] द्राह्यायणे विशेषोऽस्ति ।

सुत्यायां यज्ञसारथि गायेत्, अहरहरित्यहर्गणार्थम् अहर्गणेषु हि सकृत्कृते कृतः शास्त्रार्थ इति कृत्वा प्रथमादह्न ऊर्द्ध्वमुत्तरेष्वहःसु संशयः स्यात् अतोऽहरहरित्याह कः पुनरस्य यज्ञसारथिनो देशः कालश्चेति अत्रोच्यते, प्राक्प्रातरनुवाकोपाकरणादाग्नीध्रीये आग्नीध्रीये सत्यार्थमाज्येषु प्रणीयमानेषु प्रणयनाधिकारसामर्थ्यात् प्रणयन्तीति प्रकृतं तस्य पश्चात्तिष्ठन् गायेदित्यर्थः ॥ ४० ॥

सत्रे सत्रस्यर्द्धि* ॥ ४१ ॥

अहरहः सत्रे सत्रस्यर्द्धिं गायेत्, यज्ञसारथिनः प्रत्याम्नायः ॥ ४१ ॥

उक्षा चेदनूबन्ध्य औक्ष्णो रन्ध्रे* ॥ ४२ ॥

यदि उक्षा अनूबन्ध्या भवति, तदा औक्ष्णे रन्ध्रे गायेत्, उक्षा सेचनसमर्थो गौः ॥ ४२ ॥

ऋषभ आर्षभं* ॥ ४३ ॥

ऋषभे अनूबन्ध्ये आर्षभं गायेत्, ऋषभः अनड्वान् भूत्वा पुनर्वृषभत्वमापन्नः ॥ ४३ ॥

उन्नते चैककुभं* ॥ ४४ ॥

उन्नतेऽनूबन्ध्ये चैककुभं गायेत्, अत्यर्थं ककुभं सुमहान् भूत उन्नत इत्यर्थः ॥ ४४ ॥

---

*दाह्यायणोऽप्येवम् ।

वशायां वाशं* ॥ ४५ ॥

वशा नाम वन्ध्या तस्यामनूबन्ध्यायां वाशं गायेत् ॥ ४५ ॥

अज आजिगं* ॥ ४६ ॥

अजेऽनूबन्ध्ये आजिगं गायेत् ॥ ४६ ॥

मेष और्णायवं* ॥ ४७ ॥

मेषेऽनूबन्ध्ये और्णायवं गायेत ॥ ४७ ॥

पयस्यायां स्वरं पयोनिधनं* ॥ ४८ ॥

पयस्यायामिष्टौ अनूबन्ध्यस्थाने क्रियमाणायां स्वरम्पयोनिधनं गायेत् ॥ ४८ ॥

उदवसानीयायामुद्वंशीयं* ॥ ४९ ॥

उदवसानीयायामिष्टौ उद्वंशीयं गायेत ॥ ४९ ॥

उपक्रम्य समापयेदाऋक्तोरपवर्गात्* ॥ ५० ॥

सामगानमुक्तं गणः सामान्यनुक्रमादभिक्रयादित्यत आरभ्य एतदुपक्रम्य समापयेत आऋक्समाप्तेरित्यर्थः, का पुनरियमाशङ्का यदारभ्य न समाप्नुयादिति अत्रोच्यते, गणः सामान्यन्तरणीत्युक्तम्

---

* आम्नायशोऽप्येवम्।

सर्व्वेषां क्रिया वेति एकेषामध्वर्यूणां प्रथमयज्ञेन प्रवृञ्ज्यादित्यारभ्यते. तत्र शार्ङ्गादीनामसम्भवात् तार्क्ष्यसामादीनामप्यक्रिया प्राप्नोति. अत आचार्य्यो यत्नमारभते. अप्रवर्ग्येऽपि तार्क्ष्यसामादीन्यारभ्य समापयेत् कस्मात् अलोपो लोपाज्ज्यायतर इत्येतस्मात् अन्यच्च न केवलमेतदर्थं सूत्रमारभ्यते, किन्तु सर्व्वकर्म्माणि उपक्रम्य समापयेदाक्रतोरपवर्गात्, यथा शास्त्रेऽस्मिन्नाचार्य्याणां विप्रतिपत्तयो दृश्यन्ते तस्यां ते श्वः सुत्या गौतमस्य नार्मेधान्त इत्येकेऽद्यः सुत्या शाण्डिल्यस्यानाक्रानं धानञ्जप्य इति एवमादिषु येनैवाचार्य्यमतेनोपक्रमेत तेनैव समापयेत् विधिसंरम्भान्न कुर्य्यात् तथा उद्गातारो ब्रह्मा सुब्रह्मण्यश्च उपक्रम्य स्वानि कर्म्माणि समापयेरन् अन्योन्यस्य कर्म न कुर्य्यात् तथा काम्ये कर्म्मणि प्रारब्धे अर्द्धसमाप्त एव यदि न फलावाप्तिः स्यान्न च तत्फलमेवास्मै कामावाप्तिरिति कृत्वा विरमेत् लोकवत्. निदानम् इह हि अवशिष्यत एवार्थः तदर्थं समापयेत् कः पुनरसावर्थः नित्यं स्वदृश. ब्रवीति तथाप्याङ्गरुद्धार्थ एव खल्वयम्भवति अनुखल्वर्थः श्रुत्यर्था अन्वव्यन्तीति निदानं स्वर्गे नित्ये दृष्टं प्रायश्चित्तिरिति तथा यजमाननिमित्तायामापदि प्राप्तायां न तत्कालमेव विरमेत् एकेषां विधिः दीक्षितश्चेदन्तराकार्य्यो म्रियेत मरणान्तं कर्मेति तत्तथा सति समापयेदेव उक्तं हि अतोऽन्य आहारात् गतप्राणावस्था भवन्ति तस्मात्ते प्रेतेऽपि समापयितव्या इति तथा विश्वरूपा ब्राह्मणे असितमृगाह स्म वै पुरा कश्यपा उद्गायन्तीत्यधिकृत्याह, प्राह्णे वा अहं यज्ञं समस्थापयं यथा तु वै ग्रामस्य यातस्य शीर्षं वा भग्नं वाऽनुसमावच्छेदेवं वा अहं यज्ञस्यातोऽधिकरिष्यामीति

एवमर्थं गृहीत्वा नार्द्धसमाप्तौ विरमेत् समापयेदेव तथा यथैवोपक्रमेत् तथा समापयेत् कुतः पुनरियमाशङ्का अन्यमारभ्यान्यं समापयेदिति क्वापि च दर्शनात् क्वापि वनेनात्यजाभ्यः दृढराचाय जामदग्न्याय दीने ब्रह्मचारिणं सम्पन्नं कुलीनं परिहृत्य तस्य त्रिवृत्पञ्चदशसहरूपेतं बभूवार्थतरस्तमर्थं साधयित्वा प्रत्याजगाम समापयमिदमहर्यागन्निशीर्णमतेत्यायुरतिरात्रमुपदधे। ब्रह्मचारिणश्च परिहारेण यज्ञप्रत्यवहारेण च स कृता बभूव यस्त्वेतौ दोषौ परिहरेत्स कृतः स्यादित्यतस्माद्दोषादाशङ्कमानः आचार्य्य आह उपक्रम्य समापयेदाकर्तोरपवर्गादिति ॥ ५ ॥

इति प्रथमस्य षष्ठी कण्डिका

अथ सप्तमी कण्डिका ।

औदुम्बरीमुच्छ्रयिष्यन् पूर्वो देवयजनं गच्छेद्दक्षिणा तस्येदस्यावसथः स्यात्* ॥ १ ॥

प्राक्सोमीयमुक्तं परिसामगानं साम्प्रतमौद्गात्रमुच्यते तत्रेदं प्रथममौद्गात्रम् औदुम्बरीकर्म उदुम्बरस्य विकारः औदुम्बरी अत्र

---

* द्राह्यायणे। पूर्व्वम .

थवो वा तामौदुम्बरीमुच्छ्रयिष्यन् उद्गाता पूर्वेण देवयजनस्य गच्छेत् उच्छ्रयिष्यन्निति भविष्यत्कालनिर्देशः देवयजनमुपलक्षणं यदि दक्षिणतो देवयजनस्यावसथः स्यादुद्गातुः अत्रोच्यते कथं पुनरेतद्गम्यते यथौदुम्बरीमुच्छ्रयणमुद्गातुर्भवति न तत्प्राप्नोति प्रस्तोत्रधिकृतत्वात् अत्रोच्यते, परिसामगानं प्रस्तोतुरधिकृतं तत्परिसमाप्तम् अनन्तरमौद्गात्रं विवक्षितं श्रुतिश्च प्रजापतिर्देवेभ्य ऊर्जं व्यभजदित्येवमधिकृत्याह, यदुद्गातौदुम्बरीं प्रथमेन कर्मणान्वारभते स्वयैव तद्देवतयात्मानमार्त्विज्याय वृणीतेतामुच्छ्रयतीति एवं कृत्वा सूत्रकार आह, एकश्रुतिविधानान्मन्त्रान् कर्माणि चोद्गातैव कुर्य्यादनादेश इति अत औदुम्बर्य्युच्छ्रयणमुद्गातुः सिद्धम् ॥ १ ॥

उत्तरेण यद्यन्यतः* ॥ २ ॥

यदि अन्यस्यान्दिश्यावसथः स्यादुद्गातुः प्राच्यामुदीच्यां प्रतीच्यां वा तत उत्तरेण देवयजनस्य गच्छेत् ॥ २ ॥

पूर्वौ सदसोद्वार्यौ अभ्रावन्तरेण प्रपद्याग्रेणौदुम्बरीं गत्वोदङ्मुखस्तिष्ठन्नध्वर्युणा सहोच्छ्रयेत् द्युतानस्त्वेति[¶] ॥ ३ ॥

पूर्वौ सदसः द्वार्यौ द्वारार्थौ अभ्रौ अभ्रः खातः तयो अभ्रयोरन्तरा प्रपद्य औदुम्बरीं प्रागग्रां विन्यस्तां पूर्वेण गत्वा उदङ्मुखस्तिष्ठन् उद-

---

*द्राह्यायणेऽप्येवम् ।

[¶] द्राह्यायणे विशेषोऽस्ति ।

मुखग्रहणं प्राङ्मुखकरणस्थानादेश इति परिभाषितं तन्माभूदिति तिष्ठन्नित्यूर्द्धता विधीयते। अध्वर्युणा सह उच्छ्रयेत् अध्वर्युणा सहोच्छ्रयणं कुर्यात् द्युता नस्त्वेत्येतदादिना मन्त्रेण ॥ ३ ॥

आयोरिति श्वभ्रेव दध्यात्* ॥ ४ ॥

आयोरित्येतदादिना मन्त्रेण श्वभ्रेव दध्यात् प्रक्षिपेत् ॥ ४ ॥

अवधाय जपेन्नमः समुद्राय नमः समुद्रस्य चक्षसे। मामा यूनर्वाहासीदूर्गस्यूर्ज्जोदा ऊर्ज्जम्मे देह्यूर्जं मे देह्यन्नं मे देह्यन्नं मे धेहीति* ॥ ५ ॥

औदुम्बरीमवधाय श्वभ्रे एतद्यजुर्जपेत् यथा सूचितं अर्थवादेतिकरणमध्यपतितमेतद्यजुः तत्सूत्रकारेणोद्धृता अर्थवादेतिकरणं कृत्स्नमेव दर्शितम् ॥ ५ ॥

तान्न विसृजेदावच्छादनात्* ॥ ६ ॥

तामौदुम्बरीन्न विसृजेत् आ अवच्छादनात् अवच्छादनं छदिषोऽध्यूहनं तामिति निर्द्देशः औदुम्बर्य्यां भग्नापहृतातदग्धप्ररूढ़ायामन्यामाहृत्य तथैवावृतोच्छ्रयेत् अत्रापि तान्न विसृजेदावच्छादनात् ॥ ६ ॥

---

*द्राह्यायणोऽप्येवम्।

अध्वर्य्युणाभिक्रान्तायां जुहुयात् तस्यैवावृतान्तरेण विशाखे घृतेन द्यावापृथिवी आप्रीणाथाꣳ स्वाहेति पूर्वां* ।७।

यत्राध्वर्य्युणाभिक्रान्ता स्यादौदुम्बरी तथाभिजुहुयात् तस्यैवाध्वर्य्योरावृता आवृन परिक्रमणेन विधिनेत्यर्थः अन्तरेण विशाखे तस्यैवावृतेत्युक्तं यद्यप्येतस्मिन् देशेऽध्वर्य्युर्न जुहुयात् तथाप्युद्गाता विशाखयोरन्तराले जुहुयात् यथा सूचितेन मन्त्रेण पूर्वां ॥ ७ ॥

प्रजापतये स्वाहेत्युत्तरां* ॥ ८ ॥

अनेन मन्त्रेणोत्तरामाहुतिं जुहुयात् अनेन यथोक्तेन स्वाहाकारान्तेन मन्त्रेणोत्तरामाहुतिं जुहुयात् ॥ ८ ॥

अन्यतरां वा स्वाहाकारद्वितीयां यथा भूमिमाज्यं प्राप्स्यतीति* ॥ ९ ॥

अनयोराहुत्योरन्यतरां वा जुहुयात् स्वाहाकारद्वितीयां तथा च जुहुयादस्कन्नमविच्छिद्यमानम् आज्यं यथा भूमिङ्गमिष्यतीति ॥ ९ ॥

---

* द्राह्यायणेऽप्येवम्, किन्तु छेदविषये विशेषोऽस्ति ।

अधस्ताद्विशाखस्य परिगृह्य जपेद्दिवि देवां दृꣳह मयि प्रजामिति ॥ १० ॥

विशाखस्याधस्तादुभाभ्यां पाणिभ्यां गृहीत्वा यथासूचितं यजुर्जपेत् ॥ १० ॥

अन्तरिक्षे वयाꣳसि दृꣳह मयि पशूनिति मध्ये* ॥११॥

एतद्यजुर्जपेत्, एतत् यजुर्यथा सूचितं मध्य औदुम्बरीं परिगृह्य जपेत् ॥ ११ ॥

पृथिव्या मध्योषधीर्दृꣳह मयि सजातानिति मूले* ॥ १२ ॥

मूले परिगृह्य औदुम्बरीमेतद्यजुर्जपेत् यथासूचितञ्च ॥ १२ ॥

ऊर्द्ध्वं होमाद्याजमानं धानञ्जप्यः* ॥ १३ ॥

ऊर्द्ध्वं होमात् कर्म्मोपदिश्यते तद्याजमानं धानञ्जप्य इच्छति कस्मात् आत्मवाचकत्वात् मन्त्राणां मयि प्रजां मयि पशून् मयि सजातानिति ॥ १३ ॥

स्वयमिति गौतमशाण्डिल्यौ* ॥ १४ ॥

उद्गाता स्वयमिति गौतमशाण्डिल्यावाचार्यावाहतुः कस्मात् यां वै काञ्चर्त्विग आशिषमाशासते यजमानस्यैव भति ॥ १४ ॥

---

*द्राह्यायणेऽप्येवम्।

अवच्छाद्यमानायां दिव्यं छद्मसि सन्ततिनाम विश्वजनस्य छाया नमस्तेऽस्तु मामा हिꣳसीरिति* ॥ १५ ॥

अवच्छाद्यमानायामौदुम्बर्यामेतद्यजुर्यथासूचितं जपेत् ॥१५॥

दक्षिणेन श्वभ्रान् गत्वा परौ द्वार्यावन्तरेण प्रपद्यैतत् कुर्य्यादिति शाण्डिल्यः* ॥ १६ ॥

अग्रेणौदुम्बरीं गत्वेत्यत आरभ्य आसमाप्तेरेतत्कर्म दक्षिणेम मदोनिमित्तान् स्थूणा श्वभ्रान् गत्वा अपरौ द्वारार्थौ यौ श्वभ्रावन्तरेण प्रविश्य कुर्य्यात् इति शाण्डिल्य आचार्य्य आह ॥ १६ ॥

उत्तरेणेति धानञ्जय्यः* ॥ १७ ॥

यदेतत्कर्मोक्तं शाण्डिल्यीयं एतदेव सर्वं धानञ्जय्य आचार्य्य इच्छति अयं विशेषः उत्तरेण श्वभ्राम् गत्वा ॥ १७ ॥

गौतमीयमितरत्* ॥ १८ ॥

यत्तु प्रथमं विधानमुक्तं तद्गौतमाचार्य्यसंकीर्त्तितं किमर्थमेतदुक्तमित्येतत् उक्तमुपक्रम्य समापयेदाक्रतोरपवर्गादित्येतदर्थम् ॥१८॥

---

* द्राह्यायणेऽप्येवम्।

यथेतन्निष्क्रामेत्* ॥ १९ ॥

यथागतं यथाप्रविष्टं तथैव निष्क्रामेत् यदि पूर्वया यद्यपरया तामेव निष्क्रामेत् ॥ १८ ॥

इति प्रथमस्य सप्तमी कण्डिका।

अथ अष्टमी कण्डिका।

यूपमुच्छ्रीयमाणमनुमन्त्रयेरन्नृमण ऊर्द्ध्वभरसन्त्वेति* ॥१॥

औदुम्बर्य्युच्छ्रयणमुक्तम् अनन्तरं यूपानुमन्त्रणं विवक्षितं तद्विवक्षुराचार्य्य इदं सूत्रमारभते यूपमुच्छ्रीयमाणमिति। यूपमिति कर्मणि द्वितीया यूपशब्दः प्रतीतपदार्थकः उच्छ्रीयमाणमिति वर्त्तमानकालोपदेशः अनुमन्त्रयेरन्निति क्रियोपदेशः नृमण ऊर्द्ध्वभर सन्त्वेति मन्त्रोपदेशः, अत्रोच्यते. यूपमिति न कर्त्तव्यं कस्मात् उच्छ्रीयमाणशब्दसामर्थ्यादेव ज्ञास्यते मन्त्रलिङ्गाच्च नृमण ऊर्द्ध्वेति ऊर्द्ध्वो हि यूप उच्यते, कर्त्तव्यं यूपग्रहणं अक्रियमाणे औदुम्बर्य्या अनुमन्त्रणं प्रतीयात् उच्छ्रायणामौदुम्बरीसंयोगात् अतो यूपग्रहणमवश्यं कर्त्तव्यं, ननु नृमण इति सिद्धं आदेश ऊर्द्ध्वभर-

---

* आश्वलायनेऽप्येवम्।

मन्त्वित्येतेषामक्षराणां किमर्थं ग्रहणमिति अत्रोच्यते, वक्ष्यति हि एतान्येवोहस्थानानीति ॥ १ ॥

एतान्येवोहस्थानानि यावन्तः स्युः* ॥ २ ॥

एतान्येव पदानि ऊहस्य स्थानानि यावन्तो यूपाः स्युः, ननु एतान्येवोहस्थानानीति सिद्धे यावन्तः स्युरिति किमर्थमारभ्यते, ब्रवीति एकैकस्मिन् यूपे अनुमन्त्रणं माभूदग्निष्ठ एव सर्वेषां संस्कारार्थमूहः स्यादिति कस्मात् भिन्नकालत्वात् यूपोच्छ्रयणस्य नमण ऊर्द्ध्वभराः मन्त्रो युष्मानूर्द्ध्वभरा दृशेयं ॥ २

यत्र तिष्ठन्त उच्छ्रीयमाणं पश्येयुरिति शाण्डिल्यः* ॥३॥

यस्मिन्देशे स्थिता उच्छ्रीयमाणं पश्येयुरुद्गातारः तत्रैव स्थिता अनुमन्त्रयेरन्निति शाण्डिल्य आचार्य्य आह, कस्मात् उच्छ्रीयमाणमिति वर्त्तमानकालनियमात् ॥ २ ॥

अन्तर्वेद्येवेति धानञ्जप्यो न बहिर्वेदि यजुरवकल्पत इति[¶] ॥ ४ ॥

---

*द्राह्यायणोऽप्येवम् ।

[¶] द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

अन्तर्वेद्येव तिष्ठन्तोऽनुमन्त्रयेरन्निति धानञ्जय्य आचार्य्य आह कस्मात् बहिर्वेदि प्रयुज्यमानं यजुः असमर्थं भवतीति श्रुतेः न केवलमसमर्थं भवतीति अवकल्पते च असम्यक् च कल्पते न सम्यक् प्रयुक्तं भवतीत्यर्थः ॥ ४ ॥

विश्वरूपाणां गानं यजमानेनोक्तः प्रत्याचक्षीत * ॥ ५ ॥

प्रस्तोता गेयं परिमाणत्वादिति चेत् अत्रोच्यते, नैवं कुतः श्रुतेः आध्वर्य्यविन्याहोद्गाता मास्म मे निवृत्य होत्रे प्रातरनुवाकमुपाकरादिति सोऽध्वर्युः प्राह आहृता व्रजति स पूर्वया द्वारा हविर्द्धाने प्रपद्यते स दक्षिणस्य हविर्द्धानस्योत्तरं चक्रमभ्युपाश्रयमाण उदङ्ङासीनो विश्वरूपा गायतीति तदेतद्गानं प्रति यजमानेनोक्तः सकारणं प्रत्याचक्षीत न गास्यामि कस्मात् ग्रहाभावात् शस्त्राभावात् सम्पदतिरेकदर्शनादिति ॥ ५ ॥

गायेति चेदेव ब्रूयान्न सामनामन्त्र्य प्रातरनुवाकमुपाकुर्या इत्यध्वर्युं ब्रूयात् † ॥ ६ ॥

यदि यजमानः गायेदिति ब्रूयात्पुनः तदा उद्गाताध्वर्युं ब्रूयात् सामपृष्ट्वा प्रातरनुवाकस्योपाकरणं माकार्षीरिति अथैव

---

* द्राह्यायणे विशेषोऽस्ति ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

शब्दः कस्माद्गायेति चेदेवेति अवधारणार्थः, ब्रूयादेवेति यथैव सकारणं प्रत्याख्यानं कृत उद्गात्रा तथैव सकारणं यजमानो ब्रूयाद्गायेति उक्तं ग्रहाभावाच्छस्त्राभावाच्च सम्पदतिरेकदर्शनान्न गास्यामीत्यत्र ब्रवीमि समतीतयोर्ग्रहः प्रातरनुवाकः शस्त्रं न च सम्पदतिरेकः यथान्यं परिसामभिरिति ॥ ६ ॥

एवमुक्तः सन्नुद्गाता किं कुर्यादित्युच्यते ।

होतारं प्रातरनुवाकायोपविष्टं पूर्वेण गत्वा यजमानस्य पूर्वया द्वारा प्रपद्यान्तरेण हविर्द्धाने पूर्वेण चक्रे उदङ्मुख उपविशेत् तूष्णीम् * ॥ ७ ॥

होतारं प्रातरनुवाकशंसनार्थमुपविष्टं पूर्वेण गत्वा यजमानस्य तेनैव गत्वा पूर्वया द्वारा हविर्धानं प्रविश्य हविर्द्धानयोरनसोरन्तराले चक्रयोः पूर्वे प्रदेशे उदङ्मुख उपविशेदुद्गाता तूष्णीं, ननु किं मन्त्रेणोपवेशनं प्रकृतं येन तूष्णीमाह, उच्यते बहिष्पवमानप्रकरणे यजुषोपवेशनं विधायाह, एवं सर्वस्तोत्रेष्वासीरन्निति तदिह स्तोत्रसंशब्दनात् सर्वशब्दसामर्थ्यात्प्राप्नोति तन्निवृत्त्यर्थमाह तूष्णीमिति स्तोत्रसंशब्दनन्तु अध्वर्योः किं स्तुतं स्तोत्रमिति ॥ ७ ॥

---

*द्राह्यायणोऽप्येवम् ।

पुरस्ताद् यजमानः प्रत्यङ्मुखः * ॥ ८ ॥

उद्गातुः पूर्वे प्रदेशे यजमानः प्रत्यङ्मुख उपविशेत् तूष्णीम्॥ ८ ॥

युञ्जे वाचं शतपदीङ्गायेत् सहस्रवर्त्तनि गायत्रं त्रैष्टुभं जगद् विश्वा रूपाणि सम्भृता देवा ओकांसि चक्रिर इत्येतस्यां पङ्क्तौ त्रिगायत्रं गायेदिति धानञ्जप्यः स्वाध्यायस्वरेण मनसैव यजमान उपस्वरेत् † ॥ ९ ॥

युञ्जे वाचमित्येतदाद्यायां यथासूचितायां पंक्तौ त्रिगायत्रं गायेदिति धानञ्जप्य आचार्य्य आह स्वाध्यायस्वरेण मन्द्रेणेति अपरे ब्रुवते येन स्वरेण नित्यः स्वाध्यायः क्रियते तेनेति मध्यमेनेति अथैतस्यामिति किमर्थं छन्दोऽन्तरमेतस्यामेव पंक्तौ स्यादिति उत्तरसूत्रोक्तमित्यर्थः ॥ ९ ॥

त्रिषु त्रिषु पदेषु गायेदिति गौतमः पूर्वं पूर्वमतिसृजन् * ॥ १० ॥

---

*द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम्

एतस्यामेव पंक्तौ त्रिषु त्रिषु पदेषु गायत्रं गायेत् पूर्वं पूर्वं विसृजन् युञ्जे वाचं शतपदीङ्गायेत् सहस्रवर्त्तनि गायत्रं त्रैष्टुभञ्जगदिति प्रथमङ्गायेत्, सहस्रवर्त्तनि गायत्रं त्रैष्टुभञ्जगद् विश्वा रूपाणि सम्भृतेति द्वितीयं, गायत्रं त्रैष्टुभञ्जगद् विश्वा रूपाणि सम्भृता देवा ओकांसि चक्रिरइति तृतीयम् ॥ १० ॥

प्रगाथकारं वा * ॥ ११ ॥

एतस्यामेव पंक्तौ प्रगाथकारं वा गायत्रं गायेत् प्रगाथकारं कृत्वा प्रयोगस्तु युञ्जे वाचं शतपदीङ्गायेत् सहस्रवर्त्तनि गायत्रं त्रैष्टुभं जगदिति प्रथमं गायेत्, गायत्रं त्रैष्टुभ जगद्गायत्रं त्रैष्टुभञ्जगद् विश्वा रूपाणि सम्भृतेति द्वितीयं, विश्वा रूपाणि सम्भृता विश्वा रूपाणि सम्भृता देवा ओकांसि चक्रिरइति तृतीयम् ॥ ११ ॥

गीत्वा यथार्थं स्यात * ॥ १२ ॥

एतेषां कल्पानामन्यतमेन गीत्वा यथा प्रयोजनं गच्छेत् ॥ १२ ॥

विश्वरूपास्वेद्गायेत ज्योतींष्यपि गायेत * ॥ १३ ॥

यदि विश्वरूपा गायेत् ततः ज्योतींष्यपि गायेत्, ननु किमर्थं

---

* छात्ता। मआटपाठम्

पुनरयं यज्ञार्थः क्रियते चेदिति यदा विश्वरूपाणां गानं यत्नेन प्रतिष्ठापितमिति उच्यते, अयं ह्याचार्यो वक्ष्यति एतं परिक्रमं सर्वक्रतुषु विद्यादिति, तद् विश्वरूपाणां गानं सर्वक्रतुषु प्राप्नोति सोऽयमाचार्यः ज्योतिष्टोमादन्यत्र विश्वरूपाणां गानं ज्ञापयति कथं एतत् विश्वरूपाणां गानं ज्योतिष्टोम एव प्रवर्त्तते नान्यत्रेति ननु वक्ष्यत्याचार्यो न चान्यत्र विश्वरूपात् ज्योतिष्टोमादिति सत्यमेतत् अस्य तु पुनर्वचनस्य तत्रैव प्रयोजनं वक्ष्यामः कः पुनर्ज्योतिर्गानस्य कालो गानविधिश्चेति ॥ १३ ॥

परिहिते प्रातरनुवाके यो नप्त्रीयं नाम सूक्तं पुरा तस्मा होतारमारमयित्वाग्रयणस्य वानुहिङ्कारं पवित्रं धारयन्नास्तावं वा प्राप्य स्तोमयोगादग्निर्ज्योतिर्ज्योतिरग्निरिन्द्रो ज्योतिर्ज्योतिरिन्द्रः सूर्यो ज्योतिर्ज्योतिः सूर्य इत्येतेषु पदेषु त्रिस्त्रिरेकैकमभ्यासं मनसा गायत्रं गायेत्* ॥ १४ ॥

परिहिते समाप्ते प्रातरनुवाके परिधानीयायां शस्त्रायामित्यर्थः अपोनप्त्रीयं नाम शस्त्रं तस्मात्पूर्वं पुरा विरम्यतां तावदित्युक्त्वा आग्रयणस्य वानुहिङ्कारं आग्रयणो ग्रहः तस्य गृहीतस्य हिंकारस्य पश्चात् आग्रयणं गृह्णन्नध्वर्युर्हिंकरोति पवित्रं धारयन् पवित्रं विगृह्णन्ति हस्तकार्य्यमेव तद् यज्ञस्य क्रियत इति आस्तावं वा

---

* द्राह्यायणेनैतेन सूत्रचतुष्टयं कृतम

प्राप्य पुरा बहिष्पवमानस्य स्तोमयोगात् एतत्कालत्रयमुपदिष्टं ज्योतिर्गानस्य विकल्पेन अग्निर्ज्योतिर्ज्योतिरग्निरित्येतेषु यथासञ्चितेषु पदेषु एकैकस्मिन् पदे त्रिस्त्रिर्गायत्रं गायेत् अभ्यस्याभ्यस्य अभ्यासम् । १४ ॥

तानि नान्यत्र विश्वरूपाभ्यः* ॥ १५ ॥

यदा तावदुक्तं विश्वरूपाश्चेद्गायेत् ज्योतींष्यपि गायेदिति तत्किमिदं पुनस्तानि नान्यत्र विश्वरूपाभ्य इति अत्रोच्यते, यत्कालत्रयमुक्तं ज्योतिर्गानस्य तदिह पुनर्नियम्यते विश्वरूपगानानन्तरमेव ज्योतिर्गानं स्यादिति अपरे पुनर्वर्णयन्ति एतद् विश्वरूपाणां गानं य एवंविद्यजमानस्तस्यैव स्यात् नाविदुष इति कस्मात् अनियमाद् विश्वरूपाश्चेद्गायेदिति तेन विदुष एव यजमानस्य विश्वरूपाणां गानन्नाविदुष इति उक्तं एवं हि यजमान उपस्वरेदिति एतद् विदुषा यजमानस्योपस्वरणं सम्भवति तानीति तानि ज्योतींषि लोकद्वारीयोपसरणादीनि चैवं विदुष एव यजमानस्य प्रवर्त्तेरन्नानेनं विदुष इति ॥ १५ ॥

न चान्यत्र विश्वरूपात् ज्योतिष्टोमात ज्योतिष्टोमात्* ॥१६॥

---

* [illegible]

ज्योतिष्टोमादन्यत्र विश्वरूपाणां गानं न स्यात् ननु यदा तावत् पूर्वमेव ज्ञापितं ज्योतिष्टोमएव विश्वरूपाणां गानं नान्यत्रेति तत् किमिदं पुनरुच्यते, न चान्यत्र विश्वरूपात् ज्योतिष्टोमादिति उच्यते. ज्योतिष्टोमेपि यावदाहारं न स्यादिति प्रथमाहार एव भवेदिति सहचरणानि ह्येतानि विश्वरूपाश्च ज्योतींषि न ज्योतिष्टोमश्चेति ॥२६॥

इति प्रथमस्याष्टमी कण्डिका।

अथ नवमी कण्डिका।

युगपत्कर्मसु सर्वषूद्गातुर्दक्षिणमनु बाहुं प्रस्तोता सव्यं प्रतिहर्त्ता* ॥ १ ॥

वक्ष्यत्ययमाचार्य्यः होता प्रातरनुवाकमनूच्याभूदुषा इति यदा ब्रूयादथ वेदिमाक्रामेयुर्भूदा शिथिरेति सर्वेषामुद्गातॄणां युगपत् कर्मोच्यते, तस्य को विधिरिति तं विवक्षुराह, युगपत्कर्मस्विति युगपदिति यान्येकवेलायामेतेषु युगपत्कर्मसु सहकर्तृकेषु कर्मसु सर्वेषु सर्वशब्दः निरवशेषवाची उद्गातुर्दक्षिणं बाहुं अनु प्रस्तोता।

---

*द्राह्यायणेऽप्येवम्।

भवेत् सद्य वाक्यं अनु प्रतिहर्त्ता कर्मस्विति बहुवचननिर्देशात्सिद्धे सर्वकर्मत्वे सर्वशब्दः किमर्थमिति चेत् अत्रोच्यते, यदि ह्ययं सर्वशब्दं न कुर्य्याद्व्याक्रमणादिषु कर्मसु तद्विधानं प्रतीयते सोऽस्माचार्य्यः सर्वग्रहणं करोति पूर्वस्याक्रमणाद् यत्कर्म्मोक्तं यूपानुमन्त्रणं तस्मिन्नशेष एव विधिः स्यादिति ॥ १ ॥

होता प्रातरनुवाकमनूच्याभूदुषा इति यदा ब्रूयादथवेदिमाक्रामेयुर्म्रदाशिंशिरेति* ॥ २ ॥

होता प्रातरनुवाकं शस्त्रमनूच्य यदा यस्मिन् काले अभूदुषा इत्येतं शब्दं ब्रूयात् अथानन्तरं वेदिमाक्रामेयुर्म्रदाशिथिरेत्येतदादिना यजुषा अत्र होतृग्रहणं किमर्थमिति चेत् यदा प्रातरनुवाको होतृकर्तृक एव अत्रोच्यते, होतर्य्येव प्रातरनुवाककर्त्तरि कदाचिदपि प्रातरनुवाकस्य कर्त्ता होता न भवति न तस्मिन् कः पुनरस्य विषयः प्रायणीयोऽतिरात्रोतिदीर्घत्रिरात्रस्त्वेकेषामध्वर्यूणामसमाप्त एवाहनि प्रातरनुवाक उपाक्रियते न तत्राक्रमणं कुर्युः होतैव यदा ब्रूयात्तदा कुर्य्युः अतः प्रातरनुवाकग्रहणं होतृग्रहणं च करोति ॥ २ ॥

बहिर्वेद्येतज्जपित्वा मा मा हिंसीरित्येतावनवेति धानञ्जय्यः* ॥ ३ ॥

बहिर्वेद्येतद्यजुर्जपित्वा म्रदाशिथिरेत्येतदादि वेदिरसीति यावत्

---

*शाट्यायनोऽप्येवम्।

सामाहिंसोगित्येतावत्येवाक्रमणं कुर्य्युरिति धानञ्जय्य आचार्यो आह ॥ ३ ॥

सवनमुखेषु च* ॥ ४ ॥

सवनमुखे पवमानमुखे यदाक्रमणं तदेवं प्रकारं भवेत् सवनमुखेषु स्यात. अमूदृषाकाले आज्यानामन्ते निष्क्रम्य पृष्ठानामन्ते च निःसृत्य. चकारो धानञ्जय्यमतानुकर्षणार्थः ॥ ४ ॥

यजुपाहरन्त्वरिति गौतमः¶ ॥ ५ ॥

गौतम आचार्य्य आह, आक्रमणमन्ततः कृतं स्यादिति अथ यद्वक्तं चार्थवदृचमाथे [illegible] कृत. शाण्डिल्य इति कृत्वा [illegible] सकृदाक्रमणं स्यादिति ॥ ५ ॥

सकृदाक्रान्ताविति शाण्डिल्यः ॥ ६ ॥

एकस्मिन् चाक्रमणे सकृदेव स्यादिति शाण्डिल्य आचार्य्य आह ॥ ६ ॥

यावत्त्वाक्रामेयुरित्येके ॥ ७ ॥

---

* द्राह्यायणेऽप्येवम्.

¶ द्राह्यायणेऽप्येवम्. किन्तु [illegible] विशेषोऽस्ति

एके आचार्या ब्रुवते यावत्कृत्वा वेदिमाक्रामेयुः तावत्कृत्वा यजुर्षति अपरे पुनर्विनिवेशं वर्णयन्ति अनुसवनमेकाहेषु यजुषाहरहरिति अहीनेषु सकृत्कृताविति सत्रेषु यावद्वाक्रामेयुरिति श्रौत्तामेषु ॥ ७ ॥

हविर्द्धानं प्रवेक्ष्यमाना वसतीवरीरनुप्रविशेयुः* ॥ ८ ॥

हविर्द्धानं प्रवेक्ष्यमाना अध्वर्य्यवः वसतीवरीसंज्ञा आपः ता अनुप्रविशेयुः तासां पश्चात्प्रविशेयुः ॥ ८ ॥

तस्य रराट्यामालभ्य विष्णोः शिर इति* ॥ ९ ॥

तस्य हविर्धानस्य रराट्यामालभ्य विष्णोः शिर इत्येतद् यजुर्जपेयुः रराट्यानाम द्वारस्योपरिस्थितं मण्डलं ललाटस्थानीयं तस्येति तस्य गात्मनः ॥ ९ ॥

इष ऊर्ज इति प्रविशन्तः† ॥ १० ॥

इष ऊर्ज इत्येतदादि यजुर्हविर्द्धानं प्रविशन्तो जपेयुः अपरे साकाङ्क्षमिद यजुर्वर्णयन्ति इष ऊर्ज आयुषे वर्चसे च प्रविशाम इति ॥ १० ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेन परसूत्रेण सहैकसूत्रं कृतम् ।

अन्तरेणेषे बाहूनवहृत्य पार्ष्णीरनुद्यच्छन्तो युनज्मीति राजानमभिमृशेयुर्यः प्रातःसवनाय* ॥ ११ ॥

दूर्षा च दूर्षा च तयोरिषयोरन्तरेण बाहून् प्रसार्य पार्ष्णीरक्षिपन्तः युनज्मीत्येतेन यजुषा सोमं राजानमभिमृशेयुः यः प्रातःसवनार्थं मुपक्लृप्तः ॥ ११ ॥

अविभक्तश्चेत्सर्वम्[१] ॥ १२ ॥

यद्यविभक्तः स्यात् सर्वमभिमृशेयुः ॥ १२ ॥

नचेत्प्राप्नुयुर्देशेनैव[१] ॥ १३ ॥

यदि न प्राप्नुयुः सोमन्देशेनैव प्रसार्य बाहूनवमृष्टं मन्येयुः अथैव शब्दः किमर्थं, उच्यते, अन्यस्मिन्नप्यभिमर्शने देशेनैव यथा तद्यदानुशंसन् होतापोहिष्ठीया ब्रूयात् तदैनमन्वालभेरन्नपाकृणवाना इति ॥ १३ ॥

प्रस्तोता प्रथमोऽतिसर्पेत्[१] ॥ १४ ॥

साम्प्रतन्तेषां दक्षिणस्य हविर्धानस्य पश्चिमे प्रदेशे क्रम उच्यते तदर्थं प्रस्तोता प्रथमोऽतिसर्पेत् ॥ १४ ॥

---

*शाट्यायनेन पूर्वसूत्रेण सहैकसूत्रं कृतम्।

[१] शाट्यायनोऽप्येवम्

तत उद्गाता* ॥ १५ ॥

ततोऽनन्तरं उद्गाता अतिसर्पेत् ॥ १५ ॥

ततः प्रतिहर्त्ता* ॥ १६ ॥

ततोऽनन्तरं प्रतिहर्त्ता अतिसर्पेत् ततस्तत इत्येष गतिक्रमः सर्वत्र सदःप्रवेशननिर्गमनादिषु कर्मसु ॥ १६ ॥

दक्षिणस्य हविर्द्धानस्य पश्चात् सव्यावृत उपविशेयुर्ऋतस्य सदन इति¶ ॥ १७ ॥

द्वे हविर्द्धानसंज्ञके अनसी तयोर्दक्षिणस्य पश्चिमे प्रदेशे सव्यावृत उपविशेयुः ऋतस्य सदन इत्येतेन यजुषा युगपत्कर्मन्यायेन प्राङ्मुखाः ॥ १७ ॥

पुरस्ताच्चोपरिष्टाच्चर्चः सर्वत्र जपेयुर्यास्तु करिष्यन्तः स्युः¶ ॥ १८ ॥

पुरस्ताच्च उपरिष्टाच्च ऋचः सर्वत्र जपेयुः सर्वत्र स्तोत्रेषु न केवलं

---

* द्राह्यायणेनैताभ्यामेकसूत्रं कृतम् ।

¶ द्राह्यायणोऽप्येवम् ।

बहिष्पवमाने यासु यासु स्तोत्रं करिष्यन्तः स्युः अथ पुरस्ताच्चेति कस्मादुच्यते उपरिष्टाच्चेति वक्तव्ये सर्वथा उपरिष्टाच्छब्दः पुरस्तात् क्रियामपेक्षते सम्बन्धिशब्दादत्रोच्यते स्तोत्रसम्बन्धात्पुरस्ताज्जपोपरिष्टाज्जपयोः सामकल्पितछन्दोविकारः प्राप्नोति अतोऽयमाचार्य्यः पुरस्ताच्चेति ब्रवीति तेन किं नैवर्चः सामिकं धर्ममपेक्षन्ते य एवौत्पत्तिकः स्वाध्यायधर्मस्तेनैव प्रयुज्येरन्निति कथं पुनरेतदनुक्तं गम्यते यदृचः सामिकं छन्दोविकारं गच्छन्तीति उच्यते श्रुतेः श्रुतिर्हि न किष्टं कर्मणा नशदिति बृहत्यः सत्योभ्यारम्भेण जगत्यः एषोऽस्य धारया सुत इति ककुभः सत्योभ्यारम्भेण त्रिष्टुभ इति च अत्र न किष्टं कर्मणा नशदित्येकैव बृहती तथा एषोऽस्य धारयासुत इत्येकैव ककुप् तत्र सत्य। जगत्या विकारे बृहत्यः ककुभः सत्य इति बहुवचनस्यासम्भवः तदेवं दृष्ट्वा सूत्रकारो यत्नमारभते, कथं पुरस्ताज्जपोपरिष्टाज्जपयोरविकारः स्यादिति अत्रोच्यते यद्येवं बृहत्यः सत्यः ककुभः सत्य इति अस्य बहुवचनस्य कथमर्थवत्त्वमिति उच्यते, प्रगाथधर्मं गृहीत्वा ब्रवीति ब्राह्मणं एष प्रगाथानां धर्मः प्रथमच्छन्दः क्रिया तथा प्रगाथेषु प्रथमच्छन्दःक्रिया तद्वादितत्वादिति एवमेतं सामान्यं प्रगाथधर्मं गृहीत्वा ब्राह्मणमाह, बृहत्यः सत्य इत्यादि एवमेतद् ब्राह्मणमर्थवद्भवतीति अथ पुरस्तादुपरिष्टाच्चेति वक्तव्ये पुरस्ताच्छब्दे चशब्दः किमर्थं क्रियते, उच्यते नियमार्थं यद्यपि प्रमादात् कथञ्चित् पुरस्ताज्जपो न क्रियेत उपरिष्टाज्जपः क्रियेतैव न सन्नियोगशिष्टावेतावितिकृत्वा उपरिष्टाज्जपो निवर्त्तते, सन्नियोगशिष्टानामन्यतमापाये उभयोरप्यपाय इति ॥ १८ ॥

अत्र तु बहिष्पवमानस्य* ॥ १९ ॥

अस्मिन् कृतसदनदेशे बहिष्पवमानर्चो जपेयुः अथ अत्रशब्दः किमर्थमिति चेत् उच्यते, अस्मिन्नेव काले उपवेशनानन्तरं जपेयुः न क्षणमपि तिष्ठेयुरिति ॥ १९ ॥

अभिषुते राजन्कृतपात्रमसीति द्रोणकलशमालभ्य वानस्पत्य इति प्रोक्षेयुः[¶] ॥ २० ॥

अभिषुते सोमे राजनि अध्वर्युभिः कृतपात्रमसीत्यनेन यजुषा द्रोणकलशमालभ्योद्गातारः वानस्पत्य इत्यनेन यजुषा प्रोक्षेयुः अधोऽधोबं द्रोणकलशं प्रोक्षन्तीति ॥ २० ॥

दक्षिणे पाणावुद्गाता दशापवित्रं कुर्वीत[¶] ॥ २१ ॥

प्राग्द्रोणकलशप्रतिपत्तेः अध्वर्युणा दीयमाणं दशापवित्रमुद्गाता दक्षिणेन पाणौ गृह्णीयात् ॥ २१ ॥

अक्षश्चेदुपहन्युः पुनः प्रोक्षेयुः[¶] ॥ २२ ॥

यदि द्रोणकलशं प्रोक्षन्तः कदाचित् प्रमादादक्षं स्पृशेयुः तेनैव विधिना पुनः प्रोक्षेयुः ॥ २२ ॥

---

* द्राह्यायणेऽप्येवं किन्तु तत्र तुशब्दो नास्ति।

[¶] द्राह्यायणेऽप्येवम्।

अन्तरेणाक्षविष्कम्भौ दशापवित्रं प्रास्येदनुपघ्नन्* ॥२३॥

अक्षोपाक्षकयोरन्तरेण दशापवित्रं प्रास्येत् अनुपघ्नन् अस्पृशन् कम् अक्षमुपाक्षं वा उपाक्षो विष्कम्भः ॥ २३ ॥

संहितौ चेदुभावुपरि¶ ॥ २४ ॥

संहितौ चेदक्षविष्कम्भौ एकलग्नौ उभयोरुपरिष्टात् प्रास्येत् दशापवित्रम् ॥ २४ ॥

सर्वं रथोपस्थमुपर्युपरि† ॥ २५ ॥

यदि तद्धविर्द्धानं सर्वमेव रथोपस्थ स्यात् अक्षविष्कम्भाधिष्ठानानि सर्वाण्येव लग्नानि स्युः सर्वेषामुपरिष्टाद् दशापवित्रं समीपेन प्रास्येत् ॥ २५ ॥

उत्तरेण रथजङ्घाꣳ रथश्चेत्† ॥ २६ ॥

यदि रथः स्यात् हविर्द्धान उत्तरेण रथजङ्घायाः दशापवित्रं

---

* द्राह्यायणे विशेषोऽस्ति ।

¶ द्राह्यायणेऽप्येवम् ।

† द्राह्यायणे एताभ्यामेकसूत्रं कृतम् ।

प्रास्येत् सर्वेषु कल्पेषु अनुपपन्नन् रथौ हविर्द्धाने भवत इति श्येनादिष्वभिचरणीयेष्वस्य विषयः ॥ २६ ॥

इति प्रथमस्य नवमी कण्डिका ।

अथ दशमी कण्डिका ।

प्रत्याव्रज्य ग्राव्णो युञ्ज्यात् प्रदक्षिणमष्टमदेशेषु स्थवीयांस्यभ्यन्तराणि कृत्वा* ॥ १ ॥

कृतसदनाद्यथागतं प्रत्याव्रज्योद्गातार अभिषवस्थानं उपविशेयुः तत उद्गाता ग्राव्णो युञ्ज्यात् ग्राव्ण इति द्वितीयाबहुवचनं युञ्ज्यादिति क्रियोपदेशः प्रदक्षिणमिति योजनानुपूर्वम् अष्टमदेशेष्वष्टमेषु दिग्भागेषु स्थवीयांस्यभ्यन्तराणि कृत्वा यानि स्थवीयांसि तानि अभ्यन्तराणि कृत्वा यानि अल्पीयांसि तानि बाह्यानि ॥ १ ॥

तानि मुखानि¶ ॥ २ ॥

---

*द्राह्यायणेऽप्येवम् किन्तु तेनैतेन सूत्रद्वयं कृतम् ।

¶द्राह्यायणेऽप्येवम् ।

यानि स्थवीयांसि तानि मुखानि, ननु उक्तं भवता सर्वे उद्गातारः प्रत्याव्रजेयुरिति अयं च समानकर्तृक आदेशः एकमधिकृत्योच्यते प्रत्याव्रज्य ग्राव्णो युञ्ज्यादिति तत्कथं बहुत्वाभावात् सर्वेषामुद्गातॄणामधिकार इति उच्यते, अर्थात् अयं हि ग्राव्णां योजनमुक्त्वा वक्ष्यति तानभिमृश्य जपेयुरिति ॥ २ ॥

दक्षिणार्द्ध्यपूर्वार्द्ध्यं प्रथमम्* ॥ ३ ॥

दक्षिणपूर्वस्यान्दिशि प्रथमं ग्रावाणं स्थापयेत् उक्तं क्रमानुपूर्वं दक्षिणमिति ॥ ३ ॥

तानभिमृश्य जपेयुर्मरुत इति* ॥ ४ ॥

तान् ग्राव्णः यथास्थानं स्थापितानभिमृश्य मरुत इत्येतद् यजुर्जपेयुः दक्षिणार्द्ध्यपूर्वार्द्ध्यमित्येतत् प्रकृतम् अत आह तानिति ॥ ४ ॥

ऋतसदन एतज्जपित्वा युक्तास्थ वहतेत्येतावतैवेति धानञ्जप्यः* ॥ ५ ॥

ऋतसदनस्थानएव मरुत इत्येतदादि घोषणामीवाश्चातयध्वमित्येतमन्तञ्जपित्वा युक्तास्थ वहतेत्येतावतैवाभिमृशेयुरिति धानञ्जप्य आचार्यो मन्यते ॥ ५ ॥

---

* द्राह्यायणेऽप्येवम्।

पश्चात् दक्षिणतो वा द्रोणकलशमध्यूहेयुरिदमहमिममिति यजमानशब्दं सर्वत्र यथार्थं कुर्युः* ॥ ६ ॥

अधिसवनचर्मणि ग्राव्णां पश्चिमे प्रदेशे दक्षिणे वा द्रोणकलशमध्यूहेयुः इदमहमिममित्यनेन यजुषा यश्चास्मिन् यजुषि यजमानशब्दः तमेकद्वित्वबहुत्वेषु यथार्थमूहेयुः सर्वशब्दः अन्येष्वपि यजुःषु यो यजमानशब्दस्तमपि यथार्थं कुर्युः धारानुमन्त्रणं पृष्ठहोमादिषु ॥ ६ ॥

अनुजपेयुरन्येन कृते मन्त्रौ ब्राह्मणविहितादन्यत्र[†] ॥७॥

अन्येन कृते योजनाध्यूहने अनुजपेयुर्योजनाध्यूहनमन्त्रौ ब्राह्मणविहितादन्यत्रेति ये ब्राह्मणविहिताः कल्पाः यं द्विष्यादित्येवमादयः न तेष्वनुजपोऽस्ति स्वयमेव ते कर्त्तव्याः, नन्वयमपि प्रथमः कल्पो ब्राह्मणविहित एव ग्राव्णः संसाद्य द्रोणकलशमध्यूहन्तीति तत् किमिदमारभ्यते ब्राह्मणविहितादन्यत्रेति उच्यते, सत्यमेतदेवं किन्तु संसादनाध्यूहने श्रुते न तु योजनाध्यूहनमन्त्रौ नियुक्तौ ब्राह्मणेन सूत्रकारेण लिङ्गतः कल्पितौ अत आह ब्राह्मणविहितादन्यत्रेति ॥७॥

एष कल्पः काम्याना द्वेष्यकल्पादन्यत्र[†] ॥ ८ ॥

---

* द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

[†] द्राह्यायणेऽप्येवं, किन्तु द्वेष्यविषये विशेषोऽस्ति ।

89

योऽयं प्रथमः कल्प उक्तः प्रत्याव्रज्य ग्राव्णो युञ्ज्यादित्यत आरभ्य एष एव विधिः काम्यानां किं सर्वेषां न किं तर्हि द्वैध्यकल्पादन्यत्र ॥८॥

विपर्यस्य तु तस्मिंस्तूष्णीञ्च योजनाध्यूहने* ॥ ९ ॥

य एषः प्रथमकल्पे विधिरुक्तः एष द्वैध्यकल्पे विपर्यस्तः सर्वो भवति प्रदक्षिणमष्टमदेशेष्वित्येतत्तावदप्रदक्षिणं स्थवीयांस्यभ्यन्तराणि इति तानल्पीयांस्यभ्यन्तराणि स्थवीयांसि वाह्यानि दक्षिणार्द्धपूर्वार्द्धं प्रथममिति तद्द्वैध्यकल्पे पश्चात् स्यात् किञ्चान्यत तूष्णीं च योजनाध्यूहने ग्राव्णां योजनं द्रोणकलशस्य चाध्यूहनं ते तूष्णीं भवेयाताम् एते कर्मणी द्वैध्यकल्पे ॥ ९ ॥

इदमहममुमिति दक्षिणापरमष्टमदेशं निरूहेत्† ॥१०॥

उक्तं यं द्विष्याद्विमुखान् ग्राव्णः कृत्वेदमहममुममुष्यायणममुष्याः पुत्रममुष्या विशोऽमुष्मादन्नाद्यान्निरूहामीति निरूहेदिति ब्राह्मणे द्रोणकलशस्य निरूहणं श्रूयते तत्कतमस्यां दिशि असौ द्रोणकलशो निरूहयितव्य इत्यत आह, इदमहममुमिति दक्षिणपश्चिममष्टमदिग्भागं प्रति द्रोणकलशं निरूहेत् इदमहं कुवीनहम्बलव्यशलभिकाह्लत्याः पुत्रम् उदीच्यां दिशि यवाद्यन्नाद्यां निरूहामीति अथ प्रियकल्पे इदमहं कुमारगुप्तं द्रव्यस्यापि न्यायपुत्रं प्राच्यान्दिशि शाल्याद्यन्नाद्येऽध्यूहामि इति प्रयोगः ॥ १० ॥

---

*द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

† द्राह्यायणोऽप्येवम् ।

द्वेष्यप्रियकल्पयोर्मन्त्रौ राजन्यूहेत्* ॥ ११ ॥

द्वेष्यकल्पस्य च प्रियकल्पस्य च मन्त्रौ राजन्यधिकरणभूतेऽभ्यूहेत ॥ ११ ॥

तस्य च विशमादिशेत्ताश्चैवान्नाद्येन¶ ॥ १२ ॥

तस्य च राज्ञः विशमादिशेत् अमुष्या विशाऽमुष्यां विशीति प्रयोगः तामेव च विशामन्नाद्येनाविशेत्, अमुष्मादन्नाद्यादमुष्मिन्नन्नाद्ये इति प्रयोगः ॥ १२ ॥

उपांशुसवनो नाम ग्रावा पञ्चमस्तमुपरिष्टाद्द्रोणकलशस्य कुर्यात राष्ट्रजिघासुः प्रतीवेशो बलवतो विशमादिशन्* ॥ १३ ॥

अथो तदुभयमनादृत्येदमहमस्मात्तेजसि ब्रह्मवर्चसेऽभ्यूहामीत्यभ्यूहेत्तेजसे च ब्रह्मवर्चस आत्मानमभ्यूहतीति इतीयं काम्यं गतार्थमिति कृत्वा सूत्रकारेण न परामृष्टं यः कामयेत विशा राष्ट्रं हन्यामिति व्यूह्य ग्राव्नाऽधोद्रोणकलशं सादयित्वोपांशुसवनमुपरिष्टादभिनिदध्यादिदमहममुया विशाऽदो राष्ट्रं हन्मीति अत्र सन्देहः क उपांशुसवन इत्यत्राह सूत्रकारः उपांशुसवनो नाम ग्रावा पञ्च

---

* द्राह्यायणोऽप्येवम् ।

¶ द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

मन्त्रमुपरिष्टात् द्रोणकलशस्य कुर्य्यात् राष्ट्रजिघांसुरिति हन्तुमिच्छन् जिघासुः प्रतीवेशां प्रबला या विट् तां बलवतीमादिशन् इदमहममुदीच्या विशामुं राष्ट्रं हन्मीति प्रयोगः ॥ १३ ॥

एतेषामेकं कृत्वा पथ्यं कुर्यादिति गौतमः* ॥ १४ ॥

एतेषां काम्यानां कल्पानां यो यस्य चिकीर्षितस्तं कृत्वा पथ्यं कुर्य्यादिति गौतम आचार्य्यो मन्यते पथ्येनोपेतः पथ्यः प्रथम इत्यर्थः ॥१४॥

तमेवेति धानञ्जप्यः¶ ॥ १५ ॥

तमेव कल्पं कृत्वा अथान्यत्कर्म प्रतिपद्येत नैव पथ्यं कुर्य्यादिति धानञ्जप्य आचार्य्यो मन्यते ॥ १५ ॥

पृष्ठानामन्ते पूर्वया द्वारा निष्क्रम्य काम्यꣳ शाण्डिल्यः* ॥ १६ ॥

पृष्ठेषु समाप्तेषु पूर्वया द्वारा सदसो निष्क्रम्य काम्यं कुर्य्यादिति एवं शाण्डिल्य आचार्य्यो मन्यते ॥ १६ ॥

पवित्रेण द्रोणकलशꣳ संमृज्याद्वसवस्त्वेति बुध्नं रुद्रास्त्वेति मध्यमादित्यास्त्वेति बिलम्* ॥ १७ ॥

---

*द्राह्यायणोऽप्येवम्।

¶ द्राह्यायणे तदेवेति विशेषः।

नित्ते योजनाध्यूहनप्रकरणे काम्यानां प्रकल्पानां प्रसङ्गाद्विधिरुक्तः साम्प्रतमनन्तरां कर्मप्रतिपत्तिं विवक्षुराह, पवित्रेण द्रोणकलशं संमृज्यादिति पुनन्ति तेनेति पवित्रं दशापवित्रेण द्रोणकलशं संमृज्यादुद्गाता वसवस्त्वेत्यनेन यजुषा द्रोणकलशस्य बुध्नं संमृज्यादिति रुद्रास्त्वेति मध्यमादित्यास्त्वेति बिलं संमृज्यादिति वर्त्तते ॥ १७ ॥

एतेषामेकैकेन त्रिस्त्रिरनुसवनꣳ संमृज्यादिति धानञ्जप्यः* ॥ १८ ॥

एतेषां यजुषां वसवस्त्वेत्येतदादीनाम् एकैकेन त्रिस्त्रिरनुसवनं संमृज्यादिति धानञ्जप्य आचार्य्य आह, वसवस्त्वेति प्रातःसवने सर्वाणि स्थानानि संमृज्याद् रुद्रास्त्वेति मध्यन्दिने आदित्यास्त्वेति तृतीयसवने सर्वाणि स्थानानि संमृज्यादिति वर्त्तते ॥ १८ ॥

सर्वैः सर्वेष्विति शाण्डिल्यः* ॥ १९ ॥

सर्वैर्यजुर्भिर्वसवस्त्वेत्येतदादिभिः सर्वेषु सवनेषु सर्वाणि स्थानानि संमृज्यात् एकैकेनैकैकं स्थानं त्रिस्त्रिरित्यर्थः एवं शाण्डिल्य आचार्य्य आह ॥ १९ ॥

अवधूय पवित्रमुदग्दशमवाङ्नाभि वितनुयुः पवित्रस्य इति* ॥ २० ॥

---

*द्राह्यायणोऽप्येवम् ।

कृत्वैतेषां कल्पानामेकैकेन सम्मार्जनमवधूय पवित्रमुदगग्रमवाङ्गाभि वितनुयुः पवित्रन्त इत्येनयर्चा ॥ २० ॥

सन्ततायां धारायामुद्गाता जपेत् प्रभ्रुक्रेत्यमुष्य राज्यायेति प्रियꣳ राजानमादिशेत्[*] ॥ २१ ॥

पूयमानस्य सोमस्य सन्ततायां धारायां अविच्छिन्नायामुद्गाता जपेत्प्रभ्रुक्रेत्येतद्यजुः अमुष्य राज्यायेत्येतस्य सर्वनाम्नः स्थाने यो यस्य प्रियः स्याद्राजानमादिशेत् ॥ २१ ॥

राज्ञो राज्यायेति वा यजमानस्यर्द्धौ[†] राज्ञो राज्यायेति वा[*] ॥ २२ ॥

यजमानस्य राज्ञो राज्यायेति वा यजमानस्यर्द्धौ यजमानस्य राज्ञो राज्यायेति वा ॥ २२ ॥

सोमस्य राज्ञो राज्यायेति वा[‡] ॥ २३ ॥

यजमानस्यर्द्धौ सोमस्य राज्ञो राज्यायेति वा ॥ २३ ॥

सोमस्येत्येव ब्रूयात् सोमराजानो हि ब्राह्मणाः[‡] ॥ २४ ॥

---

[*] द्राह्यायणेऽप्येवं किन्तु तेनैतेन सूत्रद्वयं कृतम्।

[†] यजमानस्य राज्ञ इति मु॰ पु॰ पाठः।

[‡] द्राह्यायणेऽप्येवम्।

एवशब्दोऽवधारणार्थः, सोमराजानो हि ब्राह्मणा इति हेतूपादानमस्यैव नियमार्थम् ॥ २४ ॥

आग्रयणं गृह्णन्नध्वर्युर्हिंकरोति तदा प्रवृणीरन्नग्निः प्रस्तोताहं मानुषो बृहस्पतिरुद्गाताहं मानुषो वायुः प्रतिहर्त्ताहं मानुष इति* ॥ २५ ॥

आग्रयणो नाम ग्रहस्तं गृह्णन्नध्वर्युर्हिंकरोति तदा तस्मिन् काले प्रवृणीरन् अग्निः प्रस्तोतेत्येतदादिभिर्यथास्वचितैर्व्वृतप्रतिमन्त्रणार्थं यदाग्रयणे त्रिर्हिंकरोति तेनैवास्योद्गातारो वृता भवन्ति ॥ २५ ॥

न प्रवृणीरन्निति धानञ्जय्यः* ॥ २६ ॥

धानञ्जय्य आचार्य्य आह न प्रवृणीरन्निति सर्व्वत्र वृता एवेति द्रोणकलशोपसदने यद्द्रोणकलशमुपसीदन्ति तेनोद्गातारो वृताः द्रोणकलश एवैनानार्त्विज्याय वृणीत इति श्रुतेः ॥ २६ ॥

प्रवृणीरन्नेवेति शाण्डिल्यः* ॥ २७ ॥

शाण्डिल्य आचार्य्यः प्रवृणीरन्नित्येवमाह, प्रतिनिमित्तं हि नैमित्तिकानि भवन्ति अपि चार्थस्यादूषको अलोपस्य लोपान्न्यायतर इति ॥ २७ ॥

---

* द्राह्यायणेऽप्येवम् ।

अत्र वाचं यच्छेयुः* ॥ २८ ॥

अस्मिन् काले वाग्यमनं कुर्युः ॥ २८ ॥

ऋतसदने वा* ॥ २९ ॥

ऋतसदने वा वाचं यच्छेयुः दक्षिणस्य हविर्द्धानस्य पश्चादृतसदनम् ॥ २९ ॥

वेदिं वाक्रामन्तः* ॥ ३० ॥

अभूदुषाकाले यद्वेद्याक्रमणं उक्तं तस्मिन् काले वा वाचं यच्छेयुः ॥ ३० ॥

स्तुते बहिष्पवमाने विसृजेरन्* ॥ ३१ ॥

स्तुते बहिष्पवमाने स्तोत्रे वाचं विसृजेरन् ॥ ३१ ॥

इति प्रथमस्य दशमी कण्डिका ।

अथ एकादशी कण्डिका ।

उत्तराद्धविर्द्धानात् ध्रुवस्थालीं हरन्तः पश्चिमेनोद्गातॄन् हृत्वा तेनैव प्रतिहरेयुः* ॥ १ ॥

---

* द्राह्यायणेऽप्येवम् ।

ग्रहग्रहणाधिकारो वर्त्तते, गृहीतेषु सर्वेषु ग्रहेषु ध्रुवो गृह्यते सचोद्गातृसम्बन्धं कश्चिद्विवक्षुराह, उत्तराद्धविर्द्धानादिति हविर्द्धानसञ्ज्ञके द्वे अनसी दक्षिणं उत्तरञ्च तयोरुत्तराद्धविर्द्धानादिति अपादानलक्षणा पञ्चमी हविरस्मिन्निधीयतइति हविर्द्धानम् ध्रुवो नाम ग्रहः स्थाल्यां गृह्यते तां ध्रुवस्थालीं हरन्तः उद्गातॄणां पश्चिमेन प्रदेशेन हृत्वा गृहीते सोमे तेनैव पुनर्नयेयुः अव्यवायार्थं नित्यं पर कर्तृकेषु बहुवचनं नैनानपरेण हरेयुरपि ह्यकुशला अध्वर्यवो भवन्तीति ॥ १ ॥

अध्वर्युं निष्क्रामन्तं प्रस्तोता सन्तनुयात्* ॥ २ ॥

हविर्धानात् निष्क्रामन्तम् अध्वर्युं प्रस्तोता सन्तनुयात् उत्तरीयैकदेशे गृह्णीयात् अविच्छेदार्थम् ॥ २ ॥

तमुद्गाता¶ ॥ ३ ॥

तं प्रस्तोतारं उद्गाता सन्तनुयात् ॥ ३ ॥

उद्गातारं प्रतिहर्त्ता¶ ॥ ४ ॥

सन्तनुयादिति वर्त्तते ॥ ४ ॥

तं ब्रह्मा¶ ॥ ५ ॥

---

* द्राह्यायणोऽप्येवम् ।

¶ द्राह्यायणोऽप्येव किन्तु तेन सूत्रचतुष्टयेनैकसूत्रं कृतम् ।

तं प्रतिहर्त्तारं ब्रह्मा सन्तनुयात् ॥ ५ ॥

ब्रह्माणं यजमानः* ॥ ६ ॥

सन्तनुयादिति वर्त्तते विच्छेदे हि प्रायश्चित्तश्रवणात्सर्वे सन्तता भवन्ति ॥ ६ ॥

न राजानमालभ्यानुपस्पृश्याप आज्यमालभेरन्† ॥ ७ ॥

साम्प्रतमेतेषामाज्यहोमो वक्ष्यते तेन सोमः पूयमानः स्पृष्ट अत आह न राजानमालभ्यानुपस्पृश्याप आज्यमालभेरन्निति ॥ ७ ॥

तथाज्यꣳ राजानꣳ सर्वं च† ॥ ८ ॥

तथाज्यमालभ्यानुपस्पृश्यापः सोममालभेरन् सर्वशब्दः कृतेऽप्याज्यालम्भात् अनुपस्पृश्यापो नैव सोममालभेरन् ॥ ८ ॥

अध्वर्युणा हुते प्रवृत्तहोमौ जुहुयुर्गत्यानुपूर्व्येण बेकुरानामासि सूर्यामेति‡ ॥ ९ ॥

अध्वर्युणा हुते प्रवृत्तहोमौ जुहुयुः प्रवृत्तहोमाविति मन्त्रा गत्यानुपूर्व्येणापि प्रस्तोता प्रथमोऽभिमर्षेत् तत उद्गाता ततः प्रतिहर्त्तेति गत्यानुपूर्व्यं बेकुरानामासीति प्रथमां सूर्यामेति द्वितीयां अथ

---

* द्राह्यायणोऽप्येवं किन्तु तेन सूत्रचतुष्टयमेकसूत्रं कृतम् ।

† द्राह्यायणोऽप्येवं किन्तु तेन सूत्रद्वयमेकसूत्रं कृतम् ।

‡ द्राह्यायणोऽप्येवम् ।

गत्यानुपूर्व्येणेति किमिदं यावता दृष्टाप्यानुपूर्व्यमुक्तम् एवं अध्वर्युं निष्क्रामन्तं प्रस्तोता सन्तनुयात्तमुद्गातोद्गातारं प्रतिहर्त्तेति होमेऽप्येतदेवानुपूर्व्यं ग्रहीष्यते व्यतिक्रमहेत्वसम्भवात् अत्रोच्यते, गत्यारम्भेण अन्योऽपि यो होमः तत्रापि गत्यानुपूर्व्यमेव स्यात् यथा आग्निध्रीये द्वे आहुती जुहुयुरिति ॥ ९ ॥

सꣳस्तुतसोमे त्वधिकामुद्गाता जुहुयात् संवेशायोपवेशायेति यथासवनं छन्दाꣳस्यादिशन्* ॥ १० ॥

यदि सोमौ ससुतौ स्यातामित्येवमधिकृत्याह, सुषमिद्धे होतव्यमग्निर्वै सर्वा देवताः सर्वा एव देवताः पश्यन् जुहोति संवेशायोपवेशायेति छन्दोदेवत्यास्तिस्र आहुतयस्त उच्यन्ते तासां कालो विवक्षितः होता च अत आह, संस्तुतसोमे तु प्रवृत्तहोमौ हुत्वा अधिकामाहुतिमुद्गाता जुहुयात् संवेशायोपवेशायेति यथासवनं छन्दांस्यादिशन् यत्र यस्मिन् सवने यथासवनम् तुशब्दः छन्दोविशेषणार्थः अधिकग्रहणं प्रवृत्तहोमयोः प्रत्याम्नायो माभूदिति ॥ १० ॥

ऋचꣳ सामेति स्वाहाकारान्तया तृतीयां सर्वत्र स एवेति शाण्डिल्यः† ॥ ११ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेऽप्येवं किन्तु तमेतेन सूत्रद्वयं कृतम् ।

ऋचं सामेत्येतयर्चा स्वाहाकारान्तया तृतीयामाहुतिं जुहुयात् उद्गाता सर्वत्र संस्तुतसोमे च स एवोद्गाता जुहुयात् नेतरो तृतीयामाहुतिम् ॥ ११ ॥

महागिरिमहानदीरथाह्वर्वायुव्यवायेष्वसंस्रवः* ॥ १२ ॥

महागिरिः महान् पर्वतः महानदी महती नदी रथाह्वः रथस्याङ्गागमः वायुर्देवताविशेषः एतैर्व्यवाये असंस्रव. संस्रवो न भवति पूर्वपश्चिमवातैर्वायुव्यवायो गृह्यते अन्यथा सर्वदा सम्भवात् व्यवायशब्दः प्रत्येकमभिसम्बध्यते ॥ १२ ॥

पृथग्जनपदे च* ॥ १३ ॥

पृथग्जनपदे तु पुनः पुनरव्यवायेऽपि महागिर्यादिभिः संस्रवो न भवति पृथग्जनपदः पञ्चालाः कुरवः मत्स्या इति ॥ १३ ॥

अविद्विषाणमात्रादित्येके* ॥ १४ ॥

अविद्विषाणमात्रादेवासंस्रव इत्येके आचार्या मन्यन्ते ॥ १४ ॥

हुत्वा जपेयुर्ब्रह्माहं गायत्रीं वाचं प्राणं प्रजापतिं प्रपद्येऽश्मानमाखणं पर्यूह इति* ॥ १५ ॥

यदा सर्वैर्हुतं भवति अथ ब्रह्माहं गायत्रीं वाचमित्येतद्यजुर्जपेयुः ॥ १५ ॥

---

* आश्वलायनेऽप्येवम्।

अध्वर्युमन्वावर्त्तेरन्नसर्पन्तः* ॥ १६ ॥

यथाध्वर्युरावर्त्तेत तथैव आवर्त्तेरन् अव्यवायोऽव्यावृत्तो नाद्रियेरन्नसर्पन्त इत्यारभ्यते, उत्तरयोरपि सवनयोरेवमेव स्यादिति ॥ १६ ॥

सव्यैः पाणिभिः पृथग्दक्षिणा तृणानि निरस्येयुर्योऽस्य सौम्य इति* ॥ १७ ॥

किञ्चिद्गत्वा सव्यैर्वामैः पाणिभिर्हस्तैः पृथङ्नाना दक्षिणस्यां दिशि तृणानि निरस्येयुः निरासः प्रक्षेपः योऽस्य सौम्य इत्यनेन यजुषा ॥ १७ ॥

चात्वालदेशं प्राप्याध्वर्यावुपविष्टे तस्मात् प्रत्यगुपविशेयुर्याम आत्मेति* ॥ १८ ॥

चात्वालसन्निकृष्टो देशः तं प्राप्याध्वर्यावुपविष्टे तस्मादध्वर्योः पश्चिमे देशे उपविशेयुर्याम आत्मेत्येतदादिना यजुषा ॥ १८ ॥

प्रत्यङ्मुखः प्रस्तोता† ॥ १९ ॥

प्रस्तोता प्रत्यङ्मुख उपविशेत् ॥ १९ ॥

---

* द्राह्यायणेऽप्येवम्।

† द्राह्यायणेऽप्येवं किन्तु तेन सूत्रत्रयमेकसूत्रं कृतम्।

उदङ्मुख उद्गाता† ॥ २० ॥

प्रस्तोतर्युपविष्टे अनन्तरमुद्गाता उदङ्मुख उपविशेत् ॥ २० ॥

पश्चिमेनोद्गातारं गत्वा दक्षिणपूर्वमष्टमदेशमीक्षमाणः प्रतिहर्त्ता† ॥ २१ ॥

उद्गातारमुपविष्टं पश्चिमेन गत्वा प्रतिहर्त्ता दक्षिणपूर्वमष्टमदिग्भागमीक्षमाणः उपविशेत् ॥ २१ ॥

सव्याधरानुपस्थान् कृत्वा द्यावापृथिव्यो सन्धिमीक्षमाणाः समानि मुखानि धारयन्तः* ॥ २२ ॥

सव्यान् वामानुपस्थान् ऊरून् अधरान् कृत्वा द्यौश्च पृथिवी च द्यावापृथिव्यौ तयोः द्यावापृथिव्योः सन्धिमीक्षमाणाः समानि मुखानि धारयन्तः मनःसमाध्यर्थम् ॥ २२ ॥

एवं सर्वस्तोत्रेष्वासीरन्* ॥ २३ ॥

योऽयं विधिरुक्तः प्रत्यङ्मुखः प्रस्तोतेत्यत आरभ्य समानि मुखानि धारयन्त इति यावत् नैष बहिष्पवमानमधिकृत्योक्तः अतः सर्वस्तोत्रेषु भवति कुत एतत् यस्मादभ्यन्यतम्मवं कुर्यादुत्तरयोः पव-

---

† लाट्यायनेऽप्येवं किन्तु तेन सूत्रद्वयेनैकसूत्रं कृतम् ।

* लाट्यायनेऽप्येवम् ।

सामयोरिति अत आहैवं सर्वस्तोत्रेष्वाशीरन्निति, ननु यद्येवं सर्वग्रहणं न कार्य्यं एवं स्तोत्रेष्वाशीरन्निति सिद्धेः उच्यते, वक्ष्यति हि एवं परिक्रमं सर्वक्रतुषु विद्यादिति पाठान्तरे चैष ज्योतिः सर्वे कामा इति एवं ज्योतिषं दर्शयति एवं परिक्रमं सर्वक्रतुषु विद्यादिति ज्योतिषं सर्वक्रतुषु विध्यन्तरं दर्शयति वक्ष्यति च तदनन्तरं षोड़शी साम्ना स्तोष्यमाण इति त्रिसंस्थेऽपि ज्योतिष्टोमे प्रकृतिभूते षोड़शी नास्ति अत्र षोड़शिन्येष विधिर्न प्राप्नोति अप्राकृतत्वात् विकृतः षोड़शी तथा मानसादिषु नैमित्तिकेषु च न प्राप्नोति अत आह सर्वस्तोत्रेष्वाशीरन्निति ॥ २३ ॥

अपरेणोद्गातॄंस्त्र्यवरार्द्ध्या उपगाः* ॥ २४ ॥

उद्गातॄणां पश्चिमे प्रदेशे अवरार्द्ध्या उपगाः स्युः अवरार्द्ध्यशब्दः निकृष्टवचनः त्रयाणामप्यधो न भवन्तीत्यर्थः ॥ २४ ॥

चतुरवरार्द्ध्यानेके* ॥ २५ ॥

एके चतुरवरार्द्ध्यान्मन्यन्ते न तस्योपदेशः दिग्भिरेवोद्गायन्तीति अथ परार्द्ध्याः कियन्त उपगातार इति षट् परार्द्ध्या इति ॥ २५ ॥

न एतेनाक्षरेणोपगायेयुर्हो इति मन्द्रस्वरेण सन्ततं सर्ववाप्येवारमन्तः* ॥ २६ ॥

---

* द्राह्यायणे विशेषोऽस्ति ।

यदि त्र्यवरार्ध्या यदि चतुरवरार्ध्या यदि षट्परार्ध्याः तएतेनाक्षरेणोपगायेयुर्हो इति मन्द्रस्वरेण सन्ततम् अविच्छिन्नं यान्युद्गातॄणां सहवाच्यानि तेषु विरमेयुरुपगातारः सहवाच्यानि निधनानि अथ उपगायेयुर्हो इति सिद्धेः एतेनाक्षरेणेति किमर्थमारभ्यते उच्यते, स्तुचान्तरमारभते अपि चोपगातॄणां भक्तिमुद्गातार एव कुर्युरिति एतस्मिन् कल्पेऽप्येतेनैवाक्षरेणेति ॥ २६ ॥

तस्मात्त्र्यन्तरेण स्तुयुः* ॥ २७ ॥

तस्मात् मन्द्रात् त्र्यन्तरेणोत्कृष्टेनोद्गातारः स्तुयुः स्वरे स्वरे सप्तथवाक्षराणीत्यन्तरपरिमाणं तस्मात् त्र्यन्तरेण स्तुयुः ॥ २७ ॥

समेन वा प्रातःसवने* ॥ २८ ॥

उपगातृस्वरतुल्येन वा प्रातःसवने स्तुयुः मन्द्रेणेत्यर्थः ॥ २८ ॥

एकान्तरेण वा* ॥ २९ ॥

मन्द्रादेकान्तरेण वा स्तुयुः ॥ २९ ॥

इति प्रथमस्य एकादशी कण्डिका ।

---

* लाट्यायने विशेषोऽस्ति ।

अथ द्वादशी कण्डिका ।

प्रस्तरं प्रतिगृह्य प्रस्तोता ब्रह्मꣳस्तोष्यामः प्रशास्तरित्युद्गात्रे प्रयच्छेत्* ॥ १ ॥

उक्तमेवं सर्वस्तोत्रेष्वाशीरग्निति अनन्तरमध्वर्युः प्रस्तरं प्रस्तोत्रे प्रयच्छति सोमः पवत इत्यनेन यजुषा ततः परं अध्वर्य्योः सकाशात् प्रतिगृह्य प्रस्तोता ब्रह्मन् स्तोष्यामः प्रशास्तरित्यनेन यजुषा उद्गात्रे प्रयच्छेत् प्रस्तरमिति कर्मणि द्वितीया प्रतिगृह्येति दीयमानं गृहीत्वा प्रस्तोतेति कर्तृनिर्द्देशः प्रयच्छेदिति क्रियोपदेशः प्रस्तरो दर्भमुष्टिः उक्तम् अध्वर्युः प्रस्तरं हरतीति तस्मादध्वर्युणा प्रस्तरईषदिव विधूयो विधूतमिव हि तृणम्पशव उपावर्त्तन्तइति ॥ १ ॥

तेन दक्षिणां जङ्घामुपहत्य युञ्ज्यात् स्तोममग्नेस्तेजसेति* ॥ २ ॥

एतेन प्रस्तरेण उद्गाता दक्षिणां जङ्घां स्पृष्ट्वा युञ्ज्यात् स्तोममग्नेस्तेजसेति एतदादिना यजुषा प्रस्तरमासाद्योद्गायेद्धविषोऽस्कन्दाय यजमानं तु स्वर्गाल्लोकादवगृह्णातीत्युक्ताह अष्ठीवतोऽपस्पृशतोद्गेयन्तेनास्य हविरस्कन्नं भवति न यजमानं स्वर्गाल्लोकादवगृह्णातीत्यतः सूत्रकारः तेन दक्षिणां जङ्घामुपहत्येत्याह ॥ २ ॥

अन्नं करिष्यामीति जपेत्* ॥ ३ ॥

---

* द्राह्यायणोऽप्येवम् ।

युक्का स्तोममनन्तरम् अन्नं करिष्यामीत्येतदादि यजुर्जपेत् ॥ ३ ॥

तूष्णीं चात्वालमुदपात्रञ्चावेक्षेरन्* ॥ ४ ॥

तूष्णीं अमन्त्रकमित्यर्थः सर्वे उद्गातारः तूष्णीञ्चात्वालमुदपात्रं चावेक्षेरन् ॥ ४ ॥

सामासि प्रतिमाभाहीत्यादित्यम्* ॥ ५ ॥

सामासि प्रतिमाभाहीत्यनेन यजुषा आदित्यमवेक्षेरन्निति वर्त्तते ॥ ५ ॥

तूष्णीं वा* ॥ ६ ॥

यजुषा वा आदित्यमवेक्षेरन् तूष्णीं वेति विकल्पयति ॥ ६ ॥

सकृद्धिङ्कृत्य बहिष्पवमानेन स्तुवीरन्* ॥ ७ ॥

अत्रोच्यते, सकृदिति किमर्थमारभ्यते, यदा तावदुक्तं नवभिः स्तुवन्ति हिङ्कारो दशमो दशाक्षरा विराडिति उच्यते अयं हि त्रिवृत्स्तोमकं बहिष्पवमानमधिकृत्य विधिरारभ्यते विराट् सम्पदर्थं यत्र पुनः स्तोमवृद्धिः स्यात् अनेकसामानेकदैवतं वा बहिष्पवमानं स्यात् तत्र हिङ्कारं प्रति संशयः स्यात् किन्नु प्रतिसाम प्रतिदैवतं वा स्यादिति, अतोऽयमाचार्यो यत्नमारभते सकृद्धिंकृत्य बहिष्पवमानेन स्तुवीरन्निति । अथ बहिष्पवमानग्रहणं किमर्थमिति चेत् अत्रोच्यते,

---

* द्राह्यायणेऽप्येवम् ।

वक्ष्यत्ययं एतत्सर्वं कुर्यादुत्तरयोः पवमानयोरिति तत्रापि सकृदेव हिङ्कारः प्राप्नोति नैतत् तत्र ह्ययं वक्ष्यति साम्नि साम्नि हिंकुर्युरिति अत्रोच्यते, न ह्येकविधौ प्रत्याम्नायो गम्यते विकल्पः प्रतीयते अतोऽयमाचार्यो यत्नमारभते बहिष्पवमानेनेति ॥ ७ ॥

अहिङ्कृता प्रथमा रैतस्याः* ॥ ८ ॥

अहिंकृता प्रथमा स्तोत्रीया स्याद्बहिष्पवमाने तस्याः संव्यवहारिकीयं संज्ञा रैतस्येति वक्ष्यति हि रैतस्यैकत्रिकस्य बहिष्पवमानमिति ॥ ८ ॥

हिङ्कृताः पराः* ॥ ९ ॥

रैतस्या याः पराः स्तोत्रीयाः तासु हिङ्कारः स्यादिति ॥ ९ ॥

रथन्तरवर्णोऽत्तमाविसृष्टहिङ्कारा ॥ १० ॥

रथन्तरवद्वर्णो यस्या सेयं रथन्तरवर्णा सा चोत्तमा बहिष्पवमानस्य स्यात् अविसृष्टहिङ्कारा च स्यात् हिङ्कारो न विसृज्यते आकारो विसर्गः ॥ १० ॥

तस्या ऊर्द्ध्वं प्रस्तावाच्चत्वार्यक्षराण्यभिष्टोभेत्† ॥ ११ ॥

---

* द्राह्यायणोऽप्येवम् किन्तु तेन सूत्रद्वयमेकसूत्रं कृतम् ।

† द्राह्यायणोऽप्येवम् ।

तस्या रथन्तरवर्णाया ऊर्द्धं प्रस्तावाच्चत्वार्यक्षराणि रथन्तरवदभिष्टोभेत् ॥ ११ ॥

अन्नमकरमिति स्तुत्वा जपेत्* ॥ १२ ॥

अन्नमकरमित्येतदादि यजुर्जपेदुद्गाता एकश्रुतिविधानात् ॥१२॥

श्येनोऽसीति प्रस्तरे यजमानं वाचयेत्* ॥ १३ ॥

श्येनोऽसीत्येतदादि यजुः प्रस्तरेऽधिकरणे यजमानं वाचयेत् आलब्धप्रस्तरं अनुत्वारभे इति लिङ्गात् ॥ १३ ॥

तꣳ सर्वत्र स्तुत्वोपह्वयेरन्* ॥ १४ ॥

तं यजमानं सर्वस्तोत्रेषु स्तुत्वोपह्वयेरन् सर्वग्रहणं न केवलं बहिष्पवमाने उपह्वव उक्तलक्षणः ॥ १४ ॥

संवर्चसेतीक्षकान्सहकारिणश्च प्रेक्षमाणो जपेत्* ॥१५॥

संवर्चसेत्येतदादि यजुः ये तत्रेक्षकाः ये चास्य सहकारिणः तान् प्रेक्षमाणो जपेत् ॥ १५ ॥

नमो गन्धर्वायेत्यादित्यम्* ॥ १६ ॥

---

* माध्यायबोऽप्येवम् ।

नमो गन्धर्वायेत्येतदादि यजुरादित्यमीक्षमाणो जपेत् ॥ १६ ॥

दर्शनेनैवान्तर्हितश्चेत्* ॥ १७ ॥

अन्तर्हितश्चेदादित्यः स्यात् दर्शनेनैवावेक्षेत् कोऽस्य विषयः सदोभि बहिष्पवमानेन स्तुवन्ति तत्प्रकरणे किमर्थमिति चेत् उच्यते, अन्यत्रापि दर्शनेनैव सुभूरसीत्यादित्यमुपतिष्ठेरन् उद्वयन्तमसस्परीति च एतदर्थं दर्शयति ॥ १७ ॥

एतत्सर्वं कुर्यादुत्तरयोः पवमानयोः* ॥ १८ ॥

वक्ष्यत्ययं यथासवनमुपविश्य प्रस्तोता हविर्द्धानं गच्छेन्माध्यन्दिने हुतं आदित्यग्रहे प्रतिहर्त्ता भव इति योऽयं हविर्द्धानं गच्छेत् स एव कुर्यादुत्तरयोः पवमानयोः विष्णोः शिर इत्यत आरभ्य सर्वग्रहणं निरवशेषवाचि एवमतिप्रसक्ते ब्रवीति ॥ १८ ॥

प्रवरास्तु निवर्त्तन्ते चात्वालावेक्षणप्रभृति च प्राग्घिङ्कारात्† ॥ १९ ॥

अग्निः प्रस्तोताहं मानुष इत्येतदादयः प्रवरा निवर्त्तन्ते तूष्णीं चात्वालमुदपात्रं चावेक्षेरन्निति एतदादि यत्कर्म्म तत् सर्वं प्राग्घिङ्कारान्निवर्त्तते ॥ १९ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

प्रवेशनसम्मार्जने चान्तरेण तृतीयसवने* ॥ २० ॥

प्रवेशनञ्च सम्मार्जनञ्च प्रवेशनसम्मार्जने इष ऊर्ज इति प्रवेशनं वसवस्त्वेति सम्मार्जनन्तयोः प्रवेशनसम्मार्जनयोः अन्तराले यत्कर्म तृतीयसवने तच्च सर्वन्निवर्त्तते चशब्दात् पूर्वस्तोमाश्च ॥ २० ॥

कुम्भन्तु तत्र सम्मृज्यादुत्तरे हविर्धाने यः पूर्वो द्रोणकलशावृता† ॥ २१ ॥

तत्र तृतीयसवने कुम्भस्य सम्मार्जनं कुर्यात् न द्रोणकलशस्य तुशब्दो विशेषणार्थः उत्तरे हविर्द्धानसंज्ञकेऽनसि यः पूर्वस्थापितः तं सम्मृज्यात् न पश्चिमं द्रोणकलशावृता यो द्रोणकलशसम्मार्जनविधिः तेन सम्मार्जनविधिना आवृत्परिक्रमो विधिरिति समानार्थः ॥ २१ ॥

तं पूतभृदित्याचक्षते तं पूतभृदित्याचक्षते* ॥ २२ ॥

---

* शाङ्खायनेऽप्येवम्।

† शाङ्खायनेऽप्येवं किन्तु तेनैतेन सूत्रद्वयं कृतम्।

तं कुम्भं योऽसौ पूर्वः तं पूतभृदित्येवमाचक्षते एते पूतभृदाधवनीययोरप्यधिकारं मन्यन्तइति ॥ २२ ॥

इति प्रथमस्य द्वादशी कण्डिका ।

इति प्रथमः प्रपाठकः समाप्तः ।

द्वितीयः प्रपाठकः ।

अथ प्रथमा कण्डिका ।

सोमयोगेऽग्निर्युनक्तीत्येतस्य स्थाने वायुर्युनक्तु सूर्यो युनक्तीति नानासवनयोः* ॥ १ ॥

उक्तं एतत्सर्वं कुर्यादुत्तरयोः पवमानयोरिति सर्वस्मिन्विध्यन्ते प्राप्ते प्रवरास्तु निवर्त्तन्त इति एतदादि यन्निवर्त्तते तदुक्तं साम्प्रतं सोमयोगविशेष उच्यते सोमयोगमन्त्रे अग्निर्युनक्त्वित्येतस्य पदस्य स्थाने वायुर्युनक्तु सूर्यो युनक्तीति नानासवनयोरेते पदे स्यातां नाना पृथगित्यर्थः वायुर्युनक्तु मनसेति माध्यन्दिने सूर्यो युनक्तु वाचेति तृतीयसवने ॥ १ ॥

विहारं धानञ्जप्योऽग्नेस्तेजसा बृहस्पतिस्त्वेति प्रातःसवन इन्द्रियस्येन्द्रियेण बृहस्पतिस्त्वेति माध्यन्दिने सूर्यस्येति तृतीयसवने† ॥ २ ॥

अस्मिन्नेव सोमयोजने मन्त्रे याः समस्तास्तिस्रो देवता आम्ना-

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणोऽप्येवं किन्तु तेनैतेन सूत्रद्वयं कृतम् ।

तास्तासामनुसवनं विकृतां क्रियां धानञ्जप्यो मन्यते तदुच्यते, अग्नेस्तेजसा बृहस्पतिस्त्वा युनक्त्विति प्रातःसवने इन्द्रस्येन्द्रियेण बृहस्पतिस्त्वा युनक्त्विति माध्यन्दिने सूर्यस्य वर्चसा बृहस्पतिस्त्वा युनक्त्विति तृतीयसवने ॥ २ ॥

सर्वैरेकैकं यथाम्नायꣳ शाण्डिल्यः* ॥ ३ ॥

सर्वैरेभिरेकैकं स्तोमयोजनं यथाम्नायं शाण्डिल्यो मन्यते, यथाम्नायग्रहणं किमर्थमिति चेत् उच्यते, विहारः प्रकृतः तस्माभूदिति ॥ ३ ॥

साम्ने साम्ने हिंकुर्युः* ॥ ४ ॥

सामार्थं सामार्थं हिंकुर्युः उक्तं सकृद्धिङ्कृत्य बहिष्पवमानेन स्तुवीरन्निति तत्र सकृद्धिङ्कारः इह पुनः प्रतिसाम हिङ्कारः स्यात् ॥४॥

वृषकोऽसि स्वरोऽसीति यजमानवाचने* ॥ ५ ॥

वृषकोऽसि स्वरोऽसीत्येतदादियजुषी यजमानवाचने स्यातां नानासवनयोः क्रमेण श्येनोऽसीत्येतस्य स्थाने ॥ ५ ॥

स्तुत्वा बहिष्पवमानेन प्रस्तरादुभयतश्चतुरङ्गुलं परि-

---

* द्राह्यायणोऽप्येवम् ।

च्छिद्य तृणं चात्वाले प्रविध्येद्यदि स्तुतं यदि वाद्य सुष्टुतमर्वाक् स्तुतं यदि वानिष्टुतं यत्तयोरन्येन दिवमारुहेमेममन्येन जयेम लोकमिति* ॥ ६ ॥

उत्तरयोः पवमानयोरातिदेशिको विधिरुक्तः साम्प्रतं यदनन्तरं प्रकृतं कर्म तदुच्यते, स्तुत्वा बहिष्पवमानेन अनन्तरं प्रस्तरात्तृणं गृहीत्वा तदुभयतः परिच्छिद्य तृणं चतुरङ्गुलं कार्य्यं तच्चात्वाले प्रविध्येत् प्रक्षिपेत् प्रक्षेपः प्रव्याधः यदि स्तुतमित्येतदादिना मन्त्रेण एकश्रुतिविधानादुद्गाता अङ्गुलिछेदनसंशये येन कर्म कृतं तस्य परिमाणम् ॥ ६ ॥

तत्रैवोदपात्रं निनयेयुः समुद्रं वः प्रहिणोमि स्वां योनिमभिगच्छतारिष्टास्तन्वो भूयाः स्म मापरा सेचिनो धनमिति*।७।

तस्मिन्नेव चात्वाले उदपात्रन्निनयेयुः यत्तत् उदपात्रं तस्मिन् कर्मण्यङ्गभूतं तदेव चात्वाले निनयेयुः समुद्र व प्रहिणोमीत्येतदादिना यजुषा ॥ ७ ॥

बहिर्वेद्युदञ्चोऽयुञ्जि पदान्युत्क्रामेयुः प्रागुदगाभ्यः* ॥८॥

---

* द्राह्यायणेऽप्येवम्

तदुदपात्रं निनीय अनन्तरं बहिर्वेद्युदङ्मुखा अयुञ्जि पदानि उत्क्रामेयुः गच्छेयुः प्रागदशभ्यः त्रि पञ्च सप्त नव वा ॥ ८ ॥

आव्रज्याग्नीध्रीयं बहिष्पवमानर्चोऽधीयीरन्* ॥ ९ ॥

आव्रज्य आग्नीध्रीयन्तस्मिन् बहिष्पवमानर्चः अधीयीरन् ननु किमिदं बहिष्पवमानर्चोऽधीयीरन्निति आव्रज्याग्नीध्रीयमुपरिष्टाज्जप इति वाच्ये उच्यते, स्तोत्रधर्मः प्रवृत्तः प्रत्यङ्मुखः प्रस्तोतोदङ्मुख उद्गाता दक्षिणपूर्वमष्टमदेशमीक्षमाणः प्रतिहर्तेति सोऽयमाचार्यः पुनरारभते बहिष्पवमानर्च इति कथं य एव पुरस्ताज्जपस्य धर्मः स एव धर्मः स्यादिति प्रांमुखैः क्रियेति ॥ ९ ॥

अनुव्याहारिषीन्मामिति यमिति शंकेत तस्मा आग्नीध्रीय आहुतीवज्रं प्रहरेद्यज्ञशस्वन उपचते नमस्ते सत्योऽसि सत्यसंस्कृतस्तस्य तेय ऊनं योऽकृतं योऽतिरिक्तमदर्शंस्तस्य प्राणेनाप्यायस्व स्वाहेति† ॥ १० ॥

प्रतिपक्षतयः अनुव्याहारिषीत् क्षपणवादं कृतवान् अयं पूर्वमिति उद्गायतामिति शंकेत पुनरप्यभिव्याहरेदिति तस्मै तदर्थं आग्नीध्रीये आहुतिवज्रं प्रहरेत् यज्ञशस्वनइत्येतदादिना यजुषा आहुति

---

* द्राह्यायणे विशेषोक्तिः ।

† द्राह्यायणेऽप्येवम् ।

रक्षः अभिचारार्था आहुतिः अनुव्याहारप्रशमनार्थं अनुव्याहारो नाम अभिद्रोहाभिसंहितः प्रश्नः ॥ १० ॥

न व्यभिचरेतेति धानञ्जप्यः* ॥ ११ ॥

यदुक्तं तस्मा आग्नीध्रीय आहुतिवर्ज्जं प्रहरेदिति तन्न कुर्यात् कस्मात् यतः यएनमनुव्याहरति स आर्त्तिमार्च्छतीति श्रुतेः अक्रियमाणेऽप्येतस्मिन् यएनमनुव्याहरति स आर्त्तिमार्च्छत्येव तस्मान्न व्यभिचरेतेति इति धानञ्जप्यस्य मतम् ॥ ११ ॥

इति द्वितीयस्य प्रथमा कण्डिका ।

अथ द्वितीया कण्डिका ।

अहीनबहिष्पवमानैः सदसि स्तुवीरन् प्रथमादह्नो ऽन्यत्र* ॥ १ ॥

बहिष्पवमानस्य कृत्स्नो विधिरुक्तः साम्प्रतमहीनसत्त्रेषु देशविशेषो विवक्षितः स उच्यते, अहीनबहिष्पवमानैरिति अहीनस्य बहिष्पवमानानि अहीनबहिष्पवमानानि तैरहीनबहिष्पवमानैः सदसो स्तुवीरन् देशेन देशः प्रत्याम्नायते प्रथमादह्नोऽन्यत्र प्रथमे-

---

* लाट्यायनेऽप्येवम् ।

ऽहनि चात्वालदेशे स्तुत्वा शेषेषु सदसि स्तुवीरन् ननु बहिष्पवमानैरिति बहुवचनसामर्थ्यादहीनविधौ सिद्धे कस्मादहीनग्रहणं क्रियते यावता एकाहेषु बहुत्वासम्भवात् सत्त्रेषु च विशेषवचनादाद्यन्तयोश्च सत्त्रेष्विति अतः प्रत्याख्यायाहीनात् न चान्या चतुर्थी यज्ञजातिरस्ति यस्यामिदं विधानं कल्प्येत तस्मादहीनग्रहणं न कर्त्तव्यं क्रियमाणे च प्रयोजनं वक्तव्यम् उच्यते यदुच्यतेऽहीनग्रहणं न कर्त्तव्यमिति कर्त्तव्यमिति ब्रूमः कस्मात् शेषविधिप्रसिद्ध्ये द्वादशाहेऽहीनभूते एकाहमिश्रेषु चाहीनेषु वरुणप्रघासद्विदिवसाकमेधत्रिरात्रव्युष्टिद्विरात्रेषु अक्रियमानेऽहीनग्रहणे संशयः स्यात् सोऽयमाचार्यो मुक्तसंशयं सूत्रमारभते, अहीनबहिष्पवमानैरिति अथ प्रथमादह्नोऽन्यत्रेति अहर्ग्रहणं न कर्त्तव्यं कस्मात् प्रथमादन्यत्रेति सिद्धे न चैकस्मिन्नहन्यनेकबहिष्पवमानं नास्ति उच्यते, कर्त्तव्यमहर्ग्रहणं कस्मात् अक्रियमाणे ·प्रथमेऽहनि नैमित्तिकबहिष्पवमानावृत्तौ सदसि स्तवनं स्यात् बहिष्पवमानानन्तरे सोमापहारे सोमदाहे वा आभ्यासिक संस्कारे सति हविषः स्तुत्यर्थत्वात् पवमानानां संस्कारावृत्तौ पवमानाभ्यासवृत्तिः प्राप्नोति पवमानाभ्यासवृत्तिस्सेति वचनात् हविस्तुतिः पवमाने इति च तस्मादहर्ग्रहणे क्रियमाणे नास्ति दोषः ॥ १ ॥

आद्यन्तयोश्च सत्त्रेषु* ॥ २ ॥

आद्यन्तयोश्च ये अहनी सत्त्रेषु ताभ्यामन्यत्र सदसि स्तवनं सत्त्रेषु समाध्यर्थम् ॥ २ ॥

---

* द्राह्यायणोऽप्येवम् ।

प्राग्धिष्ण्यविहरणान्निष्क्रम्य तृणप्रासनप्रभृति समापयेयुः* ॥ ३ ॥

सदसि बहिष्पवमानक्रियायामयं विशेषः प्राग्धिष्ण्येष्वग्नीनां विहरणात् तृणप्रक्षेपणादि कर्म निष्क्रम्य समाप्नुयुः चतुरङ्गुलं परिछिद्य तृणं चात्वाले प्रविध्येदित्यत आरभ्य आ उपरिष्टाज्जपात् ॥ ३ ॥

वैदत्रिरात्रे सत्त्रन्यायं गौतमः* ॥ ४ ॥

वैदत्रिरात्रे सत्त्रन्यायं गौतम आचार्यो मन्यते उभयतोऽतिरात्रत्वात् ॥ ४ ॥

अहीनन्यायं धानञ्जप्यः* ॥ ५ ॥

अहीनेषु यो न्यायस्तं धानञ्जय्यो मन्यते अहीनत्वात् ॥ ५ ॥

मन्द्रं प्रातःसवने स्तुवीरन्नुत्तरोत्तरमुत्तरयोः† ॥ ६ ॥

मन्द्रः स्वरस्तं श्रित्वा प्रातःसवने स्तुवीरन् उत्तरमुत्तरं श्रित्वा उत्तरयोः पवमानयोः स्तुवीरन् मन्द्रे सप्तयवान्तराणि भवन्ति अतः श्रित्वेत्युक्तम् अन्यथा हि मन्द्रेण प्रातःसवनं स्तुवीरन्निति स्यात् ॥ ६ ॥

---

* भाष्यकारोऽप्येवम् ।

† भाष्यकारेणैतेन सूत्रद्वयं कृतम् ।

मध्येन वोभयोः* ॥ ७ ॥

मध्येन स्वरेण वा उभयोरुत्तरयोः सवनयोः स्तुवीरन् ॥ ७ ॥

एतस्यां वेलायां प्राश्नीयुः† ॥ ८ ॥

एतस्मिन् काले इत्यर्थः स्तुत्वा बहिष्पवमानेन ऋत्विजाम्भोजनकाल उपदिश्यते एतस्मिन् काले भुञ्जीरन्नान्तराभोजनं स्यात् आदधिभक्षणात् ॥ ८ ॥

अनुसवनान्तं सन्नेषु सवनमुखीयान् भक्षयित्वा सन्नेषु नाराशंसेषु‡ ॥ ९ ॥

अनुसवनन्तु सन्नेषु भोजनं सवनशब्दो विशेषणार्थः कं विशिनष्टि कालं सवनमुखीयान् भक्षयित्वेति सवनमुखीयानां भक्षणमुक्तं भवति नह्यभक्षयित्वा सन्नेषु नाराशंसेषु ततो भुञ्जीरन् ननु सन्नेषु नाराशंसेषु इत्युक्ते सवनमुखीयानां भक्षणमुक्तम्भवति नह्यभक्षितेषु सवनमुखीयेषु नाराशंसानां सादनमस्ति तस्मात्सवनमुखीयान् भक्षयित्वेत्यतिरिच्यते नैतत् कुतः वक्ष्यत्ययं द्वितीयाः सवनेषु नाराशंसाः पूर्वयोस्तु तृतीयाविति तत्र संशयः स्यात् किं पूर्वेषु नाराशंसेषु सन्नेषु उत्तरोत्तरेष्विति तद्विशेषणार्थमारभ्यते ये सवनमुखीयानन्तरं नाराशंसास्तेषु सन्नेष्विति ॥ ९ ॥

---

* द्राह्यायणे विशेषोऽस्ति ।

† द्राह्यायणोऽप्येवम् ।

‡ द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

वपायां हुतायां धिष्ण्यानुपतिष्ठेरन्* ॥ १० ॥

सवनीयस्य पशोर्वपायां हुतायामनन्तरं धिष्ण्याननुपतिष्ठेरन् तद्धिष्ण्योपस्थानं वक्ष्यते ॥ १० ॥

चात्वाले तु मार्जनं पूर्वꣳ सर्वेष्विदमापः प्रवहतावद्यञ्च मलञ्च यच्चाभिदुद्रोहानृतं यच्च शेपे अभीरुणमापोमा तस्मादेनसो दुरितात्पान्तु विश्वतोऽनिर्मा मुञ्चामि शपथान्निर्मा वरुणादुत निर्मा यमस्य पड्विꣳशात्सर्वस्माद्देव किल्बिषात् सुमित्रियान आप ओषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्म इति* ॥ ११ ॥

चात्वाले तु मार्जनं पूर्वं सर्वेषु धिष्ण्योपस्थानाद्भवति मार्जनं मन्त्रपूताभिरद्भिरभ्युक्षणं इदमाप इत्येतदादिना मन्त्रेण प्रकृतमधुनोच्यते ॥ ११ ॥

सम्राडसीत्याहवनीयमुपस्थायोदञ्चो गत्वास्तावचात्वालशामित्रानुदङ्मुखाः स्तुतो नभोसंसृष्ट इति* ॥ १२ ॥

सम्राडसीत्यनेन मन्त्रेण आहवनीयमुपस्थाय उदङ्मुखा गत्वा आस्तावचात्वालशामित्रान् आस्तावश्च चात्वालश्च शामित्रश्च आस्तावचात्वालशामित्राः तानुपतिष्ठेरन् उदङ्मुखाः उदङ्मुखा इति प्राङ्मुख-

---

* शाट्यायनेऽप्येवम्।

करणं प्रत्याम्नायते स्तुतो नभोसंस्पृष्ट इति एतदादिभिर्मन्त्रैः यथासंख्येन ॥ १२ ॥

विभुरसीत्याग्नीध्रीयमुपतिष्ठेरन्* ॥ १३ ॥

विभुरसीत्यनेन मन्त्रेण आग्नीध्रीयस्योपस्थानं कुर्युः ननु आहवनीयमुपस्थायेति प्रकृतमुपस्थानं कस्मादुच्यते उपतिष्ठेरन्निति उच्यते उदङ्मुखा इति प्रकृतं तन्माभूत् अतः उपतिष्ठेरन्नित्युच्यते कथं आग्नीध्रीयं गत्वा प्राङ्मुखा उपतिष्ठेरन्निति ॥ १३ ॥

तमुत्तरेण सञ्चरः सर्वत्र* ॥ १४ ॥

तमाग्नीध्रीयमुत्तरेण सञ्चरः सर्वत्र एनपायोगे द्वितीया सर्वत्रेति न केवलं धिष्ण्योपस्थाने तमिति निर्देशः क्रियते केषाञ्चित् परिश्रिते भवति केषाञ्चिद्बहिर्भवति यदि परिश्रिते यदि बहिस्तस्यैवोत्तरेण सञ्चरः ॥ १४ ॥

दक्षिणेनोत्तरयोः सवनयोर्यदा हविर्द्धानमाहवनीयञ्च पृष्ठहोमाय* ॥ १५ ॥

दक्षिणेनाग्नीध्रीयस्य सञ्चरः उत्तरयोः सवनयोर्यस्मिन् काले हविर्द्धानगमनं भवति आहवनीयग्रहणादन्योऽपि पृष्ठाश्रितो होमः आहवनीय एव स्यात् यथा वैराजमिति ॥ २५ ॥

---

* द्राह्यायणेऽप्येवम् ।

पूर्वस्याꣳ सदसो द्वारि प्रत्यङ्मुखास्तिष्ठन्तो वह्निरिति होतुर्धिष्ण्यम्* ॥ १६ ॥

पूर्वस्यां द्वारि कस्य सदसः तिष्ठन्तो वह्निरित्येतदादिना यजुषा होतुर्धिष्ण्यमुपतिष्ठेरन् ॥ १६ ॥

श्वात्र इति मैत्रावरुणस्य* ॥ १७ ॥

धिष्ण्यमुपतिष्ठेरन् ॥ १७ ॥

तुथ उशिग्गन्धारिरवस्युरिति ब्राह्मणाच्छꣳसिप्रभृतीनामुदञ्चः* ॥ १८ ॥

तुथ इत्येतदादिभिर्यजुर्भिः ब्राह्मणाच्छंसिपोतृनेष्ट्रच्छावाकानां उदञ्चो धिष्ण्याः तानुपतिष्ठेरन् ॥ १८ ॥

तत्रैव तिष्ठन्तः शुन्ध्युरिति मार्जालीयम्† ॥ १९ ॥

तस्मिन्नेव प्रदेशे तिष्ठन्तः शुन्ध्युरित्येतदादिना यजुषा मार्जालीयमुपतिष्ठेरन् ॥ १९ ॥

ऋतधामेत्यौदुम्बरीम्* ॥ २० ॥

ऋतधामेत्यनेनौदुम्बरीमुपतिष्ठेरन् ॥ २० ॥

---

* शाङ्खायनेऽप्येवम् ।

† शाङ्खायने विशेषोऽस्ति ।

समुद्र इति ब्रह्मणः सदनम्* ॥ २१ ॥

समुद्र इत्यनेन यजुषा ब्रह्मणः सदनमुपतिष्ठेरन् तत्रैव तिष्ठन्त इत्येतदनुवर्त्तत एव ॥ २१ ॥

उत्तरेण सदो गत्वान्तर्वेदि प्रत्यङ्मुखास्तिष्ठन्तोऽह्निरिति प्रजह्नितम्* ॥ २२ ॥

उत्तरेण सदसः गत्वा वेदेरन्तः अन्तर्वेदि अन्तरित्यव्ययं न बहिर्वेदौ एतदुक्तं भवति प्रत्यङ्मुखास्तिष्ठन्तः अह्निरिति प्रजह्नितमुपतिष्ठेरन् पात्नीशालोऽग्निः केषाञ्चिद्गार्हपत्यादतिप्रणयनो भवति केषाञ्चिदाहवनीयात् यस्मादतिप्रणयनो भवति स गार्हपत्यः योऽन्यः स प्रजह्नितः ॥ २२ ॥

अज इति गार्हपत्यम्* ॥ २३ ॥

अज इत्यनेन मन्त्रेण गार्हपत्यमुपतिष्ठेरन् ॥ २३ ॥

सगरा इति दक्षिणाग्नेरायतनम्* ॥ २४ ॥

सगरा इत्येतदादिना यजुषा दक्षिणाग्नेरायतनमुपतिष्ठेरन् ॥२४॥

कव्य इति दक्षिणां वेद्यन्तम्* ॥ २५ ॥

---

* द्राह्यायणोऽप्येवम्

कव्य इत्येतदादिना यजुषा मद्वादेवेर्दक्षिणमन्तमुपतिष्ठेरन् ॥२५॥

तत्रैव तिष्ठन्तः सर्वान् समन्वीक्षमाणाः पातमेति* ॥ २६ ॥

एतस्मिन्नेव देशे तिष्ठन्तः सर्वानाहवनीयादीन् धिष्ण्यान् समन्वीक्षमाणाः पातमित्येतद् यजुर्जपेयुः ॥ २६ ॥

एकैकमुपस्थायैतद्ब्रूयुरिति शाण्डिल्यो बहुशब्दानेकवत् कुर्वन्तः† ॥ २७ ॥

आहवनीयादारभ्य एकैकं धिष्ण्यमुपस्थायैतद् यजुर्जपेयुरिति शाण्डिल्य आचार्यो मन्यते तस्मिन् यजुषि यान् बहुशब्दांस्तानेकवत्सनयन्तः प्रयोगस्तु पाहि माग्नेरौद्रेणानीकेन पिपृहि मा नमस्तेऽस्तु मा मा हिंसीरित्येवमादि ॥ २७॥

इति द्वितीयस्य द्वितीया कण्डिका ।

अथ तृतीया कण्डिका ।

रौरुकीणि चेत् कुर्युरादित्यं प्रथममुपतिष्ठेरन्नध्वनामिति* ॥ १ ॥

रौरुकीये प्रवचने यानि धिष्ण्योपस्थानयजूंष्याम्नातानि यदि-

---

* साम्नायकोऽप्येवम् ।

† साम्नायकोऽप्येवं किन्तु तन्मते न सूत्रद्वयं ज्ञातम् ।

तानि कुर्युः ततःप्रागाहवनीयोपस्थानादादित्यमन्त्रवदुपतिष्ठेरन् अध्वनामध्वपत इत्यनेन मन्त्रेण ॥ १ ॥

आहवनीयमुपस्थाय तमेवापि जोऽसि जायमान इत्यपि जोऽसि नवजात इति वा यमग्निमनुप्रहरन्ति तमभिप्रेत्य* ॥ २ ॥

आहवनीयं पूर्वोक्तेन विधिना उपस्थाय तमेवोपतिष्ठेरन् अपि जोऽसि जायमान इति अपि जोऽसि नवजात इति वा एतयोरन्यतरेण यमग्निन्निर्मथ्य आहवनीये प्रहरन्ति तमग्निमाभिमुख्येन प्रेत्य समीपे गत्वा उपतिष्ठेरन् ॥ २ ॥

यदा चात्वालमथोत्करन्तुमुलोऽस्याक्रन्द हत्वेति* ॥ ३ ॥

यदा यस्मिन् काले चात्वालमुपतिष्ठेरन् अथानन्तरमुत्करमुपतिष्ठेरन् तुमुलोऽस्याक्रन्द हत्वेत्यनेन मन्त्रेण ॥ ३ ॥

यदा शामित्रमथ यत्रोवध्यन्निखनन्त्यूवध्यगोहोसि पार्थिव इति* ॥ ४ ॥

यस्मिन् काले शामित्रमुपतिष्ठेरन् अथानन्तरं यस्मिन् देशे पशोः ऊवध्यन्निखनन्ति तं देशमुपतिष्ठेरन् ऊवध्यगोहोऽसि पार्थिव इत्यनेन यजुषा ॥ ४ ॥

---

* द्राह्यायणोऽप्येवम्।

यदाग्नीध्रीयमथ यत्राच्छावाकआसीनो होतारमुपहवमिच्छत्युपहव्योऽसि नमस्य इत्युपहव्योऽसि तनूपा इति वा* ॥ ५ ॥

यस्मिन् काले आग्नीध्रीयमुपतिष्ठेरन् अथानन्तरं यत्र यस्मिन् देशे अच्छावाकआसीनः होतरि उपहवमिच्छति तं देशमुपतिष्ठेरन् उपहव्योऽसि नमस्य इति उपहव्योऽसि तनूपा इति वा एतयोरन्यतरेण वा ॥ ५ ॥

यदा ब्रह्मणः सदनमथ सदस्यस्य सदस्योऽसि मलिम्लुच इति* ॥ ६ ॥

यस्मिन् काले ब्रह्मणः सदनमुपतिष्ठेरन् अनन्तरं सदस्यस्य सदनमुपतिष्ठेरन् सदस्योऽसि मलिम्लुच इत्यनेन मन्त्रेण सीदन्त्यस्मिन्निति सदनम् ॥ ६ ॥

यदा दक्षिणं वेद्यन्तमथ प्राजापत्यमसीति पत्नीशालामैन्द्रमसीति सदो वैष्णवमसीति हविर्धानमैन्द्राग्नमसीत्याग्नीध्रीयं वैश्वदेवमसीति वा* ॥ ७ ॥

यस्मिन् काले दक्षिणं वेद्यन्तमुपतिष्ठेरन् ततोऽनन्तरं पत्नीशालादीन्याग्नीध्रीयान्तानि आगाराण्युपतिष्ठेरन् यथादिष्टैर्मन्त्रैः, ननु आग्नीध्रीयस्य पूर्वमेवोपस्थानं कृतं तत् किमिदं पुनरादिश्यत-

---

* द्राह्यायणोऽप्येवम् ।

इति अत्रोच्यते, तदाग्नीध्रीयस्य कृतम् इमानि तु पत्नीशालादीनां परिश्रितानामुपस्थानानि प्रकृतानि तस्मादाग्नीध्रीयपरिश्रितस्येदमुपस्थानमिति ॥ ७ ॥

अथ तथैव समस्तेन सर्वे स्थ सोम्यासः सर्वे सोमं पिबत सर्वे सोमस्य पीतिमानशध्वे पातमेति समानं परम्* ॥ ८ ॥

अथ अस्मात् कर्मणोऽनन्तरं यथापूर्वं समस्तोपस्थानं कृतं तथैव तेन प्रकारेण सर्वान्समन्वीक्षमाणाः सर्वे स्थ सोम्यास इत्येतद्यजुर्जपित्वा अनन्तरं पातमेत्येतदादि पूर्वोक्तं जपेयुः ॥ ८ ॥

ऋतस्य द्वारौ स्थ इत्यपरौ द्वारबाहू संमृज्य मा मा सन्ताप्तमिति प्रविशेयुः¶ ॥ ९ ॥

द्वयोर्विधानयोरन्यतरेण धिष्ण्यानुपस्थाय अनन्तरं ऋतस्य द्वारौ स्थ इत्यनेन मन्त्रेण सदसः अपरौ पश्चिमौ द्वारबाहू संमृज्य मा मा सन्ताप्तमित्यनेन यजुषा सदसि प्रविशेयुः सम्मार्जनं शोधनम् ॥ ९ ॥

दक्षिणेनौदुम्बरीं गत्वा तस्या उत्तरत उपविशेयुर्नमः सखिभ्यः इति‡ ॥ १० ॥

---

* द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

¶ द्राह्यायणेऽधिकमस्ति ।

‡ द्राह्यायणेऽप्येवम् ।

दक्षिणेन प्रदेशेनौदुम्बर्यां गत्वा तस्या उत्तरे प्रदेशे उपविशेयुः नमः सखिभ्य इत्यनेन यजुषा तस्या इति निर्देशो माभूत् सदस उत्तरत इति ॥ १० ॥

पूर्वेण प्रस्तोतारं प्रतिहर्त्ता गच्छेदेतस्याम्* ॥ ११ ॥

एतस्यां वेलायां धिष्ण्योपस्थानानन्तरायां पूर्वेण प्रदेशेन प्रस्तोतारं प्रतिहर्त्ता गच्छेत् अपरे ब्रुवते एतस्यामित्येतस्यामौदुम्बर्याम् अयमेव नित्यः सञ्चर इति ॥ ११ ॥

एतस्यां वेलायाᳪसमुपह्वयेरन्* ॥ १२ ॥

एतस्यामिति काकाक्षिन्यायेनोभयत्र सम्बध्यते एतस्यां वेलायामस्मिन् काले समुपह्वयेरन्, ननु एतस्यां वेलायामिति किमर्थमारभ्यते अथ समुपह्वयेरन्नित्यानन्तर्यं सिद्धं उच्यते, अन्यदप्यस्ति पूर्वेण प्रस्तोतारं प्रतिहर्तुः गमनं न तस्मिन् समुपह्वयेरन् धिष्ण्योपस्थानानन्तरं प्रवेशनकालएव समुपह्वयेरन् ॥ १२ ॥

सर्वे सत्रेषु* ॥ १३ ॥

यजमाना उपह्वयध्वमित्येवोपह्वानमिति सर्वे यजमानाः सत्रेषु समुपह्वयेरन् ॥ १३ ॥

---

* द्राह्यायणेन सूत्रत्रयमेकसूत्रं कृतम्।

मिथोऽन्यत्र* ॥ १४ ॥

सत्रादन्यत्र मिथः द्वौ द्वौ समुपह्वयेरन् ॥ १४ ॥

सर्वे यजमानम्* ॥ १५ ॥

सत्रादन्यत्र सर्वे त्रयोऽपि उद्गातारो यजमानमुपह्वयेरन् उद्गातार उपह्वयध्वमिति प्रार्थिताः सन्त उपहूत इत्यनुज्ञां कुर्युरित्यर्थः ॥ १५ ॥

द्वारबाहुसम्मार्जनप्रभृत्येतत् सर्वं कुर्युर्यदा धिष्ण्यानुपतिष्ठेरन्* ॥ १६ ॥

ऋतस्य द्वारौ स्थ इत्येतस्मादारभ्य एतत् सर्वं कुर्युः यावद् यजमानसमुपह्वानमिति तस्मिन् काले धिष्ण्यानुपतिष्ठेरन्, ननु एतत् सर्वमिति किमर्थं द्वारबाहुसम्मार्जनप्रभृतीति सिद्धे उच्यते, उक्तं यदा धिष्ण्यानुपतिष्ठेरन्निति वक्ष्यति च अथ धिष्ण्यानुपतिष्ठेरन्नित्येतस्मिन् प्रकरणे अनुपस्थानं प्राप्नुयात् इति तद्धिष्ण्योपस्थानानन्तरं कर्म अनुपस्थानेन प्राप्नोति सोऽयमाचार्यो नियमार्थमारभते एतत् सर्वं कुर्यादिति कथं अनुपस्थानेऽपि स्यादिति ॥ २६ ॥

याजमानब्रह्मत्वे चेदुद्गाता कुर्यादाग्नीध्रीयमुपस्थाय पूर्वेण परिक्रामेत्* ॥ १७ ॥

---

* द्राह्यायणेऽप्येवम्।

यजमानस्य कर्म याजमानं ब्रह्मणः कर्म ब्राह्मं ते याजमानब्राह्मे यद्युद्गाता मुख्येन कुर्यात् तदाग्नीध्रीयमुपस्थाय तस्य पूर्वेण गच्छेत् किं विषयं पुनरिदं कर्मोद्गातुः उच्यते आपत्कल्पे ॥ १७ ॥

सादस्यानुपस्थाय तत एवेक्षमाणः पात्नीशालान्* ॥ १८ ॥

सादसान् धिष्ण्यानुपस्थाय सदसि भवाः सादसाः तानुपस्थाय तस्मिन्नेव देशेऽवस्थित ईक्षमाणः पात्नीशालान् धिष्ण्यानुपतिष्ठेत् पत्नीशालायां भवाः पात्नीशालाः ॥ १८ ॥

इतरथेतरौ* ॥ १९ ॥

इतरथा इतरौ प्रष्टौ पूर्वोक्तेन विधिना धिष्ण्यान् उपतिष्ठेयाताम् ॥ १९ ॥

इति द्वितीयस्य तृतीया कण्डिका ।

अथ चतुर्थी कण्डिका ।

ऋतस्य द्वारौ स्थ इति पूर्वौ द्वारबाहू संमृज्य दक्षिणस्य पुरस्तादुदङ्मुख उपविशेदिति धानञ्जय्यः† ॥ १ ॥

---

* शाण्डिल्योऽप्येवम् ।

† शाण्डिल्यो विशेदिति ।

सादसान् पात्नीशालांश्च धिष्ण्यानुपस्थाय अनन्तरमृतस्य द्वारौ स्थ इत्यनेन यजुषा पूर्वौ द्वारबाहू सदसः संमृज्य दक्षिणस्य द्वारबाह्वोः पूर्वे प्रदेशे उदङ्मुख उपविशेदित्येवं धानञ्जय्यः आचार्य आह ॥ १ ॥

पश्चात् प्रत्यङ्मुख इति शाण्डिल्यः* ॥ २ ॥

पश्चिमे प्रदेशे दक्षिणस्य द्वारबाह्वोः प्रत्यङ्मुख उपविशेदित्येवं शाण्डिल्य आचार्य आह ॥ २ ॥

उक्ते प्रवेशनोपवेशने ॥ ३ ॥

प्रवेशनोपवेशनार्थीये यजुषी पूर्वमेवोक्ते मा मा सन्ताप्त नमः सखिभ्य इति च ॥ ३ ॥

ऋत्विक्पथेन गत्वा समस्तोपस्थानप्रभृति समानम्† ॥ ४ ॥

याजमानमुक्तं साम्प्रतं ब्रह्मत्वं विवक्षितं तदुच्यते, ऋत्विक्पथेन गत्वा समस्तोपस्थानादारभ्य सर्वान् समन्वीक्षमाणाः पातमेत्येतस्मात् सर्वं समानम् ॥ ४ ॥

दक्षिणार्द्धे तु सदसः पूर्वमुपवेशनं प्रस्तोतुः प्रत्युपवेशनं

---

* शाट्यायने विशेषोऽस्ति ।

† शाट्यायनेऽप्येवम् ।

131

ब्रह्मोपवेशनेन निरस्तः परावसुरिति दक्षिणात्तृणं निरस्येदावसोः सदने सीदामीत्युपविशेत्* ॥ ५ ॥

अयन्तु विशेषः प्रागौद्गात्रादुपवेशनात् दक्षिणे प्रदेशे सदस उपवेशनं प्रस्तोतुरुपवेशनं प्रति तच्च ब्रह्मोपवेशनेन, ननु किमिदं ब्रह्मोपवेशनेनेति यदा वक्ष्यत्येवोपवेशनम् उच्यते, वक्ष्यत्ययं ब्रह्मणः प्रकरणे प्रतिपत्तौ धिष्ण्यानुपस्थायोक्तं सदस्युपवेशनमिति निरस्तः परावसुरित्यनेन यजुषा दक्षिणात्तृणन्निरस्येत् आवसोः सदने सीदामीत्यनेन उपविशेत् ॥ ५ ॥

भूर्भुवःस्वर्बृहस्पतिर्ब्रह्माहं मानुष इत्युक्त्वौदुम्बरीं गत्वोपविशेत्† ॥ ६ ॥

उपविष्टानन्तरम् एतद्यजुर्जपेत् अनन्तरमौदुम्बरीं गत्वा पूर्वोक्तेन यजुषोपविशेत् ॥ ६ ॥

अनूपविशेतामितरौ ॥ ७ ॥

तमुपविष्टमनन्तरं प्रस्तोतृप्रतिहर्त्तारावुपविशेतां पूर्वोक्तेनैव यजुषा ॥ ७ ॥

---

* शाखायामेतेन तृणचतुष्टयं क्षतम् ।

† शाखाक्तोपवेशनम् ।

एतेनानुपूर्व्येण सर्वं यथासनञ्चिकीर्षेत्* ॥ ८ ॥

यदि याजमानब्रह्मत्वे उद्गाता कुर्यात् तदा याजमानं ब्रह्मत्वमौद्गात्रमित्यनेनानुपूर्व्वेण सर्वं यथासनं उपवेशनादि कुर्यात् ॥ ८ ॥

ग्लायेच्चेदध्यौदम्बर्येव* ॥ ९ ॥

यदि ग्लायेदौदुम्बर्य्यामेवासीनः सर्वं कुर्यात् ग्लानिरशक्तिः ॥ ९ ॥

सदस्य एवमेव धिष्ण्यानुपतिष्ठन् ब्रह्माणमनुप्रविशेद् ब्राह्मणाच्छंसिनं वा† ॥ १० ॥

सदस्य एवमेव यदिदमुद्गातृणां धिष्ण्योपस्थानमुक्तमनेनैव प्रकारेण कुर्वन् ब्रह्माणमनुप्रविशेत् ॥ १० ॥

तेनास्य समुपहवः स्याद्भक्षस्य समानः† ॥ ११ ॥

यदि ब्रह्मणा यदि वा ब्राह्मणाच्छंसिना यस्यानुप्रविष्टः तेन सह सदस्यस्य समुपहवः स्यात् न केवलं समुपहवो भक्षस्य तेनैव तुल्यः स्यात् ॥ ११ ॥

बीभत्सेयाताञ्चेन्नानाचमसौ स्याताम्* ॥ १२ ॥

---

* लाट्यायनेऽप्येवम् ।

† लाट्यायनेनैतेन सूत्रद्वयं कृतम् ।

133

यदि बीभत्सेयातां नाना चमसौ स्यातां बीभत्सा नाम घृणा स्यातामिति एतावेव चमसौ नाना स्याताम् अन्येषां तु सत्यामपि बीभत्सायां नैव नाना चमसः स्यात् ॥ १२ ॥

सर्पत्सु न शून्यं सदः कुर्यात्* ॥ १३ ॥

सत्त्रसंस्थासु सर्पणेषु सर्पत्सु ऋत्विग्यजमानेषु न सदस्यः शून्यं सदः कुर्यात् ॥ १३ ॥

तस्य दधिभक्षान्तं कर्म* ॥ १४ ॥

तस्य सदस्यस्य दधिभक्षान्तं कर्म भवति सौत्रम् ॥ १४ ॥

स निवर्त्तेत सत्त्रेषु* ॥ १५ ॥

स दधिभक्षतो निवर्त्तेत सत्त्रेषु सदस्यस्य कथं पुनरेतद्गम्यते यथा दधिभक्षतो निवर्त्तेत सदस्यस्य न सदस्य एवेति उच्यते सदस्यो हि सत्त्रोत्पादक एव आवर्त्तवाः सदस्या इति, ननूक्तमग्निष्टोमान्तमहःसत्त्रेष्विति सत्त्रेषु दधिभक्षप्राप्तिरेव नास्ति अग्निष्टोमान्तत्वादह्नाम् उच्यते, सविधिदर्शनाद्गुणामुक्तो न सदस्यस्य सदस्यस्य हि अविशेषेणोक्तं दधिभक्षान्तं कर्म एकाहाहीनसत्त्रेषु सोऽविशेषवचनप्राप्तो दधिभक्षः सत्त्रेषु विशेषवचनेन स निवर्त्तेत सत्त्रेष्विति ॥ १५ ॥

---

* द्राह्यायणोऽप्येवम्।

विसꣳस्थिते सवने पूर्वया द्वारान्तरेण होतुर्धिष्ण्यं मैत्रावरुणस्य च सञ्चरः* ॥ १६ ॥

विसंस्थिते अर्द्धसमाप्ते सवने अन्तरेण होतुर्धिष्ण्यस्य मैत्रावरुणधिष्ण्यस्य गत्वा पूर्वया द्वारा सदोनिष्क्रमणकर्मार्थमेव सञ्चरः ॥१६॥

तद्यथेतं तद्यथेतं* ॥ १७ ॥

तद्यथा गतं एवं सदसि सञ्चरः सिद्धो भवति नान्यत्प्रयोजनमस्ति अस्य सूत्रस्यारम्भे ॥ १६ ॥

इति द्वितीयस्य चतुर्थी कण्डिका ।

अथ पञ्चमी कण्डिका ।

चमसं प्रतिगृह्य प्रस्तोता दक्षिणऊरावाधाय दक्षिणेन पाणिनापिधायासीत* ॥ १ ॥

धिष्ण्योपस्थानमनुमन्त्रम् अनन्तरं चमसमुखीयांश्चमसानाहरन्ति अत उच्यते, चमसं प्रतिगृह्णीति चमसाध्वर्यव इति चमसः तत्र भक्षणीय-

---

* द्राह्यायणोऽप्येवम् ।

माषं प्रतिस्थस्व इति च जराबाधाय इति चैन पाणिनापिधायाधीत अपिधानमाच्छादनम् ॥ १ ॥

उपह्वयमानायामिडायामनूप धारयेदनुपघ्नन्* ॥ २ ॥

उपह्वयमानायामिडायान्तञ्चमसं इडाह्वानसमीपे धारयेदनुपघ्नन् अस्पृशन्। एष उपह्वानधर्मः प्राग्याजमानात् अग्निर्म्म इत्यादि ॥ २ ॥

वषट्कर्तुरनुभक्षं सर्वत्र भक्षयेयुर्मिथ उपहूय † ॥ ३ ॥

* वषट्कर्त्तरि भक्षितेऽस्मिंश्चमसे ततो भक्षयेयुः स्वं चमसं मिथः अन्योन्यमुपहूय, ननु वषट्कर्त्रा चमसं भक्षितं ततोऽनुभक्षयेदिति तदयुक्तं कुतः अन्विति कालापेक्षा न भक्षणप्राप्तिः मिथ उपहूय इत्येतस्माच्च यस्य भक्षणप्राप्तिः स एवोपहवं याचनीयः अनुज्ञार्थत्वात् उपह्वानस्य सर्वग्रहणाच्च केवलं चमसमुख्यानां सर्वेषाञ्चमसानां एष भक्षणधर्मः ॥ ३ ॥

उद्गाता प्रथमः† ॥ ४ ॥

चमसं भक्षयेत् असौ चमसः प्रस्तोत्रा प्रथमं प्रतिपन्नः अतोऽस्यैवा-

---

* प्राप्तायचोऽप्येवम्।

† प्राप्तावचे छेदविषये विशेषोऽस्ति।

नन्तरं भक्षणं प्राप्नोति अतः आद्योद्गाता प्रथम इति कथं भक्षयेदित्युच्यते ॥ ४ ॥

दक्षिणमनु बाहुन्दण्डं कृत्वा श्येन इत्यवेक्ष्येन्दविति द्विरल्पं भक्षयेद् यथासवनं छन्दाꣳस्यादिशन्* ॥ ५ ॥

दक्षिणं बाहुमनु चमसस्य दण्डं कृत्वा श्येन इत्यनेन यजुषा अवेक्ष्य सोमम् इन्दवित्यनेन द्विर्भक्षयेदल्पं क्रियाभ्यासे सकृन्मन्त्रः यद्यस्मिन्सवने छन्दो यथासवनं गायत्रच्छन्दस इति प्रातःसवने त्रिष्टुप्छन्दस इति माध्यन्दिने जगतीच्छन्दस इति तृतीयसवने एवमादिशन् ॥ ५ ॥

ऊर्द्ध्व इति मुख्यान् प्राणानभिमृशेत सोमरारन्धीति हृदयं सोमगोभिरिति नाभिम्¶ ॥ ६ ॥

ऊर्द्ध्व इत्यनेन यजुषा मुख्यान् प्राणानभिमृशेत मुखे भवा मुख्याः प्राणा इन्द्रियाणि, सोमरारन्धीत्यनेन यजुषा हृदयं सोमगोभिरित्यनेन नाभिम् अभिमृशेतेति वर्त्तते ॥ ६ ॥

एवमितरौ कुर्याताम्† ॥ ७ ॥

---

* द्राह्यायणोऽप्येवम् ।

¶ द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

† द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

एवमेव इतरौ प्रस्तोतृप्रतिहर्त्तारौ कुर्व्वातां ॥ ७ ॥

प्रतिहर्त्ता पश्चात्* ॥ ८ ॥

अथ तयोः कः क्रम इत्युच्यते, प्रतिहर्त्ता पश्चात् ॥ ८ ॥

तꣳ स आप्याययेदभिमृश्याप्यायस्वेति¶ ॥ ९ ॥

तं चमसं स प्रतिहर्त्ता आप्याययेत् अभिमृश्य आप्यायस्वेत्यनेन मन्त्रेण अयातयामार्थम् अथ मयक्षणं किमर्थमिति चेत् उच्यते, वक्ष्यति सुब्रह्मण्यचतुर्था उद्गातृचमसं भक्षयेयुः षट् चान्य इति तैरपि भक्षिते स एवाप्याययेत् प्रतिहर्त्ता ॥ ९ ॥

सर्व्वे वैतया गायत्र्या¶ ॥ १० ॥

सर्व्वे वा आप्याययेयुः आप्यायस्वेत्येतया गायत्र्या अथैतया गायत्र्येति किमर्थमिति चेत् उच्यते, संव्यवहारार्थं वक्ष्यति गायत्रीं त्रिर्ब्रूयुरिति गायत्र्येवानुसवनमाप्यायनमिति च ॥ १० ॥

तां तृतीयसवने त्रिर्ब्रूयुः सन्ने पयाꣳसीति माध्यन्दिने† ॥११॥

---

* माध्यायनेन सूत्रद्वयेनैकसूत्रं कृतम् ।

¶ माध्यायनेन द्वाभ्यामेकसूत्रं कृतम् ।

† माध्यायनेनैतेन सूत्रद्वयं कृतम् ।

तां गायत्रीं तृतीयसवने सोमाप्यायने विब्रूयुः सन्ते पयांसीत्येतयर्चा माध्यन्दिने आप्यायनं छन्दःसम्पदर्थम् ॥ ११ ॥

गायत्र्यैवानुसवनमाप्यायनमिति शाण्डिल्यः* ॥ १२ ॥

गायत्र्यैवाप्यायस्वेत्येतया सकृदुक्तया अनुसवनमाप्यायनमिति शाण्डिल्य आह ॥ १२ ॥

द्वितीयाः सवनेषु नाराशꣳसाः पूर्वयोश्च तृतीयौ¶ ॥ १३ ॥

द्वितीयाश्चमसाः सवनेषु त्रिष्वपि नाराशंससंज्ञाः पूर्वयोः सवनयोः प्रथमद्वितीययोस्तृतीयौ च ॥ १३ ॥

तेषामनवेक्ष्य भक्षणमवमैरिति प्रातःसवन ऊर्वैरिति माध्यन्दिने काव्यैरिति तृतीयसवने¶ ॥ १४ ॥

तेषां नाराशंसानामनवेक्ष्य भक्षणं यदेतच्चेन दृत्यवेक्षणं एतत्तेषां न स्यात् अवमैरित्येतदादिभिर्विकृतैरनुसवनं भक्षयेयुर्यथाक्रमम् ॥१४॥

पितृभिरिति सर्वत्रानुसꣳहरेत्† ॥१५॥

---

* द्राह्यायणे विशेषोऽस्ति ।

¶ द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

† द्राह्यायणोऽप्येवम् ।

पितृभिर्भक्षितस्येत्येतदादि सर्वत्रानुसंहरेत् सर्वेषु सवनेषु सर्वभक्षणं अन्येष्वपि मन्त्रेषु पितृशब्दमनुसंहरेत् अवमैश्च पितृभिरित्येतदादि ॥ १५ ॥

प्रत्यभिमर्शने यथाकामी* ॥ १६ ॥

यदेतदूर्ध्वं इति मुख्यान् प्राणानभिमृशेतेत्येतदादि प्रत्यभिमर्शनम् एतत् नाराशंसे कुर्यान्न वा अपरे वर्णयन्ति पितृभिरिति सर्वत्रानुसंहरेत् इत्यस्य पितृशब्दस्यानुसंहरेत् प्रत्यभिमर्शने यथाकामी इन्द्रशब्दस्य स्थाने पितृशब्दं वा कुर्यात् यथाम्नातमेवाभिमर्शनं कुर्यात् सर्वप्राप्तिमत्त्वार्थत्वादिन्द्रस्य ॥ १६ ॥

प्रथमद्वितीयौ पूर्वयोः सवनयोराप्याययेत् प्रथमं तृतीयसवने† ॥ १७ ॥

प्रथमद्वितीयौ चमसौ पूर्वयोः सवनयोः प्रातःसवनमाध्यन्दिनयोः आप्याययेत् प्रथमञ्चमसं तृतीयसवने आप्याययेत् ॥ १७ ॥

आवर्त्तिषु तृणे प्रतिगृह्य प्रस्तोता प्रयच्छेद्यथा प्रस्तरम्* ॥१८॥

आवर्त्तिस्तोत्रेषु तृणे प्रतिगृह्य प्रस्तोतोद्गात्रे प्रयच्छेत् यथा

---

* द्राह्यायणेऽप्येवम्।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम्।

प्रस्तरं येन प्रकारेण प्रस्तरदानं मन्त्रान् स्तोष्यामः प्रशास्तरिति प्रस्तोतृग्रहणं किमर्थमिति चेत् यथा प्रस्तरमित्यनेनैव सिद्धे यदा प्रस्तरस्य प्रस्तोतैव सम्प्रदाता अत्रोच्यते, यदाप्यन्यदुपाकरणद्रव्यं तदापि प्रस्तोतैव प्रयच्छेत् यथा वैरूपोपाकरणे व्यजनमरणी वैराजे महानाम्नीष्ववकामिश्रा आपः महाव्रते वाणः इत्येतदादि ॥ १८ ॥

अनाह्रियमाणयोर्न मन्त्रं जप्यात्* ॥ १९ ॥

अनाह्रियमाणयोस्तृणयोर्मन्त्रन्नोत्सृजेत् यदा तृणाभ्यामुपकरणम् ॥ १९ ॥

तथैव जङ्घामुपहत्य युञ्ज्यात् स्तोमन्दीक्षायै तपसो मनसो वाच इति नाना धानञ्जप्यो यत्रानन्तराणि चत्वारि † ॥२०॥

तथैव तेनैव प्रकारेणेत्यर्थः यथैव प्रस्तरेण बहिष्पवमाने उक्तं जङ्घामुपहत्य युञ्ज्यात् स्तोमं दीक्षायै वर्णेनेत्येतदादिभिः नाना पृथगित्यर्थः यत्र यस्मिन्ननन्तराणि चत्वारि स्तोत्राणि एवं धानञ्जप्य आचार्य आह ॥ २० ॥

अन्तः सर्वेषां प्रजापतिस्त्वेति* ॥ २१ ॥

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

यदेतत् प्रजापतिस्त्वेति सर्वेषामनन्तरमाम्नातम् एतत् प्रत्येकमनुषज्यते दीक्षायै वर्षेण प्रजापतिस्त्वा युनक्तु एवं सर्वेषु ॥ २१ ॥

उत्तरमुत्तरं लुप्येताऽल्पीयःसु* ॥ २२ ॥

अल्पीयःसु स्तोत्रेषु उत्तरमुत्तरं सोमयोजनं लुप्येत यथाग्निष्टोमे त्रीण्युत्तराणि लुप्तानि, अथ किमर्थमिदं सूत्रं आरभ्यते यदा निमित्तापाये नैमित्तिकस्याप्यपायो भविष्यत्येव उच्यते, सन्नियोगशिष्टान्येतानि सोमयोजनानि यत्रानन्तराणि चत्वारीति तत्राकाङ्क्षयेण संशयः स्यात्, अथाल्पीयःसु किमर्थमिति चेत् उच्यते प्रकारदर्शनार्थं कथम् अन्यत्रापि बहुष्वक्लृप्तेषु लोपप्राप्तौ उत्तरमुत्तरं लुप्येत यथा वैराजेऽग्निमन्थने आह, अभ्यात्मं प्रजननं कृत्वा त्रिःप्रदक्षिणमभिमन्थ्य गायत्रं छन्दोऽनु प्रजायस्व त्रैष्टुभं जागतमानुष्टुभं वैराजमिति गौतम इत्युक्त्वाह चतुर्भिरिति धानञ्जय्यस्त्रिभिरिति शाण्डिल्य इति तथा महाव्रताश्वारोहणं छन्दोभिरुक्त्वाह वैराजपञ्चमैरिति गौतमश्चतुर्भिरिति धानञ्जय्यस्त्रिभिरिति शाण्डिल्य इति अथाप्युत्तरमुत्तरं लुप्येताल्पीयःस्विति ॥ २२ ॥

प्रथमेन वाजपेयसाम्नो युञ्ज्यात्* ॥ २३ ॥

प्रथमेन मन्त्रेण वाजपेयसाम्नः सोमं युञ्ज्यात् षोडशिसाम्नः

---

* लाट्यायने विशेषोऽस्ति ।

प्रथमेन स्तोमयोजनं ज्ञातम् इत्यानन्तर्याद्द्वितीयस्य प्राप्तिः तन्माभूदित्यत आह प्रथमेनेति ॥ २३ ॥

तत्प्रभृतीनि रात्रौ* ॥ २४ ॥

प्रथमप्रभृतीनि रात्रौ स्तोमयोजनानि भवन्ति षोडशिमत्यतिरात्रे द्वितीयप्रभृतीनि रात्रौ प्राप्नुवन्ति तत्प्रतिषेधार्थमाह प्रथमप्रभृतीनि रात्राविति ॥ २४ ॥

तथातिरिक्तस्तोत्रेषु* ॥ २५ ॥

तथैवातिरिक्तस्तोत्रेषु प्रथमप्रभृतीत्येव सन्धेरनन्तरत्वात्तत्रापि द्वितीयप्रभृतिप्राप्तौ तथेत्युक्तम् ॥ २५ ॥

सर्वैरेकैकं यथाम्नायꣳ शाण्डिल्यः* ॥ २६ ॥

सर्वैर्होत्राये वर्त्मेत्येतदादिभिरेकैकस्मिन् स्तोत्रे यथाम्नातैः स्तोमयोजनं स्यात् यथापाठमित्यर्थः यथाम्नायग्रहणं विकृतैर्माभूदिति ॥२

आवर्तिन्यायः सन्धौ* ॥ २७ ॥

आवर्तिस्तोत्रेषु यो न्यायः स्तोमयोजनादीनां स सन्धौ स्यात् कुतः संशयः पराक्त्वात्सन्धेः ॥ २७ ॥

---

* द्राह्यायणपाठोऽप्येवम् ।

143

उपवसथ्येऽहनि न समामनेरन्* ॥ २८ ॥

उपवसथ्येऽहनि चतुर्दश्यां समाम्नानं न कुर्युः क्व पुनः समाम्नानं प्राप्तमुपवसथ्येऽहनि निषिध्यत इति उच्यते, स्तोत्रगतस्य साम्नः पादविच्छे भक्तिष्वाचार्याणां अनेकधा प्रतिपत्तिः तद्यथादावेकः कल्पोमाम्नीक्रियते तदा स्तोत्रकाले भक्तीः प्रति अन्योऽन्येन विप्रतिपत्तिः स्यात् स चान्यायः तदेवं माभूदित्यत आदावेवोद्गातुः कल्पो य इष्टः स सम्प्रतिपत्तव्यः अतोऽर्थं समाम्नानमादावेव कर्त्तव्यं स्यात् तस्योपवसथ्येऽहनि प्रतिषेधः ॥ २८ ॥

इति द्वितीयस्य पञ्चमी कण्डिका ।

अथ षष्ठी कण्डिका ।

प्रस्तोता तु कुशाः कारयेद् यज्ञियस्य वृक्षस्य खदिरस्य दीर्घसत्रेष्वेके प्रादेशमात्रीः कुशाः पृष्ठात्त्वक्ताः समामञ्जनतोऽङ्गुष्ठपर्वपृथुमात्रीः प्रज्ञाताग्राः कारयित्वा गन्धैः प्रलिप्य

---

* साम्नायशोऽध्येयम् ।

सर्पिषा सत्त्रेष्वेके वैष्टुतेन वसनेन परिवेष्ट्य क्षौमशाणकार्पाशानां केनचिदुपर्यौदुम्बर्या वासयेत्* ॥ १ ॥

कर्मैतद्यदुक्तं उपवसथ्येऽहनि न समामनेरन्निति किन्तु प्रस्तोता तु कुशाः कारयेत् तुशब्दो विशेषणार्थः उपवसथ्य एवाहनि प्रस्तोता कुशाः कारयेत्, कारयेदित्यन्यं कुशानां कर्त्तारं शायति, यज्ञियस्य वृक्षस्य यज्ञमर्हतीति यज्ञियः यज्ञियस्य वृक्षस्येत्यवयवलक्षणा षष्ठी खदिरस्य दीर्घसत्त्रेष्वेके एके आचार्या मन्यन्ते दीर्घसत्त्रेषु खादिर्यः कुशाः स्युरिति किं कारणं दारुप्राधान्यात् प्रादेशमात्र्यः प्रादेशप्रमाणाः कारयेत् कुशपृष्ठास्त्वचः आकृतिरुच्यते त्वचं प्रति कुशपृष्ठाः स्युः समा मज्जतः मज्जां प्रति समाः स्युः अङ्गुष्ठपर्वपृथुमात्र्यः पृथुत्वेनाङ्गुष्ठपर्वमात्राः स्युः प्रज्ञाताग्राः कारयित्वा प्रज्ञातानि अग्राणि यथा भवन्ति तथा कारयेत् ननु कारयित्वेति किमर्थं यदा प्रस्तोता तु कुशाः कारयेदिति प्रकृत एव करणे उच्यते प्रणाशे कुशानां भङ्गे वा पुनरन्याः कारयित्वा प्रयुञ्जीत नान्यत् प्रायश्चित्तमस्ति गन्धैः प्रलिप्य कुशाः सर्पिषा सत्त्रेष्वेके एके आचार्याः सत्त्रेषु सर्पिषा प्रलेपं मन्यन्ते वैष्टुतेन वसनेन परिवेष्ट्य विष्टुतीषु योजितं वैष्टुतं तेन वाससा सर्वतो वेष्टयित्वा क्षौमशाणकार्पाशानां केनचित् क्षुमायाः विकारः क्षौमं शणस्य विकारः शाणं कार्पाशानां विकारः कार्पाशम् एतेषां वाससामेकेन वेष्टयित्वा औदुम्बर्याः सादस्याः शालाया उपविष्टाद्वासयेत् ॥ १ ॥

---

* द्राह्यायणेनैतेन सूत्रचतुष्टयं कृतम्. तत्र विशेषोऽप्यस्ति ।

ताञ्च श्वोभूते कुशैरूर्द्ध्वाग्रैर्वेष्टयित्वैवंजातीयेनैव वसनेन प्रदक्षिणमूर्द्ध्वदशेन परिवेष्ट्य स्पृष्टोऽनपश्रित उद्गायेत्* ॥ २ ॥

तामौदुम्बरीं स एव श्वोभूत इत्येवं ब्रुवते तस्मिन् भूते स्तोत्रकाले कुशैरूर्द्ध्वाग्रैर्वेष्टयित्वैवंजातीयेनैव वसनेन यज्जातीयं वैष्टुतं प्रदक्षिणमूर्द्ध्वदशेन परिवेष्ट्य प्रदक्षिणमिति नियमः क्रियते न प्रसव्यम् ऊर्द्ध्वदशेन नाधोदशेन परिवेष्ट्य सर्वतो वेष्टयित्वा स्पृष्टः अनपश्रित उद्गायेत् वक्ष्यति कारणं धिष्ण्योऽयं भवति न धिष्ण्यमासादयेदिति ॥ २ ॥

धृष्टमपश्रयेतेत्येके¶ ॥ ३ ॥

धृष्टं प्रगल्भं स्वल्पमित्यर्थः अपश्रयेत इत्येके तावता अपश्रयणार्था इयं भवतीभिः सएव तदूर्जिश्रित इति ॥ २ ॥

स्तोष्यमाणानां मध्ये वैष्टुतं वसनं प्राक्समासं वोदक्समासं वा उपरिदशमास्तीर्य्य प्रस्तोता कुशा विदध्यात् प्रस्तावान्तेषु † ॥ ४ ॥

स्तोष्यमाणानामिति प्रत्युपस्थितं कालं ज्ञापयति स्तोष्यमाणानां

---

* द्राह्यायणेऽप्येवम् ।

¶ द्राह्यायणे विशेषोऽस्ति, अधिकोऽप्यस्ति ।

† द्राह्यायणेऽधिकमस्ति ।

स्तोत्रकर्त्तॄणां मध्ये विष्टुतिप्रयोजनं वसनं द्विगुणं कृत्वा प्राक्समासं वा दशान्तपाशान्तयोः संश्लेषः समासः तं समासं प्राङ्मुखम् उदङ्मुखं वा कृत्वा उपरिदशमास्तीर्य्य प्रस्तोता कुशानां विन्यासं कुर्य्यात् प्रस्तावान्तेषु ॥ ४ ॥

आद्येऽनेकप्रस्तावेषु* ॥ ५ ॥

अनेकप्रस्तावेषु सामसु महादिवाकीर्त्त्यैलान्दमहानाम्न्यादिषु सामसु आद्ये प्रस्तावे कुशाः प्रास्थापयेत् ॥ ५ ॥

उदगग्रं प्रथमं विष्टावं प्राक्सꣳस्थं प्रत्यग्वा* ॥ ६ ॥

उदगग्राभिः कुशाभिः प्रथमं विष्टावं विदध्यात् प्रागपवर्गं प्रत्यगपवर्गं वा ॥ ६ ॥

तं पश्चिमेन मध्यदेशेनोदक्सꣳस्थं प्रागग्रं प्रत्यग्वा* ॥७॥

तस्य प्रथमस्य विष्टावस्य पश्चिमे प्रदेशे द्वितीयं विष्टावं विदध्यात् उदक्संस्थं प्रागग्रं प्रत्यगग्रं वा ॥ ७ ॥

तं पश्चिमेनोदगग्रं प्रत्यक्सꣳस्थमेवं विधाः पर्य्याया उत्तरोत्तराः † ॥ ८ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

147

तस्य द्वितीयस्य विष्टावस्य पश्चिमे प्रदेशे तृतीयं विष्टावं विदध्यात् एवमेकः पर्यायो भवति तस्य प्रथमस्य पर्यायस्य उत्तरे प्रदेशे द्वितीयः तस्याप्युत्तरे तृतीयः, ननु किमिदं बहुवचनम् एवं विधाः पर्याया उत्तरोत्तरा इति यावत् यावता उक्त एकः पर्यायः अन्यौ द्वौ विधेयौ उच्यते, बहुवचनं चतुष्टोमार्थं वक्ष्यति चतुष्टोमयोश्चतुष्पर्याया इति अन्यो च पञ्चदशादिषु स्तोमेषु नानापर्यायविष्टावाः स्युः ॥ ८ ॥

पर्यायविष्टावान्सन्दध्यात्* ॥ ९ ॥

पर्यायांश्च विष्टावांश्च सन्दध्यात् संहतान् कुर्यात् संलग्नान् कुर्यात् ॥ ९ ॥

पर्यायादिषु हिंकारेण स्तुवीरन् † ॥ १० ॥

पर्यायस्यादौ हिंकृत्य स्तुवीरन् ननु तत् किमिदमारभ्यते यदा प्रतिपर्यायं हिंकार आम्नात एव ब्राह्मणेन तिसृभ्यो हिंकरोतीत्येवमादि, उच्यते कृतपर्यायेषु स्तोमेषु तदाम्नातम् अकृतपर्यायेषु चतुष्पर्यायादिषु च संशयः स्यादत एवमारभ्येत ॥ १० ॥

उत्तमां प्रस्तुत्यैषेति प्रशंसितारमीक्षेत* ॥ ११ ॥

स्तोत्रस्य उत्तमां स्तोत्रीयां प्रस्तुत्य प्रस्तावं कृत्वा प्रस्तोता एषेति

---

* शाट्यायने विशेषोऽस्ति ।

† शाट्यायनेऽप्येवम् ।

स्तुवन् शंसितारमीक्षते कालप्रज्ञापनार्थं स्तोतॄणाम् उत्तमं प्रतिहारं प्रत्याक्रयन्तीति श्रुतेः तत्प्रज्ञापनार्थं तच्चर्यैषोत्तरमेवेति ॥ ११ ॥

स्तुतस्य स्तुतमसीति यजमानवाचनम्* ॥ १२ ॥

स्तुतस्य स्तुतमसीत्येतद् यजुः यजमानवाचनमावर्त्तिस्तोत्रेषु ॥१२॥

सवनसंस्थासु प्रशास्त्रोक्तो यथेतमपरया द्वारा निष्क्रम्य पश्चिमेनाग्नीध्रीयं बहिर्वेदि मूत्रं कुर्युः* ॥ १३ ॥

सवनसंस्थासु सवनसमाप्तिष्वित्यर्थः प्रशास्त्रा सर्पतेत्युक्ताः यथेतं यथागतं दक्षिणेनौदुम्बर्य्या गत्वा अपरया द्वारा निष्क्रम्य पश्चिमया पश्चिमेनाग्नीध्रीयं बहिर्वेदि मूत्रं कुर्युः वेदेर्बहिः मूत्रं कुर्युः यदि मूत्रिताः स्युः न नियमः अवधिरुपदिश्यते मूत्रोच्चारयोः अथ किमर्थं बहिर्वेदीति कुतः संशयः यथान्तर्वेदिमूत्रोच्चारयोः क्रिया स्यादिति उच्यते, बहिर्वेदिग्रहणं देशप्रकर्षार्थं न वेदेः समीपदेशे प्रसक्ते स्यादिति अथ बहुवचनं किमर्थं सवनसंस्थास्विति यदा प्रातः- सवनमाध्यन्दिनयोरेव सवनयोः सर्पणं भवति तृतीयसवनसमाप्तौ नि सर्पणं मत् किमिदं बहुवचनमिति उच्यते, एतदर्थं बहुवचनं क्रियत सवनसमाप्तौ संस्थासु चेति कथं संस्थासमाप्तौ च सर्पणं स्यादि यथा अतिरात्रे अग्निष्टोमान्ते सर्पणम् उक्थ्येषु तच्छस्त्रेषु च समाप्ते सर्पणं स्यात् षोडशिनि स्तुते अनुशस्ते सर्पणम् अप्तोर्याम्यप्येवमेव ॥१

---

* आश्वलायनोऽप्येवम् ।

वाचं यच्छेयुर्यावदुदक्याः स्युः* ॥ १४ ॥

उदकमर्हतीत्युदक्याः यावदकृतशौचाः स्युस्तावद्वाग्यमनं कुर्युः आ उपस्पर्शनात् ॥ २४ ॥

एतन्मृगतीर्थम्* ॥ १५ ॥

यदेतदुक्तं पश्चिमेनाग्नीध्रीयमिति एतस्य संज्ञेयं मृगतीर्थमिति मार्गतामेतत्तीर्थं यद्यर्थिनो भवन्ति निर्गमने अन्ये ब्रुवते मृगतीर्थमिति उक्तम् आग्राम्यान् पशून् लभन्ते आरण्यान् सृजन्तीति तदारण्यानां पशूनामनेनोत्सर्जनमिति ॥ १५ ॥

तेन न भूयः शम्यापरासाद्गच्छेयुः* ॥ १६ ॥

तेन मृगतीर्थेन निष्क्रम्य शम्यापरासात्परतो न गच्छेयुः ॥ १६ ॥

यो भूयो जिगमिषेदाम्नानेन स गच्छेत्* ॥ १७ ॥

शम्यापरासात् परतो यः प्रकृष्टतरं देशं गन्तुमिच्छेत् आम्नानेन तीर्थेन निष्क्रम्य स गच्छेत् ॥ १७ ॥

इति द्वितीयस्य षष्ठी कण्डिका।

---

* शाट्यायनोऽप्येवम्।

अथ सप्तमी कण्डिका ।

अथ धिष्ण्यानुपतिष्ठेरन् समस्तेनोत्तरयोः सवनयोरिति गौतम शाण्डिल्यायनौ* ॥ १ ॥

उक्तं सवनसंस्थासु प्रशास्त्रोक्ता यथेतमपरया द्वारा निष्क्रम्य पश्चिमेनाग्नीध्रीयं बहिर्वेदि मूत्रं कुर्युरिति तद्यदि तावन्निष्क्रमणानन्तरं मूत्रोच्चारे कुर्वन्ति ततः कृतशौचा आचान्तोदकाः यदिदमादेक्ष्यते तत् कुर्युः अथ मूत्रोच्चारे नैव कुर्युः तदा यथोक्तेन विधिना निष्क्रम्यानन्तरं धिष्ण्यानुपतिष्ठेरन् समस्तेन उक्तं तत्रैव तिष्ठन्तः सर्वांश्च सम्प्रेक्षमाणाः पातमेति एतत् समस्तोपस्थानम् अनेनोत्तरयोः सवनयोरुपतिष्ठेरन् एवं गौतम शाण्डिल्यायनावाचार्यावाहतुः ॥ १ ॥

सर्वेणेति धानञ्जप्यः† ॥ २ ॥

आहवनीयोपस्थानादारभ्य प्रत्येकं सर्वेण धिष्ण्युपस्थानविधिना उपतिष्ठेरन्निति धानञ्जप्य आचार्य आह ॥ २ ॥

अनुपस्थानं शाण्डिल्यः† ॥ ३ ॥

न उपस्थानमनुपस्थानं एतस्मिन्नेव काले शाण्डिल्य आचार्योऽनुपस्थानं मन्यते ॥ ३ ॥

---

* द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

† द्राह्यायणेऽप्येवम् ।

एवमेव निष्क्रम्य पृथक् स्तोत्रेभ्यः समस्तेनोपतिष्ठेरन्यान्यूर्द्ध्वमुक्थेभ्यः* ॥ ४ ॥

एवमेव निष्क्रम्य यथासवनसंस्थासु इत्युक्तम् पृथक् स्तोत्रेभ्यः पृथक्स्थानेत्यर्थः तदर्थं समस्तेनोपतिष्ठेरन् यान्यूर्द्ध्वमुक्थेभ्यः कतमानि पुनस्तानि पृथक्स्तोत्राणि यदर्थमिदमुच्यते यथा षोडश्यर्थे वाजपेयसामार्थे चोक्तमेवं सर्पणं संस्थास्विति वक्ष्यति च पर्यायेभ्यस्तु रात्रेरिति उच्यते, यथा षोडश्यर्थे तथातिरिक्तस्तोत्रेषु च स्तोत्राय स्तोत्राय सन्ध्यर्थे सर्पणं स्यादिति ॥ ४ ॥

पर्यायेभ्यस्तु रात्रेः* ॥ ५ ॥

रात्रौ तु पर्यायादौ सर्पणं स्यादिति न पृथक् स्तोत्रेभ्यः एतदर्थं तुशब्दः ॥ ५ ॥

यथासनमुपविश्य प्रस्तोता हविर्द्धानं गच्छेन्मध्यन्दिने* ॥ ६ ॥

धिष्ण्योपस्थानानन्तरं द्वारबाहुसंमार्जनप्रभृति सर्वं कृत्वा यदस्य स्वमासनं तस्मिन् यजुषोपविश्य प्रस्तोता हविर्द्धानं गच्छेन्मध्यन्दिने कर्मार्थमुक्तम् एतत् सर्वं कुर्यादुत्तरयोः पवमानयोरिति ॥ ६ ॥

---

* द्राह्यायणेऽप्येवम् ।

हुत आदित्यग्रहे प्रतिहर्त्तार्भवे* ॥ ७ ॥

हुते आदित्यग्रहे प्रतिहर्त्ता हविर्द्धानं गच्छेत् आर्भवे कर्मार्थम् ॥७॥

उभयत्र सर्वे सत्त्रेषु* ॥ ८ ॥

उभयोः पवमानयोरुत्तरयोः हविर्द्धानं गच्छेयुः सत्त्रेषु सर्वउद्गातारो यजमानत्वात् ॥ ८ ॥

पवमानयोरुत्तरयोर्धिष्ण्यविहरणे मार्ज्जालीयꣳ हरन्तः पश्चिमेन यजमानꣳ हृत्वा तेनैव प्रतिहरेयुः* ॥ ९ ॥

पवमानयोरुत्तरयोर्मध्यन्दिनार्भवयोर्धिष्ण्येष्वग्निविहारे मार्जालीयमग्निं हरन्तः पश्चिमेन यजमानस्य हृत्वा तेनैव पुनर्नयेयुः अव्यवायार्थम् उद्गातॄणामनेन कर्मणा कः सम्बन्ध इति चेत् उच्यते उक्तं याजमानमन्त्रत्वे चेदुद्गाता कुर्यादिति तत्र सम्बन्धः ॥ ९ ॥

मध्यन्दिनेन स्तुत्वा सत्त्रेषु दधिघर्मस्य भक्षयेयुः समुपहूय दधिक्राव्ण इति* ॥ १० ॥

माध्यन्दिनेन पवमानेन स्तुत्वा सत्त्रेषु दधिघर्मस्य एकदेशं भक्षयेयुः सर्वे समुपहूय न मिथः दधिक्राव्ण इत्येतयर्चा ॥ १० ॥

---

* द्राह्यायणेऽप्येवम् ।

तस्या उत्तमं पदं दशमेऽहन्यभ्यस्येयुः* ॥ ११ ॥

तस्या ऋचः दशमेऽहनि माचिके उत्तमं पदं अभ्यस्येयुः पुनर्ब्रूयुः अनुष्टुप्पारोचार्थम् अथ तस्या इति किमर्थं प्रकृतैव सा उच्यते दशमेऽहनि तार्त्तीयसवनिके दधिभक्षे तस्या ऋचः उत्तमाभ्यासः स्यात् हेतुसमत्वात् तन्माभूदिति ॥ ११ ॥

पूर्वेण पत्नीशालामन्तरेणाग्नीध्रीयꣳ सदश्च दक्षिणा नयेयुस्तीर्थेन* ॥ १२ ॥

पूर्वेण पत्नीशालां गमयित्वा आग्नीध्रीयसदसोरन्तरेण दक्षिणा नयेयुः आम्नानेन तीर्थेन ॥ १२ ॥

सर्वासान्देवस्य त्वेति पुरस्ताज्जपः* ॥ १३ ॥

सर्वासां दक्षिणानां देवस्यत्वेत्येतदादि मन्त्रः पुरस्ताज्जपः स्यात् ननु सर्वासामिति किमर्थं दक्षिणानामिति बहुवचनात् सिद्धेः उच्यते, उक्तं पूर्वेण पत्नीशालामन्तरेणाग्नीध्रीयं सदश्च दक्षिणा नयेयुस्तीर्थेनेति, अनुच्यमाने एतस्मिन्ननेन दक्षिणापथेन नयनं यासान्तासामेवैष पुरस्तात् स्यात् नान्यासामिति तन्माभूदित्यत आरभ्यते सर्वासामिति कथं यास्व न नीयन्ते सर्वासामेव पुरस्ताज्जपः स्यादिति

---

* द्राह्यायणेऽप्येवम् ।

यथा निमित्तं धान्यपल्यम् उदीचीमुद्गात्रे मुख्येभ्यो ग्रामवरान्ददतीत्येतदादि ॥ १३ ॥

वरुणस्त्वेति यथादेवतं प्रतिगृह्णीयात्* ॥ १४ ॥

वरुणस्त्वेत्येतदादि यजुर्जपित्वा यथादेवतं प्रतिगृह्णीयात् यथा दक्षिणाया देवतां नाम्नोद्दिश्य यथा वरुणायाश्वमिति ॥ १४ ॥

यथाजाति मृगान्* ॥ १५ ॥

प्रतिगृह्णीयादिति वर्त्तते या यस्य जातिस्तामादिश्य यथावयवे मृगमिति ॥ १५ ॥

अप्राणञ्च † ॥ १६ ॥

अप्राणञ्च यद्द्रव्यं तच्च यथाजाति प्रतिगृह्णीयात् न प्राणिति तदप्राणम् अनिन्द्रियमित्यर्थः ॥ १६ ॥

पुंवन्मिथुनान्यन्यत्राजाभ्यः* ॥ १७ ॥

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणे विशेषोऽस्ति ।

पुंवन्मिथुनानि गृह्णीयात् यथा अश्वस्याश्वो वाश्वा पुरुषस्य पुरुषी च पुरुषो अन्यत्राजाभ्यः अजांस्तु मिथुनधर्मेण न प्रतिगृह्णीयात् नानादेवतात्वात् अन्यैवाजाया देवता अन्यैवाजस्य अग्नयेऽजम् अग्निषोमाभ्यामजामिति ॥ १७ ॥

तेन क इदमित्युपरिष्टाज्जपः* ॥ १८ ॥

सावित्रादेर्दक्षिणाप्रतिग्रहमन्त्रस्य तेनामृतत्वमशीय क इदं कस्मा अदादित्युपरिष्टाज्जपः ॥ १८ ॥

तत्रोह्यापादीनि त्वा देवि दक्षिणेऽद इति च यत् तत् स्यात् तेन दात्र इदमाविशैतन्त इति च भुञ्जतीति च भूयाद्धिꣳसीरिति च† ॥ १९ ॥

तत्र तस्मिन् दक्षिणाप्रतिग्रहणे ऊह्यापादीनि ऊहमापद्यन्ते ऊह्यापादीनि ऊहितव्यं व्यक्तिवचनैः का व्यक्तिः स्त्रीपुंनपुंसकादिवचनमेकत्वद्वित्वबहुत्वानि ननु अधिकृते मन्त्रे तत्रेति किमर्थम् उच्यते, ऊहनित्यतादर्शनार्थं तत्र तस्मिन् मन्त्रे सति ऊहमेतान्यापद्यन्ते त्वां देवि दक्षिणे अद इति च यत् तत् स्यात् तेन दात्रे

---

* शाट्यायनेऽप्येवम्।

† शाट्यायनेनैतेन सूत्रद्वयं कृतम्।

इदं आविश एतत्ते इति च भुञ्जतीति च भूयात् हिंसीरिति च ऊहो वक्ष्यते देवस्य त्वा देवस्य वां देवस्य वः, वरुणस्त्वा नयतु देवि दक्षिणे, वरुणो वां नयतु देव्यौ दक्षिणे वरुणो वो नयतु देव्यो दक्षिणाः वरुणायाश्वं वरुणायाश्वौ वरुणायाश्वान् वरुणायाश्वे वरुणायाश्वाः, तेनामृतत्वमशीय ताभ्याममृतत्वमशीय तैरमृतत्वमशीय तयामृतत्वमशीय ताभ्याममृतत्वमशीय ताभिरमृतत्वमशीय, वयःशब्दस्य भूयाच्छब्देन सह सामानाधिकरण्यं तद्यद्यप्ययं ऊहपदेषु न परिसंख्यातः तथाप्यूहयितव्यः भूयाच्छब्देन सामानाधिकरण्यात् वयोदात्रे भूयात् वयसी दात्रे भूयास्तां वयांसि दात्रे भूयासुः वयोदातृभ्यां भूयात् वयसी दातृभ्यां भूयास्तां वयांसि दातृभ्यां भूयासुः वयोदातृभ्यो भूयात् वयसी दातृभ्यो भूयास्तां वयांसि दातृभ्यो भूयासुः, क इदं कस्मा अदात् क इमे कस्मा अदात् क इमानि कस्मा अदात् क इमं कस्मा अदात् क इमौ कस्मा अदात् क इमान् कस्मा अदात् क इमां कस्मा अदात् क इमे कस्मा अदात् क इमाः कस्मा अदात्, समुद्रमाविशेत् समुद्रमाविशेतां समुद्रमाविशन् द्विवचनबहुवचनयोर्लङ् आदेशात् सूत्रविधानात्, कामैतत्ते कामैते ते कामैतानि ते कामैष ते कामैतौ ते कामैते ते कामैषा ते कामैते ते कामैतास्ते, कामाय भुञ्जती भुञ्जत्यौ भुञ्जत्यः मा मा हिंसीः मा मा हिंसिष्टम् मा मा हिंसिष्ट ॥ १९ ॥

अश्वरथश्चेद्दद्यात् पूर्वेणाग्नीध्रीयमवस्थाप्य पुरस्ताज्जपं जपित्वा दर्भमुष्टिनाश्वमुखानि संमृज्याद् द्वाभ्यां द्वाभ्यामश्व

नामभ्यामेकैकस्याश्वोऽसीत्येतत्प्रभृतिभिरुदक्सꣳस्थमिति धानञ्जप्यः* ॥ २० ॥

यद्यश्वरथं दद्याद् यजमानः तमश्वरथमुद्गाता आग्नीध्रीयस्य पूर्वे प्रदेशे समीपे स्थापयित्वा पुरस्ताज्जपञ्जपित्वा पुरस्ताज्जप उक्तः देवस्य त्वेति दर्भमुष्टिनाश्वमुखानां संमार्जनं कुर्यात् द्वाभ्यां द्वाभ्यामश्वनामभ्यां एकैकस्याश्वस्य अश्वोऽसीत्येतत्प्रभृतिभिरश्वनामभिः उदक्संस्थं दक्षिणोपक्रमम् एवं धानञ्जप्य आचार्य आह ॥ २० ॥

धुर्य्यौ प्रथममित्यपरम् † ॥ २१ ॥

धुरि युक्तौ धुर्यौ अश्वौ तौ प्रथमं संस्कुर्यादित्यपरं विधानम् ॥२१॥

दक्षिणं पूर्वम् † ॥ २२ ॥

दक्षिणस्यान्धुरि योयुक्तस्तं पूर्वं संस्कुर्यात् पश्चादुत्तरमिति ॥२२॥

तथा प्रष्टी † ॥ २३ ॥

यथा धुर्यौ तेनैव क्रमेण प्रष्टी संस्कुर्यात् पार्श्ववर्त्तिनौ प्रष्टी ॥२३॥

सर्वाण्येकैकस्मिन् उदक्सꣳस्थमिति प्रापिङ्मन्त्राः † ॥२४॥

---

* भाष्याचार्येणैतेन सूत्रद्वयं कृतम् ।

† भाष्याचार्योऽप्येवम् ।

सर्वाण्यश्वनामानि अष्टावपि एकैकस्मिन्नश्वे प्रयुञ्जीत दक्षिणादारभ्यानन्तर्येण उदक्संस्थमिति शाण्डिल्य आचार्य आह ॥ २४ ॥

सर्वाण्येकस्मिꣳस्तूष्णीमितराणीत्यपरम्* ॥ २५ ॥

सर्वैरष्टाभिरश्वनामभिरेकाश्वस्य दक्षिणस्य मुखं संमृज्यात् तूष्णीमितराणि संमृज्यात् उदक्संस्थमेव इत्यपरं विधानम् ॥ २५ ॥

एतान्येवाश्वाश्वतरेष्वश्वतरीषु च यथार्थमूहेत्* ॥ २६ ॥

एतान्येवाश्वनामानि अश्वासु अश्वतरेषु च अश्वतरीषु च यथार्थं मूहेत् यद्यश्वाभिर्युक्तः स्यात् अश्वतरैर्वा अश्वतरीभिर्वा तत्र तत्र यथासम्भवमूहेत् ऊह उच्यते अश्वासि अन्त्यासि मय्यसि हयासि वाजिन्यसि सप्तिन्यसि वृष्ण्यसि अर्वत्यसि इति अश्वतरोऽसि शेषाण्यश्ववत् अश्वतर्यसि शेषाण्यश्वावत् ॥ २६ ॥

त्रिभिश्चेदर्द्धान्येकस्मिन्नर्द्धानि द्वयोर्द्वैधन्द्वयोः* ॥ २७ ॥

त्रिभिश्चेद्युक्तो भवति अर्द्धान्येकस्मिन् प्रयुञ्जीत अर्द्धानि द्वयोः द्वे द्वे नामनी पूर्वोक्तेनैव क्रमेण द्वैधन्द्वयोः यदि द्वाभ्यां युक्तो भवति तदा द्विधा नामानि विभज्य युञ्जीत पूर्वोक्तेनैव क्रमेण ॥ २७ ॥

इति द्वितीयस्य सप्तमी कण्डिका ।

---

* द्राह्यायणेऽप्येवम् ।

159

अथ अष्टमी कण्डिका।

आदित्यानामिति रथशिर आलभ्य जपेत्* ॥ १ ॥

आदित्यानामित्येतद्यजुः रथशिर आलभ्य जपेत् शिरःप्रष्टीरथकारेभ्यो ज्ञेया ॥ १ ॥

यद्रथ्यं स्याद्वायोरिति चर्मण्यं प्रतिगृह्णीयात् † ॥ २ ॥

रथस्येदं रथ्यं यत्किञ्चिद्रथाङ्गं चर्मण्यं चर्मणा निर्वृत्तं चर्मण्यं तद्वायोष्ट्वेत्यनेन यजुषा प्रतिगृह्णीयात् ॥ २ ॥

नक्षत्राणामित्यस्थिमयम् † ॥ ३ ॥

यदस्थिमयं रथ्यं तन्नक्षत्राणामित्यनेन यजुषा प्रतिगृह्णीयात् ॥३॥

सूर्य्यस्येत्ययो लोहं † ॥ ४ ॥

सूर्यस्येत्यनेन यजुषा कार्ष्णायसं यत्स्यात् रथ्यं ताम्ररजतकांस्यरीतिकादिभ्यो लोहेभ्यो निर्वृत्तं तत् प्रतिगृह्णीयात् ॥ ४ ॥

हिरण्यञ्च † ॥ ५ ॥

---

* द्राह्यायणोऽप्येवम्।

† द्राह्यायणेन चतुर्भिरेकसूत्रं कृतम्।

अनेनैव मन्त्रेण प्रतिगृह्णीयात् यद्द्रव्यं वक्ष्यति हिरण्यमिति जातरूपं प्रतिगृह्णीयादिति मन्त्राम्नानसामर्थ्यादेतस्मिन् क्रमेण द्रव्यदेवतोपदेशः कृतः प्रतिग्रहविधिस्तु प्रकरणे एव वक्ष्यते साम्प्रतं रथशिर आलभ्यानन्तरम् ॥ ५ ॥

दक्षिणेन रथं गत्वा रथन्तरमसीति दक्षिणं चक्रमालभेत्* ॥ ६ ॥

दक्षिणेन रथस्य गत्वा रथन्तरमसीत्यनेन यजुषा दक्षिणं चक्रमालभेत् ॥ ६ ॥

वामदेव्यमसीत्यधिष्ठानम्* ॥ ७ ॥

वामदेव्यमसीत्यनेन यजुषा अधिष्ठानमालभेत् रथमारुह्य रथी यत् स्थानमधितिष्ठति तदधिष्ठानम् ॥ ७ ॥

बृहदसीत्युत्तरं चक्रम्* ॥ ८ ॥

बृहदसीत्यनेन यजुषोत्तरं चक्रमालभेत् ॥ ८ ॥

अङ्कान्यङ्कू इति चक्रे एव संमृज्यात्* ॥ ९ ॥

अङ्कान्यङ्कू इत्यनेन यजुषा चक्रयोः संमार्जनं कुर्यात् एवेति प्रवृत्तावधारणं क्रियते ॥ ९ ॥

---

* द्राह्यायणेऽप्येवम् ।

वैश्वानर इति दक्षिणेन पादेनारोहेत्* ॥ १० ॥

वैश्वानर इत्यनेन यजुषा दक्षिणेन पादेन प्रथममारोहेत् ॥१०॥

आरुह्य जपेद्गिदैषत इति* ॥ ११ ॥

उभाभ्यामारुह्य गिदैषत इत्येतद् यजुर्जपेत् ॥ ११ ॥

क्ष्मेति सव्यानभीशूनायच्छेत्* ॥ १२ ॥

क्ष्मेत्यनेन यजुषा यौ रथस्य सव्ये पार्श्वेऽश्वौ तयोरश्मीनायच्छेत आयतान् कुर्यात् रश्मीनिति बहुवचनमुभयतो रश्मयोभवन्त्यश्वानाम् ॥ १२ ॥

दासेति दक्षिणानवगृह्णीयात्* ॥ १३ ॥

दासेत्यनेन यजुषा दक्षिणयोरश्वयोरश्मीनवगृह्णीयात् अवग्रहणमात्रं नात्यन्तं गच्छेत् ॥ १३ ॥

अवरुह्य सकृद्वारुणमुक्त्वा यथा देवतमादिश्योपरिष्टाज्जपं जपेदिति गौतमः* ॥ १४ ॥

अवतीर्य्य रथात् सकृद्वारुणं यजुरुक्त्वा यथादेवतमादिश्य

---

* द्राह्यायणोऽप्येवम् ।

उक्तं वायोरिति धर्मण्यं प्रतिष्ठन्तीयादित्येतदादि द्रव्याणामश्वानां रथस्य गौतम आचार्य्य आह* ॥ १४ ॥

संमार्जनप्रभृत्येतत् सर्वं कृत्वा विमुच्य नाना पुरस्ताज्जपोपरिष्टाज्जपौ वारुणमश्वेभ्यो रथाय चेति धानञ्जप्यः † ॥१५॥

संमार्जनप्रभृत्यवरोहणान्तं एतत् सर्वं कृत्वा विमुच्याश्वौ नाना एकैकस्मिन् द्रव्ये पुरस्ताज्जपोपरिष्टाज्जपौ भवेतां वारुणन्तु यजुः अश्वार्थमेव स्याद्रथार्थञ्चेति एवं धानञ्जप्य आचार्य आह ॥ १५ ॥

ग्लायेच्चेद् यथासनं व तत् सर्वं जपेत् † ॥ १६ ॥

यद्येतत्कर्म नोत्सहेद्यथादेशं कर्तुं तदा औदुम्बर्यामेवोपविष्ट एतत् सर्वं जपेत् ॥ १६ ॥

पृष्ठ्यश्चेद्दद्यात् प्राग्वारुणादश्वनामानि जपेत् † ॥ १७ ॥

---

* पुस्तकत्रयेऽप्यत्र पतितमनुमीयतेऽसंलग्नत्वात्, द्राह्यायणे तु "रथः दववाह्य वरुणस्त्वा नयतु देवि दक्षिण इत्येकं वाक्यं मन्त्रं बहुवचनेनोहेन सकृदुक्त्वा यथादैवतमश्वांश्च रथञ्च आदेश्य तेनामृतत्वमसीत्युपरिष्टाज्जप मूहेन सकृद्ब्रूयात् तद् यथा वरुणो वो नयतु देव्या दक्षिणाः वरुणायाश्वान् उत्तानायाङ्गिरसाय रथन्तरममृतत्वमसीयेतीति" धन्विकृतटीकास्ति ।

† द्राह्यायणेऽप्येवम् ।

यदि पृष्ठ्यमश्वन्दद्यात् यजमानः पृष्ठेन वहतीति पृष्ठ्यः, तदा पुरस्ताज्जपं जपित्वा प्राग्वारुणात् मन्त्रादश्वनामानि जपेत् ॥ १७ ॥

पुरस्ताज्जपाद्वा* ॥ १८ ॥

प्रागिति प्रकृतम् ॥ १८ ॥

तथादान्तेषु* ॥ १९ ॥

तथा अदान्तेष्वश्वेषु यथा पृष्ठ्यः तेन प्रकारेणेत्यर्थः ॥ १९ ॥

यद्रथ्यं स्यात्तेन तत् प्रतिगृह्णीयात्* ॥ २० ॥

रथ्यमिव रथ्यं चर्मण्यादि यद्द्रव्यं रथेन तुल्यं तेन तत् प्रतिगृह्णीयात् ॥ २० ॥

अश्वस्येति प्राग्वारुणादवेः* ॥ २१ ॥

अश्वस्याग्निपतिरित्येतद्यजुः प्राग्वारुणात् मन्त्रादवेः प्रतिग्रहे जपेत्, ननु तत् किमिदं प्राग्वारुणादिति यदा प्रागेव वारुणात् मन्त्रादयं मन्त्रः पठितः उच्यते विकल्पार्थं वक्ष्यति पुरस्ताज्जपाद्वेति ॥ २१ ॥

पुरस्ताज्जपाद्वा* ॥ २२ ॥

---

* माध्यायशोऽप्येवम् ।

वारुणाद्वा प्राक् पुरस्ताज्जपाद्वा जपेत् ॥ २२ ॥

आम्त्वा कृतं निति वसनस्य* ॥ २३ ॥

आम्त्वा कृतं नित्येतद्यजुः वाससः प्रतिग्रहे प्राग्वारुणात् स्यात् पुरस्ताज्जपाद्वा ॥ २३ ॥

तदुदस्येदतान्तवे* ॥ २४ ॥

तद्वा आम्त्वा कृतमिति यजुः उत्क्षिपेत् अतान्तवे वसने यन्न तन्तुभ्योनिर्वृत्तं तदतान्तवं नवतादि चर्मण्यं कुचित्रादि ॥ २४ ॥

हिरण्यमल्पीयो भोगादागच्छेदौदुम्बर्य्यामाश्लेषयेत्* ॥२५॥

हिरण्यमल्पीयः यस्य भोगो नास्ति तदौदुम्बर्यामाश्लेषयेत् ॥२५॥

आग्नीध्रीये वा जुहुयात्* ॥ २६ ॥

आग्नीध्रीये वा तद्धिरण्यं जुहुयात् न भोगाय कल्पेत् ॥ २६ ॥

समस्तान् श्रोत्रियवानेकक्रतौ प्रतिगृह्णीयात्* ॥ २७ ॥

एकस्मिन् क्रतौ श्रोत्रियवान् समस्तान् प्रतिगृह्णीयात् न व्यस्तान्

---

* द्राह्यायणेऽप्येवम् ।

न पृथगित्यर्थः, अपरे ब्रुवते एकक्रताविति ज्योतिष्टोमे एतत् तद्यदाङ्गरेकोयज्ञ इत्येतस्मात् ॥ २७ ॥

तथा तिलमाषान्* ॥ २८ ॥

यथा व्रीहियवान् तथा तिलमाषान् तेन प्रकारेणेत्यर्थः प्रतिगृह्णीयादिति वर्त्तते ॥ २८ ॥

प्राजापत्येनानादिष्टदेवताः प्रतिगृह्णीयात्* ॥ २९ ॥

यासां दक्षिणानां देवता अनादिष्टास्ताः प्राजापत्येन मन्त्रेण गृह्णीयात् प्रजापतये गर्दभमित्येतदादिवत् ॥ २९ ॥

तूष्णीमयज्ञे दक्षिणा इति धानञ्जप्यः* ॥ ३० ॥

या अयज्ञे दक्षिणाः तासु प्रतिग्रहणमन्त्रो निवर्त्तते इत्येवं धानञ्जप्य आचार्यो मन्यते कः पुनरयज्ञाधिकार इति उच्यते यज्ञस्य उद्भावे कश्चिद्धिरण्यादिकं ददाति यथा हिरण्यमन्यीयो भागादागच्छेदौदुम्बर्यामाश्रयेदिति यज्ञस्य ऋत्विजो। दैव इति च कन्याप्रदानादि तत्र तूष्णीं प्रतिगृह्णीयादिति ॥ ३० ॥

भूर्भुवः स्वरिति गौतमः* ॥ ३१ ॥

भूर्भुवः स्वरित्यनेन प्रतिगृह्णीयात् एवं गौतम आचार्य आह ॥ ३१ ॥

---

* भाष्यसम्मतोऽप्येवम्।

ओमिति वोमिति वा* ॥ ३२ ॥

ओमित्येवं वा प्रतिगृह्णीयात् एवं मन्यते गौतमः ॥ ३२ ॥

इति द्वितीयस्य अष्टमी कण्डिका ।

अथ नवमी कण्डिका ।

पूर्वं नाराशंसं भक्षयित्वाऽऽधवनीये प्रस्तोता पृष्ठहोमं जुहुयाद्यत्पृष्ठ्यं स्यात्तदादिश्यादः पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतमिमं यज्ञमभिसम्बसानाहोत्रास्तृप्यन्तु सुमनस्यमानाः स्वाहेति पूर्वाम्* ॥ १ ॥

दक्षिणाप्रतिग्रहविधानमुक्तं साम्प्रतमनन्तरं पृष्ठ्यस्योपाकरणं तत्सम्बद्धं प्रस्तोतृकर्मोच्यते द्वौ नाराशंसौ माध्यन्दिने तयोः पूर्वं भक्षयित्वा आधवनीयेऽग्नौ प्रस्तोता पृष्ठहोमं जुहुयात् तस्मिन्नहनि यत् पृष्ठं स्यात्तदादिश्य अदः पिबतु सोम्यं मध्वायुरित्येतदादिना मन्त्रेण अद इति सर्वनामस्थाने रथन्तरं पिबत्वित्येतदादिवत् ॥ १ ॥

स्वाहाकारेणोत्तराम्* ॥ २ ॥

पूर्वां यथोक्तेन मन्त्रेण हुत्वा उत्तरां स्वाहाकारेण जुहुयात् ॥२॥

---

* द्राह्यायणोऽप्येवम् ।

द्वैधं जुहुयादिति धानञ्जप्योऽदः पिबतु सोम्यं मध्वायुर्दधद्यज्ञपतावविह्रुतं स्वाहेति पूर्वामिमं यज्ञमित्युत्तराम्* ॥ ३ ॥

द्वैधं द्विधा कृत्वा एवं जुहुयादिति धानञ्जप्य आचार्य आह ॥ ३ ॥

होतृकपृष्ठेभ्य इति¶ ॥ ४ ॥

होतृकपृष्ठार्थमेवमभिसम्बन्धं कृत्वा ॥ ४ ॥

रेवतीषु वारवन्तीयमिति षष्ठे पृष्ठादेशं गौतमो महाव्रतमिति व्रते† ॥ ५ ॥

रेवतीषु वारवन्तीयं पिबतु इत्येव षष्ठेऽहनि पृष्ठादेशं गौतम आचार्यो मन्यते महाव्रतं पिबत्वित्येवं महाव्रते ॥ ५ ॥

रेवत्यस्य वारवन्तीयस्येति धानञ्जप्यो यावन्ति पृष्ठस्थानि स्युः सर्वाण्येव प्रसञ्जीत पिबतु दधदिति च यथार्थमूहेत्* ॥ ६ ॥

रेवत्यस्य वारवन्तीयस्येत्येवं षष्ठेऽहनि पृष्ठादेशं धानञ्जप्यो मन्यते

---

* द्राह्यायणेनैतेन सूत्रत्रयं कृतम् ।

¶ द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

यावन्ति सामानि महाव्रते पृष्ठस्थानि भवन्ति सर्वेषामेव परिसंख्यानं कुर्यात् पिबतु दधदिति चैते पदे यथार्थमूहेत् प्रयोगस्तु रैवत्यस्य वारवन्तीयस्य पिबतां सोम्यं मध्वायुर्दधतीति शेषो मन्त्रः सामान्यः एवं षष्ठे गायत्ररथन्तरबृहद्राजनभद्राणि पिबतु सोम्यं मध्वायुर्दधती दधन्तीति चेत्येवं महाव्रते मन्त्रशेषः सामान्यः एवेत्युक्तम् उभयपक्षेणाम्नातं भद्रे पुच्छे यज्ञायज्ञीये च पुच्छे यथार्थं न केवलमेवं षष्ठमहाव्रतयोः यत्र यत्रानेकसामपृष्ठता तत्र तत्रैवमर्थसमत्वात् ॥ ६ ॥

बृहता रथन्तरेण वा स्तोष्यमाणः प्राक् स्तोमयोगाद्दश व्याहृतीर्मनसा ध्यायेदैरमिति* ॥ ७ ॥

बृहता रथन्तरेण वा स्तोष्यमाणः स्तोतुमिच्छन् उद्गाता स्तोमयोगात्पूर्वं दश व्याहृतीर्मनसा ध्यायेदैरमित्येतदाद्याः यथाम्नानादेव सिद्धे दशत्वे संख्याग्रहणं किमर्थं दशेति चेत् उच्यते अनुलिङ्गं विभागो माभूदिति, व्याहृतिग्रहणं संव्यवहारार्थं वक्ष्यति ऋचं पूर्वं व्याहृतिभ्य इति ॥ ७ ॥

रथन्तरएवर्चं यस्ते गोष्विति* ॥ ८ ॥

रथन्तरएव केवले ऋचं ध्यायेत् यस्ते गोष्वित्येतां एवशब्दः अन्यत्र प्रयुक्ते रथन्तरे माभूदिति ऋचमिति संव्यवहारार्थमेव ऋचं पूर्वं व्याहृतीभ्य इति ॥ ८ ॥

---

* द्राह्यायणोऽप्येवम् ।

169

युक्त्वा स्तोममेतद् ब्रूयादिति शाण्डिल्य ऋचं पूर्व्वां व्याहृतिभ्य इति* ॥ ९ ॥

यदेतदुक्तं प्राक् स्तोमयोगाद्दश व्याहृतीर्मनसा ध्यायेदेरमित्येतदादि एतद्युक्त्वा स्तोमं ब्रूयादिति शाण्डिल्य आचार्य आह अयन्तु क्रमः ऋचं पूर्व्वां व्याहृतीभ्य इति ॥ ९ ॥

इतरं धानञ्जप्यम्* ॥ १० ॥

यत्पूर्वमुक्तं तत् धानञ्जप्यस्य मतम् ॥ १० ॥

रथन्तरे प्रस्तूयमाने सर्वत्र सम्मीलेत्* ॥ ११ ॥

रथन्तरे साम्नि प्रस्तूयमाने सर्वत्र सम्मीलेत् यावत्कालः प्रस्तूयते तावत्कालः सम्मीलनं कुर्यात् अथ सर्वग्रहणं किमर्थमिति चेत् उच्यते एवं ब्राह्मणम् ईश्वरं वै रथन्तरमुद्गातुश्चक्षुः प्रमथितः प्रस्तूयमाने संमीलेत्स्वर्दृशं प्रतिवीक्षेतेति प्रथमायामृच्यस्य विधेः क्रियां दर्शयति स्वर्दृशं प्रतिवीक्षेतेति तेन यद्विषयमेव प्रतिवीक्षमाणमादिश्यते तद्विषयमेवं सम्मीलनं गम्यते सोऽयमाचार्यः सर्वत्रेत्येवमारभते कथमुत्तरयोरपि स्तोत्रीययोः सम्मीलनप्रतिवीक्षणे भवेयातामिति यावता रथन्तरधर्मोऽयं नायमृग्धर्मः स्वर्दृशशब्दः कालमात्रज्ञापकः वक्ष्यति प्राक् प्रतिहारं चतुरक्षरं शिष्ट्वा तत् सर्वत्र प्रतिवीक्षेतेति अपरे वर्ण-

---

* द्राह्यायणोऽप्येवम् ।

यन्ति वक्ष्यत्ययं तस्यापृष्ठस्य सतो निवर्त्तेरन्धर्मा इति तत्कथं निवर्त्तमानेष्वन्येषु धर्मेषु सम्मीलनं स्यादिति अतः सर्वप्रसङ्गमिति ॥ ११ ॥

एकैकं मनसाक्षरं स्तोभैर्वाचा संयुञ्ज्यात् प्रथमस्वरैरकारैर्भकारादिभिरक्रान्तैर्द्वितीयस्वरोत्तमैः* ॥ १२ ॥

एकैकमुद्गीथाक्षरं मनसा ध्यायेत् स्तोभैर्वाचा संयुञ्ज्यात् उक्तं ब्राह्मणे सव्वसा कुर्वता गेयमिति एतत् स्तोभरूपं सूत्रकारः श्रुत्यन्तरं दृष्ट्वा विकल्पयति प्रथमस्वरैरकारैर्भकारादिभिरक्रान्तैरिति अक्षराणां स्तोभानाञ्च युगपत्क्रियां दर्शयति सव्वसा कुर्वता गेयमिति प्रथमस्वरैरकारैः उक्तस्वराः प्रथमद्वितीयतृतीयचतुर्थमन्द्रातिस्वार्या इति तैरकारैर्भकारादिभिर्भकार उच्चारणार्थः भकारैस्ते अकारा उच्चार्य्यन्ते अक्रान्तैः अक्रान्ताः तान् प्रयुञ्जीत द्वितीयस्वरोत्तमैः यस्तेषामुत्तमो वर्णः स द्वितीयेन स्वरेण स्यात् ॥ १२ ॥

एतद्यथाधीतमित्याचक्षते* ॥ १३ ॥

एवं प्रयुज्यमानं रथन्तरं यथाधीतं प्रयुक्तं भवतीति एवमाचक्षते एतच्छ्रुत्यन्तरं यथाधीतं प्रयोक्तव्यमिति अथ एके सुवते एतेषामेव सव्वसेति स्तोभानां अनुकरणभकार इति अपरा श्रुतिः रथन्तरे सक्षरभकारान्तरवन्ति व्यञ्जनानि यथाक्षरं दर्शयेत् तद्यथा

---

* द्राह्यायणेन सूत्रत्रयेणैकसूत्रं कृतम्, तथा तेषु छेदविषये विशेषोऽप्यस्ति ।

स्वरेण सर्वाणि व्यञ्जनानि व्याप्तान्येवं सर्वान् कामानवाप्नोति यस्यैवं वेद यस्यैते स्वरवन्तः प्रयुज्यन्ते यस्यैवं विद्वान् प्रयुङ्क्ते यथा चाग्नि-चन्द्रसूर्य्याभास्वन्तोऽपहततमस्कास्तद्दुह्नाद्यजमानो भवत एवं श्रुतिश्च भात्यग्निर्भाति चन्द्रमा भाति सूर्यो भान्ति ज्योतींषि भाति रथन्तर-मिति भकाराणामेव दीप्तिं दर्शयति स्वरवतां रथन्तरस्य स्तोभानां स्वरवन्तः प्रयोक्तव्या इति यत्र तु व्यञ्जनवन्तः प्रयुज्येरन् स्तोभुका च बध्यायिनाव प्रजसावुद्गातृयजमानौ स्यातान्तस्मादन्तरं प्रयुञ्जानः स्वरवन्ति व्यञ्जनानि यथान्तरं दर्शयेत् एका श्रुतिः तस्माद्विकल्पः स्यात् ॥ १३ ॥

प्राक् प्रतिहारात्त्वतुत्तरं शिष्ट्वा तत् सर्वञ्च प्रतिवीक्षेत* ॥१४॥

प्राक् प्रतिहारात्स्तोत्रार्थ्यक्षराणि शिष्ट्वा तच्चतुरक्षरं प्रतिवीक्षेत सर्वग्रहणस्य प्रयोजनं सम्मीलनविधावेवोक्तम् ॥ १४ ॥

स्तुत्वा वरञ्चोदयेत्¶ ॥ १५ ॥

स्तुत्वा रथन्तरेण यजमानं वरं प्रति प्रेरयेत् ॥ १५ ॥

तस्यापृष्ठस्य सतो निवर्त्तेरन्धर्माः † ॥ १६ ॥

---

* शाण्डिल्यायनेन सूत्रत्रयेणैकसूत्रं कृतम्, तथा तेषु छेदविषये विशेषोऽप्यस्ति।

¶ शाण्डिल्यायनोऽप्येवम्।

† शाण्डिल्येन सूत्रद्वयेनैकसूत्रं कृतम्।

तस्य रथन्तरस्य अपृष्ठस्य सतः निवर्त्तेरन् धर्म्माः व्यावृत्यृन्वाचादयो धर्माः सर्वे निवर्त्तेरन् अतोऽस्य ग्रहणं किमर्थमिति चेत् उच्यते तस्येति तस्यैव न बृहद्वामदेव्ययोस्तु पुनरपि रथन्तरं पृष्ठयोः सतो निवर्त्तेरन्धर्माः तथा सत इति पृष्ठगतस्य तु रथन्तरस्य गुणभूतस्यापि सतो नैव निवर्त्तेरन्धर्माः तथा बृहतः ॥ १६ ॥

सहस्तोभैरिति गौतमः* ॥ १७ ॥

सह स्तोभैर्धर्म्मा निवर्त्तेरन्नित्येवं गौतम आचार्यो मन्यते ननु सर्वे एवाशेषेण धर्मा निवृत्ताः कुतस्तोभनिवृत्तिर्येन गौतमस्तोभान्निवर्त्तयतीति उच्यते, वक्ष्यति स्तोभा एवान्वियुरिति धानञ्जप्यः इति उक्तं परमतमनुमतमप्रतिषिद्धमिति तेन गौतमस्यानिष्पृष्टा एव स्तोभक्रियाः ॥ १७ ॥

स्तोभा एवान्वियुरिति धानञ्जप्यः † ॥ १८ ॥

सर्वेऽन्ये धर्माः अपृष्ठस्य निवर्त्तेरन् स्तोभा एव केवला अन्वियुरित्येवं धानञ्जप्यो मन्यते ॥ १८ ॥

अग्निष्टोमसामसन्धिसाम्नोरेवापृष्ठं स्तोभेदिति शाण्डिल्यः † ॥ १९ ॥

---

* द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

† द्राह्यायणोऽप्येवम् ।

अग्निष्टोमसाम वा यदा स्यात् सन्धिसाम वा तदा अपृष्ठमपि स्तोभेत् एवं शाण्डिल्य आह ॥ १९ ॥

सर्वत्रास्वस्तोत्रीयं न स्तोभेदिति स्थविरो गौतमः* ॥२०॥

सर्वत्र पृष्ठगतश्चान्यत् स्थामगतश्चास्वस्तोत्रीयं न स्तोभेदिति स्थविरो गौतम आह ॥ २० ॥

इति द्वितीयस्य नवमी कण्डिका ।

अथ दशमी कण्डिका ।

वामदेव्येन स्तोष्यमाणः प्राक् स्तोमयोगाद्गावो अश्वा अजावयोव्रीहयोयवा इति मनसा ध्यायेत्* ॥ १ ॥

बृहद्रथन्तरयोः सामान्यविशेषधर्मास्तूक्ताः साम्प्रतं वामदेव्यधर्मा विवक्षिताः तान्विवक्षुराह । वामदेव्येन स्तोष्यमाण इति वामदेव्येन साम्ना स्तोष्यमाणः स्तोतुमिच्छन् पूर्वं स्तोमयोगात् गावो अश्वा अजा इत्येतदादि मनसा ध्यायेत् अन्योऽन्यधर्म उक्तः यथाकुशीपुत्रामिति, अथ विसमासः किमर्थमिति चेत् गोऽश्वाजाविव्रीहियवान् मनसा ध्यायेत् इत्येवं वक्तव्यमासीत् उच्यते यद्येवमवक्ष्यत् तदा

---

* द्राह्यायणेऽप्येवम् ।

गवादीनां द्रव्याणां ध्यानमभविष्यत् तदेवं माभूदित्यत आह आचार्यो गावो अश्वा इत्येतदादि तेन किं गावो अश्वा इत्येतदादि मन्त्र मनसा ध्यायेदिति ॥ १ ॥

ब्रह्मसाम्नि यः कामो यजमानस्य स्यात् स सिध्यत्विति ध्यायन्नुपासीत* ॥ २ ॥

ब्रह्मसाम्नि स्तूयमाने यः कामो यजमामस्य भवेत् स सिध्यत्वित्येवं ध्यायन् यजमान उपासीत अत्र सन्देहः किं क्रतुकामस्य ध्यानं उत-यथाकाम्यं कामस्य ध्यानमिति उच्यते, क्रतुकामस्य ध्यानं न यथाकाम्यं कथमेतद्गम्यत इति चेत् उच्यते. उद्देशनिर्देशाभ्यां यः स इति यः क्रतुकामस्तं ध्यायेदिति अन्यथा हि ब्रह्मसाम्नि यजमानः कामं ध्यायेदित्येवमवक्ष्यत्सूत्रम् ॥ २ ॥

तथेतर उद्गायन्* ॥ ३ ॥

तथा इतर उद्गाता यजमानस्य कामः सिध्यत्वित्येवं ध्यायन्नुद्गायेत् ॥ ३ ॥

आर्भवेण स्तुत्वा पुरोडाशादेकैकं पिण्डन्त्रीꣳस्त्रीन्वापरया द्वारा हविर्धानं प्रपद्याधस्तात् स्वस्य चमसस्य कुर्यु-

---

* द्राह्यायणेऽप्येवम्।

यदासन्नः स्यादत्र पितरोमादयध्वं यथा भागमावृषायध्वमिति* ॥ ४ ॥

आर्भवेन पवमानेन स्तुत्वा तार्त्तीयसवनिकात्पुरोडाशात् एक देशं गृहीत्वा एकैकं पिण्डम्वीं स्तोम्वा अपरया द्वारा पश्चिमया द्वारा हविर्द्धानं प्रविश्य अधस्तात्तस्य चमसस्य समीपे दर्भेषु पिण्डान्निदध्युः यस्मिन् काले आसादितः स्यात् हविर्द्धाने चमसः पिण्डान्निधाय जपेयुः अत्र पितरोमादध्वं यथा भागमावृषायध्वमिति ॥४॥

तमाह्रियमाणं प्रतिमन्त्रयेरन्नमीमदन्त पितरो यथाभागमावृषायिषतेति* ॥ ५ ॥

तं चमसं भक्षार्थमाह्रियमाणं प्रतिमन्त्रयेरन्नमीमदन्त पितर इत्यनेन ॥ ५ ॥

सोम्यमाहृतमुद्गातावेक्षेतायुम प्राण इति* ॥ ६ ॥

सोम्यं चरुमाहृतं उद्गातावेक्षेत आयुर्मे प्राण इत्येतदादिना यजुषा साध्यानां वै देवानां सत्रमासीनानामित्येतदादि ब्राह्मणं सोम्यस्यावेक्षणं दर्शयति उद्गातृग्रहणं आचार्यशैली सर्वेषां कर्मणि प्रकृते अवश्यमुद्गातृग्रहणं करोति ॥ ६ ॥

पुनरस्मास्तु दध्मासीत्यन्तः* ॥ ७ ॥

---

* आह्वायकोऽप्येवम् ।

अस्य सोम्यावेक्षणयजुषः पुनरस्मासु दधसीत्येषोऽन्तः अथोच्यते उत्तरादिः पूर्वान्तलक्षणमिति एवं विज्ञायमाने मन्त्रस्यान्ते तत् किमिदं विज्ञापनं क्रियत इति उच्यते वक्ष्यति तं दशमेऽहन्यभ्यस्येयुरिति तच्चैतावन्मन्त्राभ्यासप्रदर्शनार्थमिति ॥ ७ ॥

तं दशमेऽहन्यभ्यस्येयुः* ॥ ८ ॥

तमवेक्षणमन्त्रस्यान्तं दशमेऽहनि द्विर्ब्रूयुः ॥ ८ ॥

यन्मे यममित्येके* ॥ ९ ॥

आयुर्मे प्राण इत्येतस्य प्राणमन्त्रस्य स्थाने यन्मे यममित्येतमेके आचार्या मन्यन्ते ॥ ९ ॥

पूर्वेण त्वेवावेक्षेत* ॥ १० ॥

तुशब्दो व्यावृत्त्यर्थः यदेतत् पूर्वोक्तमवेक्षणमन्त्रं तेनैवावेक्षेत न द्वितीयेन ॥ १० ॥

तस्मिन्नङ्गुष्ठानामिके अवधायाक्षिणी विमार्जीत येनाक्षाजिमिति † ॥ ११ ॥

---

* द्राह्यायणेऽप्येवम्।

† द्राह्यायणे विशेषोऽस्ति।

तस्मिन्नुत्तरधृते सोम्ये चरौ अङ्गुष्ठञ्च अनामिकाङ्गुलिञ्चावधाय अक्षिणी विमृशेत् येनाज्याजिमित्येतदादिना यजुषा तस्मिन् यद्वर्णं यदि पूर्वेण यद्युत्तरेणावेक्षेत कुर्यादेवैतत् ॥ ११ ॥

एवमितरौ कुर्याताम्* ॥ १२ ॥

एवमनेन विधिना इतरौ अक्षी कुर्याताम् ॥ १२ ॥

प्रतिहर्त्ता पश्चात्* ॥ १३ ॥

एष क्रमः प्रस्तोता पूर्वः पश्चात् प्रतिहर्त्ता ॥ १३ ॥

तमुत्तरेण प्रतिहर्त्तारं हरेयुः † ॥ १४ ॥

तमवेक्षितं सोम्यं प्रतिहर्त्तुरुत्तरेण हृत्वा पश्चिमया द्वारा निष्क्रामयेयुः यदि वा ब्राह्मणोक्तेन विधिना प्राश्नीयात् दक्षिणार्द्धं सदसो गत्वैतं सोम्यातिशेषं प्राश्नीयादिति ॥ १४ ॥

यज्ञायज्ञीयस्य हिंकारं प्रति पत्नीमुद्गातेक्षेत † ॥ १५ ॥

पत्नी चोद्गातारमीक्षेत ॥ १५ ॥

निधनं प्रति पत्नी दक्षिणमूरुमभिषिञ्चेत् † ॥ १६ ॥

---

* द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

† द्राह्यायणेऽप्येवम् ।

निधने उच्यमाने पत्नी पान्नेजनीभिरद्भिः स्वं दक्षिणमूरुमभिषिञ्चेत् तत् दक्षिणानूरूनभिषिञ्चन्त इति हि ब्राह्मणम् ॥ १६ ॥

तृतीयायां स्तोत्रीयायां प्रस्तुतायां सर्वं तदुदकं निनयेत्* ॥ १७ ॥

तृतीयायां स्तोत्रीयायां प्रस्तुतायां पत्नी स्वस्मिन्नूरौ सर्वन्तदुदकं निनयेत् सर्वशब्दो निरवशेषवाची उत्पत्तिस्तोत्रीयायां कर्मस्तोत्रीयायां प्रस्तुतायामिति विवदन्ते तृतीयाशब्देन कर्मस्तोत्रीयायां न्याय्यतरम् ॥ १७ ॥

उत्तमायां स्तोत्रीयायां भुवद्वाजायि भुवद्वाजेष्वित्यभ्यस्येन्नामिति च निधनमनुष्टुभमुत्तमामक्षरेणान्तत इति ह्याहेति* ॥ १८ ॥

स्तोत्रस्योत्तमायां स्तोत्रीयायां भुवद्वाजायि भुवद्वाजेष्विति एवमभ्यासं कुर्यात् अस्य चतुरक्षरस्याभ्यासे सति नामिति च निधनं कुर्यात् यस्मादेवं ब्राह्मणम् अनुष्टुभमुत्तमां सम्पादयतीति अक्षरेणान्ततः प्रतिष्ठाप्यमिति च ॥ १८ ॥

अनभ्यासन्त्वाचार्य्या निधनञ्च यथाम्नायं शाण्डिल्यः† ॥१९॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

अनभ्यासमेवाचार्या मन्यन्ते चतुरक्षरस्य निधनस्य यथाम्नायमेव कुर्युरित्येवं शाण्डिल्य आचार्यो मन्यते अनभ्यासञ्चेति चशब्दः तुशब्दो हेत्वर्थः को हेतुः यस्मात्पञ्चोपन्यासब्राह्मणमेवेदं प्रकरणादितो वा इति हि ॥ १९ ॥

तद्यदानुशꣳसन् होतापोहिष्ठीया ब्रूयात्तदैनमन्वालभेरन्नपावृण्वानाः* ॥ २० ॥

तद्यज्ञायज्ञीयं यदा यस्मिन् काले अनुशंसन् होतापोहिष्ठीया ऋचा ब्रूयात् तदा तस्मिन् काले एनं होतारं अन्वालभेरन् स्पृशेयुः अपावृण्वानाः प्रावरणान्यपास्यमानाः अपावृण्वाना इति सर्वेषां पूर्वं प्रावृतानां क्रियां दर्शयति उक्तं प्रावृतेनोद्गेयमिति वैश्वानरेणानभिदाहायेति तत् सूत्रकारः सर्वेषां प्रावरणं दर्शयति हेतुसमत्वात् किं हेतुसमत्वम् अनभिदाहः ॥ २० ॥

अन्यत् स्थानगतस्य निवर्त्तेरन् धर्माः* ॥ २१ ॥

यज्ञायज्ञीयस्याग्निष्टोमसाम्नोऽन्यस्थाने प्रयुज्यमानस्य सर्वे धर्मा निवर्त्तेरन् ॥ २१ ॥

यदन्यदग्निष्टोमसाम स्यात्तस्य स्युः* ॥ २२ ॥

यदन्यदग्निष्टोमसाम भवेत् तस्य धर्मा भवेयुः ॥ २२ ॥

---

* द्राह्यायणेऽप्येवम् ।

अहिङ्कारे तु प्रतिहारवेलायां पत्नीमुद्गातेक्षेत* ॥ २३ ॥

अहिङ्कारेत्वग्निष्टोमसाम्नि प्रतिहारवेलायां पत्नीमुद्गाता ईक्षेत पत्नी चोद्गातारम् ॥ २३ ॥

अनुब्राह्मणमार्चिकान् सन्नामान् सर्वत्र कुर्यादप्यन्यस्मिन् साम्नि* ॥ २४ ॥

ये ब्राह्मणे ऋचं साम्नि प्रतिसन्नामा उक्ताः एवं ह्वलोह्वेयं पद्मीस्वर्यमिति सुभंसिषमिति चैतान् सर्वेष्वग्निष्टोमसामसु दर्शयति सर्दपक्षणं पवमानगतेऽपि यज्ञायज्ञीये भवति न केवलं यज्ञायज्ञीये अप्यन्यस्मिन् रथन्तरेऽपि अथ साम्नोति किमर्थं उच्यते यदा रथन्तरेष्वसु अन्यत्पृष्ठं क्रियते तत्तदापि अस्तुष इति सुस्तुष इति वा सन्नामयेत् ॥ २४ ॥

इति द्वितीयस्य दशमी कण्डिका ॥

अथ एकादशी कण्डिका ।

तृतीयसवने सर्वेषु स्तोत्रेषु समाप्तेषु भक्षयित्वा स्तोमं विमुञ्चेयुर्ऋतस्य त्वेति* ॥ १ ॥

---

* द्राह्यायणेऽप्येवम् ।

तृतीयसवने सर्वेषु स्तोत्रेषु समाप्तेषु भक्षयित्वा चमसं स्तोमविमोचनं कुर्युः ऋतस्य त्वेत्यनेन यजुषा, ननु तत् किमिदं तृतीयसवनग्रहणं यदा सर्वेषु स्तोत्रेषु समाप्तेष्वित्युक्तम् उच्यते इदन्तावद्यजुरुपरि सन्निभक्षात्समाम्नातं तत्र विमोचनं यजुषा तस्मिन्नेव क्रमे प्राप्नोति अतः तृतीयसवनग्रहणं तावत्क्रियते कथं न केवलमुपरि सन्निभक्षात् स्तोमविमोचनं स्यात् यस्यां यस्यां संस्थायां क्रतुः समाप्यते तस्यान्तस्यां संस्थायां स्यादिति अथ सर्वग्रहणं किमर्थमिति चेत् स्तोत्रेष्विति बहुवचनसामर्थ्यात्सिद्धे सर्वत्वे इदमुच्यते इदं स्तोमविमोचनं क्वचित्स्तोत्रे दृष्टं प्रतिस्तोत्रञ्च स्तोमयोजनं भवति युक्तस्य च विमोचनं भवत्येव तस्य च युक्तस्य स्तोमस्य यस्मिन् काले विमोचनमित्येष संशयः अतः सर्वग्रहणं करोत्याचार्यः कथं पूर्वेष्वपि स्तोत्रेषु एकैकस्मिन् स्तोत्रे भक्षयित्वा स्तोमं विमुञ्चेयुः अत्र तु तृतीयसवने कथमिति ॥ १ ॥

दक्षिणैः पाणिभिः कुशाः संलोभयेयुः* ॥ २ ॥

संलोभनं एकत्रीकरणं कुर्युः ॥ २ ॥

यजमानवाचनादनन्तरमत्र वा यजमानं वाचयेत्तन्तवे मा ज्योतिषेत्यसावनुमातनु हि ज्योतिषेति यथाज्येष्ठं पुत्राणां नामानि गृह्णीयात् † ॥ ३ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रचतुष्टयं कृतम् ।

यजमानवाचनादनन्तरं यदेतत् स्तुतस्य स्तुतमसीति यजमानवाचनं एतस्मादनन्तरं एतत् कर्म कुर्यात् तदुच्यते अत्र वा अस्मिन् काले कुशानां संलोभनं कृत्वा कुर्युः इति विकल्पः तन्तवे मा ज्योतिषेत्युक्त्वा असावनुमातनुष्व ज्योतिषेति यथा ज्येष्ठं पुत्राणां नामानि गृह्णीयात् असाविति सर्वनामस्थाने नाम गृह्णीयात् यो यो ज्येष्ठो यथा ज्येष्ठं प्रयोगस्तु तन्तवे मा ज्योतिषा यज्ञदत्त अनुमातनुष्व विष्णुमित्र अनुमातनुष्व सोमभूते अनुमातनुष्व ज्योतिषा अपरे प्रत्येकं पुरस्ताज्जपोपरिष्टाज्जपौ कुर्वन्ति ॥ ३ ॥

जनिष्यमाणा इत्यजातेषु* ॥ ४ ॥

अजातेषु पुत्रेषु जनिष्यमाणा इति सर्वनामस्थाने कुर्यात् प्रयोगस्तु तन्तवे मा ज्योतिषा जनिष्यमाणा अनुमातनुत ज्योतिषा अजातपुत्रस्यैष कल्पः अपरे ब्रुवते जातपुत्रोऽपि पुत्राणां नामानि गृहीत्वा जनिष्यमाणा इति गृह्णीयात् आशीर्योगत्वात् जनिष्यमाणा इत्यजातेष्विति प्रतिपत्तिरियमिति ॥ ४ ॥

जातेष्वजातेषु च पुत्रा इत्येव सत्त्रेषु* ॥ ५ ॥

जातेषु अजातेषु च पुत्रेषु सत्रेषु पुत्रा इत्येवं नामग्रहणं प्रयोगः तन्तवे मा ज्योतिषा पुत्रा अनुमातनुत ज्योतिषा यद्येकः कुर्यात् तथापि बहुवचनं कुर्य्यात् नोऽहं कुर्य्यात् ॥ ५ ॥

---

* द्राह्यायणोऽप्येवम् ।

वषट्कृते हारियोजनस्य यथेतमपरया द्वारा निष्क्रामन्तो जपेयुः सोमेद्धीति* ॥ ६ ॥

वषट्कृते हारियोजनस्य हविषः हारियोजनस्येत्यवयवलक्षणा षष्ठी यथेतं यथागतमित्यर्थः दक्षिणेनौदुम्बर्यां गत्वा पश्चिमया द्वारा निष्क्रामन्तो जपेयुः सोमे द्धोत्येतदादि यजुः अथापरया द्वारेति किमर्थं यद्वा यथेतमित्युक्ते सिद्धमेवैतत् ते हि समस्तोपस्थानं कृत्वा अपरयैव द्वारा प्रविष्टाः अत्रोच्यते विसंस्थिते सवने पूर्वया द्वारा सञ्चर इत्युक्तं न चात्र सवनं सन्तिष्ठते तद्यद्यपरयेति न ब्रूयात् विसंस्थिते सञ्चरेण निर्गमनं स्यात् एवं माभूदित्यत आह अपरयेति यथेतमिति चोक्ते ते पिण्डं पितृयज्ञं कृत्वा पूर्वया द्वारा प्रविष्टाः तत्रैषोऽपि सञ्चरो गम्येतापरयेत्यनुच्यमाने ॥ ६ ॥

सुभूरसीत्यादित्यमुपतिष्ठेरन्* ॥ ७ ॥

सुभूरसीत्यनेन यजुषा आदित्यमुपतिष्ठेरन् ॥ ७ ॥

अस्तमितश्चेद्गार्हपत्यम्* ॥ ८ ॥

यद्यस्तमितः स्यादादित्यः ततोऽनेन यजुषा गार्हपत्यमुपतिष्ठेरन् कोऽस्य विषयः षोडशीवाजपेयौ अन्यस्मिंश्च कालातिक्रमे ॥ ८ ॥

---

* द्राह्यायणेऽप्येवम्।

आग्नीध्रीये द्वे आहुती जुहुयुरपां पुष्पमिति पूर्वां स्वाहाकारेणोत्तराम्* ॥ ९ ॥

आग्नीध्रीयेऽग्नौ द्वे आहुती जुहुयुर्गत्यानुपूर्व्येण अपां पुष्पमित्यनेन यजुषा पूर्वामाहुतिं जुहुयात् स्वाहाकारेणोत्तरां अथाहुती इति द्विवचनेन द्वित्वे सिद्धे किमिदं संख्याग्रहणं द्वे इति उच्यते नियमार्थम् उक्तं ह्यनेन हिरण्यमल्पीयो भोगादागच्छेदौदुम्बर्य्यामाश्लेषयेदाग्नीध्रीये वा जुहुयादिति तस्य हिरण्यस्यायं होमकालः याऽसौ द्वितीया आहुतिस्तस्यामेव हिरण्यं प्रक्षिप्य जुहुयादिति ॥ ९ ॥

हारियोजन्यो नाम धाना द्रोणकलशे भवन्ति तासामुद्गाता प्रथम आददानः समुपहूता भक्षयिष्याम इति ब्रूयात्* ॥ १० ॥

हारियोजन्य इति संज्ञा धानानां द्रोणकलशे ताः स्थापिता भवन्त्यध्वर्युभिः सोममिश्राः तासां धानानामवयवमुद्गाता आददानः समुपहूता भक्षयिष्याम इति ब्रूयात् आदानं ग्रहणम् ॥ १० ॥

तथेतरौ* ॥ ११ ॥

तथेतरौ यथोद्गाता कुर्य्यात् तेनैव विधिनेतरौ प्रष्टी कुर्य्याताम् ॥ ११ ॥

---

* द्राह्यायणोऽप्येवम् ।

उन्नेतर्युपहवमिष्ट्वा हारियोजनस्य न इति तिरोह्न्यस्येत्यतिरात्रे यथाधीतं वा सर्वत्र द्विरुपघ्राय पश्चादाहवनीयस्यान्तः परिधि निवपेयुः* ॥ १२ ॥

उन्नेतरि इत्यधिकरणसप्तमी उपहवमिष्ट्वा उपहवं याचित्वा हारियोजनस्य न इत्येतेन यजुषा यद्वक्ष्यते तत् कुर्य्युः तिरोह्न्यस्येत्यतिरात्रे एतदधिकं कुर्य्युः यथाधीतं वा सर्वत्र अतिरात्रे चानतिरात्रे च द्विरुपघ्राय आहवनीयस्य पश्चिमे प्रदेशे परिधीनामभ्यन्तरतो निवपेयुः नाग्नौ ॥ १२ ॥

अनुप्रहृतेषु भस्मान्ते* ॥ १३ ॥

यदि परिधयः अनुप्रहृताः प्रक्षिप्ता अग्नौ भवन्ति तदा भस्मान्ते समीपे निर्वपेयुः ॥ १२ ॥

अप उपस्पृश्याष्टावष्टौ शकलान्याहवनीये प्रहरेयुर्देवकृतस्येत्येतत्प्रभृतिभिरिकारान्तैः* ॥ १४ ॥

उपधानात् अनन्तरं अपः स्पृष्ट्वा एकैकः अष्टौ अष्टौ शकलानि आहवनीये प्रक्षिपेयुः देवकृतस्येत्येतत्प्रभृतिभिर्मन्त्रैः इकारान्तैरिति मन्त्रान्तज्ञापनार्थम् ॥ १४ ॥

---

* द्राह्यायणेऽप्येवम्।

सकृदेव सर्वाण्युत्तमेनेति गौरिवीतिः* ॥ १५ ॥

सर्वान् मन्त्रानुक्त्वा सकृदेव सर्वाणि सकलानि उत्तमेन मन्त्रेण प्रक्षिपेयुरिति गौरिवीतिराचार्य आह ॥ १५ ॥

अप्सु षोमानाम चमसाश्चात्वाल देशेऽद्भिः पूर्णास्तेषु हरितानि तृणानि प्रास्तानि भवन्ति † ॥ १६ ॥

अप्सु षोमा इति संज्ञा ते अप्सु षोमाश्चमसाश्चात्वालसन्निकृष्टे देशे अद्भिः पूर्णा स्थापिता भवन्ति तेषु हरितानि तृणानि प्रास्तानि भवन्त्यध्वर्युभिः ॥ १६ ॥

ते स्वं चमसं पर्युपविश्याप्सु धौतेत्यवमृश्य जपेयुः* ॥१७॥

ते उद्गातारः स्वकीयचमससन्निधावुपविश्य दक्षिणेन पाणिना स्पृष्ट्वा अप्सु धौतेत्येतदादि यजुर्जपेयुः ॥ १७ ॥

मधुमन्तमिति पाणीनुपजिघ्रेरन्* ॥ १८ ॥

मधुमन्तमित्यनेन यजुषा पाणीनुपजिघ्रेरन् ॥ १८ ॥

समग्न इत्युदञ्चश्चमसं निनयेयुः* ॥ १९ ॥

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

अमदभ्य इत्यनेन यजुषा उदङ्मुखं चमसं कृत्वा तत्स्था आपः नोच्चैः चमसैः भूमौ निनयेयुः ॥ १९ ॥

कामेत्यभ्यात्ममावर्त्तयेयुः* ॥ २० ॥

कामेत्यनेन यजुषा अभिमुखमात्मनः चमसमावर्त्तयेयुः ॥ २० ॥

ऊर्गित्युरःसु पाणीन्निदधीरन्* ॥ २१ ॥

ऊर्गित्यनेन यजुषा उरःसु पाणीन्निदधीरन् निधानं स्थापनम् ॥२१॥

प्राणसोमेति मुख्यान् प्राणानभिमृशेरन्* ॥ २२ ॥

प्राणसोमेत्यनेन यजुषा मुख्यान् प्राणानभिमृशेरन् मुखे भवा मुख्याः प्राणा इन्द्रियाणि अक्षिणी नासिके कर्णाविति ॥ २२ ॥

आग्नीध्रीयं गत्वा दधिभक्षं भक्षयेयुरसमुपहूय दधिक्राव्ण इति* ॥ २३ ॥

आग्नीध्रीयपरिश्रितं गत्वा दधिभक्षं भक्षयेयुरसमुपहूय दधिक्राव्ण इति अनया ऋचा असमुपहूयेति समुपह्वानपूर्वकाः सर्वे भक्षा विहिताः तदिह भूयस्त्वं गृहीत्वा प्रवर्त्तेत तस्य प्रतिषेधः असमुपहूयेति ॥ २३ ॥

इति द्वितीयस्य एकादशी कण्डिका।

---

* लाट्यायनोऽप्येवम्।

अथ द्वादशी कण्डिका।

अग्निष्टपतीत्यवभृथ साम* ॥ १ ॥

अग्निष्टपतीति स्तोभलिङ्गेन अवभृथसामादेशः उक्तो ग्रहणेन चेति ॥ १ ॥

तस्यावृद्यथा प्रथमस्य प्रवर्ग्यसाम्नः* ॥ २ ॥

तस्यावभृथसाम्न आवृद्विधिः यथा प्रथमस्य प्रवर्ग्यस्य साम्नः येन प्रकारेणेत्यर्थः प्रथमं प्रवर्ग्यसाम त्वग्नायिरित्येतत् अथ तस्येति किमर्थमिति चेत् उच्यते अवभृथसामान्तराण्युपदेक्ष्यन्ते अभिषेचनीयाश्च त्रिरात्रयोः तदर्थं तस्य ग्रहणम् ॥ २ ॥

सर्व ऋत्विजो निधनमुपेयुः* ॥ ३ ॥

तस्यावभृथसाम्नः सर्व ऋत्विजो निधनं ब्रूयुः सर्वग्रहणं यथा प्रथमस्य प्रवर्ग्यसाम्नः इत्युक्तं तस्मिंश्च घर्मोपयुक्तानां निधनोपपत्तिः तन्माभूदतः सर्वग्रहणं कथमिह सर्वेषामृत्विजान्निधनोपपत्तिः स्यादिति ॥ ३ ॥

इष्टास्तोत्रीयमभिषेचनीये* ॥ ४ ॥

---

* द्राह्यायणोऽप्येवम्।

अभिषेचनीये क्रतौ इष्टाहोत्रीयमवभृथसाम स्यात् ॥ ४ ॥

समस्येति वा* ॥ ५ ॥

समस्येति वावभृथसाम स्यादित्यभिषेचनीये इष्टाहोत्रीयं वेति विकल्पयति ॥ ५ ॥

अश्वत्रिरात्रे नानावभृथान्यहानि* ॥ ६ ॥

उक्तमहीनेषु दधिभक्षान्तान्यहानि प्रागुदयनीयादतिरात्रादिति च अयमश्वत्रिरात्रे विशेषः नानावभृथान्यहानीति नाना पृथगित्यर्थः ॥ ६ ॥

तेषां प्रथमस्य सनादग्न इत्यवभृथसाम* ॥ ७ ॥

तेषामाश्वमेधिकानामह्नां प्रथमस्याह्नः सनादग्न इत्येतदवभृथसाम स्यात् अवभृथसामग्रहणं तत्र साममात्रं न कृत्स्नोऽवभृथ इति ॥ ७ ॥

यद्वा उविश्यतिरिति द्वितीयस्य त्यग्नायिरिति वा* ॥ ८ ॥

यद्वा उविश्पतिरित्येतत् साम द्वितीयस्याह्नोऽवभृथसामेति प्रकृतं त्यग्नायिरिति वा विकल्पः तृतीयस्य सिद्धं प्राकृतम् ॥ ८ ॥

---

* द्राह्यायणेऽप्येवम् ।

अवभृथेऽष्टौ संस्थितायामवभृथनिचुं पुणनिचेरुरसि निचुं पुणावदेवैर्देवकृतमेनोयासिषमवमर्त्यैर्मर्त्यकृतं पुरुराव्णो देवरिषस्पाहीत्यप उपस्पृश्य त्रिरभ्युक्षेरन्* ॥ ९ ॥

अवभृथेष्टौ समाप्तायां अवभृथनिचुं पुणेत्येतदादिना यजुषा यास्वावभृथेष्टिं कुर्वन्ति ताः स्पृष्ट्वा स्नात्वा त्रिरभ्युक्षेरन् क्रियाभ्यासे सकृन्मन्त्र इत्युक्तम् ॥ ९ ॥

आदित्यमुपतिष्ठेरन्नुद्वयन्तमसस्परिज्योतिः पश्यन्त उत्तरं स्वः पश्यन्त उत्तरं देवं देवत्रा सूर्य्यमगन्म ज्योतिरुत्तममिति* ॥ १० ॥

अभ्युक्षणानन्तरं आदित्यमुपतिष्ठेरन् उद्वयन्तमसस्परीत्येतदादिना मन्त्रेण ॥ १० ॥

अस्तमितश्चेदाहवनीयम्* ॥ ११ ॥

यद्यस्तमित आदित्यः स्यात् तदाहवनीयमुपतिष्ठेरन् उद्वयन्तमसस्परीत्येतयर्चा विशेष उक्तः प्रागेव अस्तमितश्चेद्गार्हपत्यमित्येतस्मिन् ॥ ११ ॥

तस्मिन् समिध आदध्युरेधोस्येधिषीमहीति प्रथमां समिदसि समेधिषीमहीति द्वितीयां यदेनश्चकृमावयं

---

* द्राह्यायणोऽप्येवम् ।

यद्वान्य कृतमारिमानया समिधा वयꣳ सर्वन्तदपमृज्य च इति तृतीयाम्* ॥ १२ ॥

तस्मिन्नाहवनीये सर्वं समिधआदध्युः आधानं प्रक्षेपः एधोस्येधिषीमहीत्येतदादिभिर्यथोद्दिष्टैर्मन्त्रैः अथ तस्मिन्निति किमर्थमिति चेत् यदास्तमितस्तदाहवनीयमित्यधिकृत एवाहवनीयः अत्रोच्यते उपस्थिते चानुपस्थिते च तस्मिन्समिधआदध्युरेव अन्यथा तस्योपस्थाने सति समिदाधानं स्यात् ॥ १२ ॥

तमेवोपतिष्ठेरन्नपो अद्यान्वचारिषं रसेन समगस्महि पयस्वानग्न आगमन्तं मा सꣳसृज वर्चसेति* ॥ १३ ॥

तमेवाहवनीयमुपतिष्ठेरन् अपो अद्यान्वचारिषमित्येतदादिना मन्त्रेण अप्शब्देन सोममुपचरति सोममिष्ट्वा भक्षयन्ति तमेवेति प्रकृतावधारणम् आदित्यस्य समुपस्थानमुक्तम् अतः तमेवाहवनीय मित्यवधारयन्ति ॥ १३ ॥

प्रागुदयनीयादतिरात्रादप्सु षोमान्तभक्षः सत्रेषु* ॥१४॥

सत्रेषु उदयनीयादतिरात्रात्पूर्वाणि यान्यहानि तेषु दधिभक्षादि कर्मशेषो न भवति ॥ १४ ॥

दधिभक्षान्तमहीनेषु* ॥ १५ ॥

---

* द्राह्यायणेऽप्येवम्।

अहीनेषु दधिभक्षान्तान्यहानि भवन्ति प्रागुदयनीयादतिरात्रादिति वर्त्तते ॥ १५ ॥

यावन्त्यहानि राजानं भक्षयेयुस्तावत् स्वब्राह्मणायोच्छिष्टं न दद्युरद्भिर्वा प्रोक्ष्य दद्युः[*] ॥ १६ ॥

यावन्त्यहानि राजानं सोमं भक्षयेयुः ऋत्विजस्तावत् स्वब्राह्मणायोच्छिष्टं न दद्युः अद्भिर्वा प्रोक्ष्य छादनं कृत्वा दद्युः किमिदम् उच्यते, श्रुत्यन्तरेषु दृष्टं राजन्यवैश्ययोः सोमभक्षाभावो भक्षविशेषाम्नानादिति एवं विधिं सूत्रकारः प्रकारान्तरेण दर्शयामास ॥ १६ ॥

तदेष श्लोकः सोममेतत् पिबत यत् किञ्चाश्नीत ब्राह्मणा मा ब्राह्मणायोच्छिष्टं दातमायात् सोममसोमप इति[†] ॥१७॥

तदेष श्लोक इति एतमेवार्थमनुवदति सोममेतत् पिबतेत्येतदादिना श्लोकेन ॥ १७ ॥

एतं परिक्रमꣳ सर्वक्रतुषु विद्यात् सर्वक्रषु विद्यात्[¶] ॥१८॥

योऽयं मन्त्रविधिस्त्वादिग्रहणेनेत्येतदादिर्विधिः परिक्रान्त एतं

---

[*] शाङ्खायनेऽनेन सूत्रद्वयं कृतम् ।

[†] शाङ्खायनेऽप्येवम् ।

[¶] शाङ्खायनेऽप्येवं किन्तु तस्य ग्रन्थे एतस्मादुत्तरे अतिरिक्तं सूत्रद्वयं वर्त्तते ।

सर्वक्रतुषु जानीयात्, ननु उक्तः सर्वक्रत्वधिकार इति तत् किमिदं पुनरुच्यते सर्वक्रतुषु विद्यादिति उच्यते अन्तप्रज्ञापनार्थं कथं अथ विध्यव्यपदेशे सर्वक्रत्वधिकार इति एतदादिविधेरयमन्त इति एतं सर्वक्रतुषु विद्यादिति अपर आह, सर्वक्रतोरधिकारः सर्वक्रत्वधिकार इति सर्वक्रतुः ज्योतिष्टोमः कुतः श्रुतेः एष वा प्रथमो यज्ञानामित्युक्ताच्च यथा वा इदमग्नेर्जातादग्नयो विक्रयन्त एवमेतस्मादध्यन्ये यज्ञा विह्रियन्त इत्युक्ताच्च यो हि त्रिवृदन्यं यज्ञक्रतुमापद्यते स तन्दीपयतीत्येतदाद्युक्ताच्च एतद्यदाङ्गरेको यज्ञ इत्येतद्धि सर्वे ज्योतिष्टोमा भवन्तीति एतद्विधाममापद्यमानाः सर्वे ज्योतिष्टोमा भवन्तीति सर्वक्रतुषु ज्योतिष्टोमः तदादावेव सर्वक्रत्वधिकार इति ज्योतिष्टोमाधिकारः तेषां पुनरुक्तदोषो नास्ति एवं ज्योतिष्टोमविधिं सर्वक्रतुषु विद्यात् अधिकविधेश्च प्रत्याहारं कुर्यात् ॥ १८ ॥

इति द्वितीयस्य द्वादशी कण्डिका ।

इति द्वितीयः प्रपाठकः समाप्तः ।

तृतीयः प्रपाठकः ।

अथ प्रथमा कण्डिका ।

षोड़शिसाम्ना स्तोष्यमाणो यथासनमुपविश्य हविर्द्धानं गत्वा षोड़शिग्रहमवेक्षेतोद्गाता यस्मादन्य इति* ॥ १ ॥

उक्तं सार्वक्रतुकं सामान्यविधानं साम्प्रतं षोड़शिनो गुणविधानमुच्यते सार्वक्रतुकोऽयं षोड़शी दशरात्रिके चतुर्थेऽहन्युत्पन्नः अत्रैव चास्य हिरण्यं सम्प्रदानं षोड़शिना स्तुवतइत्येवमादयो धर्म्माः पठिताः तेषां विधानं विवक्षुराह षोड़शिसाम्ना स्तोष्यमाण इति, ननु उक्त त्वया चतुर्थेऽहनि षोड़शी उत्पन्न इति तत् प्रकरणे चैव धर्मा वक्तव्याः स्युः तत् किमिदं विप्रकरणे गुणविधानम् आरभ्यत इति यदा च तस्मिन्नेव प्रकरणे यस्मादन्यो न परो अस्ति जात इत्येतदादि मन्त्र विधायोक्तम् उद्गाता ग्रहमवेक्षेत इति इदस्यावेक्षणविधानं किमर्थमिति चेत् अत्रोच्यते तदिदम् अवेक्षणं प्रकरणे स्तोत्रान्ते उक्तं तत्रायं संशयः किं कालं प्रति तावत् किं तस्मिन्नेव कालेऽवेक्षणमथान्यस्मिन्निति तथा किं हविर्द्धानस्थस्यैव अथावेक्षणप्रवृत्तिः सदसीति अवेक्षणं हि सदसि प्रवृत्तं सोमानां सौम्यस्य च तथा एते धर्मा हिरण्यसम्प्रदानादयः चतुर्थोत्पादाः अयञ्च षोड़शी प्रकरणान्तरेष्वपि श्रूयते

---

* शाट्यायनोऽप्येवम् ।

सर्वस्तोमातिरात्रादिषु तत् किमेते धर्माः प्रकरणस्थस्य भवन्ति उत प्रकरणान्तरेष्वपि षोड़शिनं भजतइति कुतः पुनरयं संशयः उच्यते, अप्राकृतत्वात् षोड़शिनः तेन किं प्राकृतो हि विधिर्व्विकृतीर्भजत अप्राकृतस्तु न वचनाद्विकृतीर्भजत इति अतोऽयमाचार्य्य एतान्मोहान् परितितीर्षुः सार्वक्रतुकानन्तरं षोड़शिनो विधानमारभते कथम् एतं सार्वक्रतुकं विधानं षोड़शिनः स्यादिति यदि ह्येतं विधानमाचार्य्यः प्रकरण आम्नायस्य तद्विषयमेवाभविष्यत् तन्माभूदतो विप्रकरण आरम्भः षोड़शिसाम्ना स्तोष्यमाणः यथासनमुपविश्य हविर्द्धानं गत्वा षोड़शिग्रहमवेक्षेत उद्गाता यस्मादन्य इति एष पदानां विच्छेदः अर्थो वक्ष्यते षोड़शिसाम्नेति कर्त्तृकरणलक्षणा तृतीया स्तोष्यमाण इति भविष्यत्कालोपदेशः यथासनमुपविश्य संस्थायामसने निःसृप्य सभस्तोपस्थानं कृत्वा कृत्स्नेन वा अकृत्वा वा स्वस्मिन्नासन उपविश्य हविर्द्धानं गत्वा षोड़शिग्रहमवेक्षेत उद्गाता यस्मादन्य इत्यनेन मन्त्रेण, ननु षोड़शिसाम्नेति सामग्रहणं किमर्थं यदायं षोड़शिशब्दः ऋतेऽपि सामग्रहणात् स्तोत्रवाची भविष्यत्येव अयं हि षोड़शिशब्दः त्रिषु वर्त्तते स्तोत्रे ग्रहे संस्थायामिति स्तोत्रे तावत् योगाय त्रीषु द्विपदासु स्तुवता षोड़शिना स्तुत इति ग्रहे प्रातःसवने षोड़शिनं गृह्णीत तृतीयसवने प्रजनयतीति स्वआयतने षोड़शी गृह्यतइति च संस्थायां सोऽब्रवीत् षोड़शी तेऽयं यज्ञक्रतुरस्त्विति सोऽयं षोड़शिशब्दः प्रयुज्यमान स्तोत्रग्रहसंस्थासु इत्यर्थात् प्रतीयते तदिह षोड़शिना स्तोष्यमाण इत्युक्ते ऋतेऽपि सामग्रहणात् स्तवनसामर्थ्यात् साम्नेति गम्यतएव तत् किमिदं सामग्रहणमिति अत्रोच्यते अस्य षोड़शिन

उक्थानन्तरविधानं तस्मिन्नेव क्रमे धर्माः प्राप्नुवन्ति इहस्य षोड़शी सामसंस्थान्तरेऽपि प्रयुज्यते तदस्यान्यस्मिन् स्थाने प्रयुज्यमानस्य धर्मा भवन्ति उत नेत्येष संशयः सोऽयमाचार्यः सामग्रहणं करोति कथ स्थानान्तरेऽपि प्रयुज्यमानस्य धर्मा भवेयुरिति क्व पुनरस्य स्थानान्तरे प्रयोगः अत्यग्निष्टोमे षोड़शिनं गृह्णीयादिति ॥१॥

एवमेव प्रातःसवने* ॥ २ ॥

योऽयं षोड़शिग्रहस्यावेक्षणे विधिरुक्तः षोड़शिसाम्ना स्तोष्यमाण इत्येतदादि तेनैव प्रातःसवनेऽप्यवेक्षेत यदि प्रातःसवनेऽपि गृह्णेन प्रातःसवने षोड़शिनं गृहीतन्तं तृतीयसवने प्रजनयति ॥ २ ॥

यदि चोत्तरयोरपि गृह्णीयुः* ॥ ३ ॥

यद्युत्तरयोरपि सवनयोर्गृह्णीयुः तयोरप्यनेनैव प्रकारेणावेक्षेत ॥ ३ ॥

अश्वः कृष्णः पूर्वस्यां सदसोद्वारि प्रत्यङ्मुखस्तिष्ठेदिति धानञ्जय्यः* ॥ ४ ॥

उक्तः अश्वः कृष्ण उपतिष्ठति साम्नेस्यायै तस्य स्थाननिर्देशः क्रियते अश्व इति प्रतीतपदार्थकः शब्दः कृष्ण इति वर्णनिर्देशः पूर्वस्यां सदसो द्वारि प्रत्यङ्मुखस्तिष्ठेदिति धानञ्जय्यः आचार्य आह ॥ ४ ॥

---

* द्राह्यायणेऽप्येवम् ।

अपरस्यां प्राङ्मुख इति शाण्डिल्यः* ॥ ५ ॥

अपरस्यां सदसो द्वारि प्राङ्मुखोऽश्वस्तिष्ठेदेवं शाण्डिल्य आचार्य आह ॥ ५ ॥

कृष्णाभावे श्यावः* ॥ ६ ॥

कृष्णस्याश्वस्याभावे श्यावः स्यात् श्याव इत्यभिरक्तो वर्णः न कृष्णो न श्वेतः तयोरन्तरेण वर्त्तते ॥ ६ ॥

तदभावे यः कश्चाश्वः* ॥ ७ ॥

तस्याभावः तदभावः तदिति पूर्वनिर्द्देशः तस्य श्यावाश्वस्याभावे यः कश्चाश्वः स्यात् अथ यः कश्च इति सिद्धे किं पुनरश्वग्रहणमधिकं क्रियतेऽश्व इति उच्यते, अन्यत्राप्यभावे यः कश्चाश्वः स्यात् यथा तस्मा अमुमादित्यमश्वं श्वेतं कृत्वा दक्षिणामानयन्तीति तथा अश्वश्श्यावो दक्षिणा सश्चाभिरक्तः सप्तकर्णो देय इति तत्रापि श्वेतश्यावयोरभावे यः कश्चाश्वः स्यात् ॥ ७ ॥

गौर्वाजोवाश्वाभावे* ॥ ८ ॥

यत्राश्वो न स्यात् गौर्वाजो वा भवेत् अथैवाश्वग्रहणं पुनः किमर्थम् उच्यते, तदभावे यः कश्चाश्व इत्युक्तं श्वेतश्यावयोरप्यभावे सत्य-

---

* द्राह्यायणेऽप्येवम्।

कोपह्वययोः यः कस्याश्च इति तयोरपि गौर्वाजो वाध्याभाव इति प्राप्नोति तन्निवृत्त्यर्थमस्यग्रहणं करोति, कथं, षोडशिन्येव गौर्वाजो वाध्याभावे भवेत् न तथातयोरपीति ॥ ८ ॥

योयः सामाङ्गं ब्रूयात् स हिरण्यं धारयेत्* ॥ ९ ॥

उक्तं हिरण्यसम्प्रदानं षोडशिना स्तुवत इति तद्विवेकार्थमाह, यो यः षोडशिसाम्नः अङ्गं ब्रूयात् स स हिरण्यं धारयेत् स्वस्यां स्वस्यां भक्तौ ॥ ९ ॥

उद्गाता निधनमुपयत्स्तु* ॥ १० ॥

उद्गाता निधनं ब्रुवस्तु तं हिरण्यं धारयेत् ॥ १० ॥

सर्वे वाभिमृशेयुः* ॥ ११ ॥

सर्वे वा हिरण्यमभिमृशेयुर्निधनमुपयन्तः ॥ ११ ॥

अवसर्पति प्रथमं पर्यायं गायेच्छ्लक्ष्णम्* ॥ १२ ॥

अवसर्पत्यादित्ये षोडशिसाम्नः प्रथमं पर्य्यायं गायेत् श्लक्ष्णम् अप्रकाशम् अव अधोभावे सृगतौ ननु कथमेतद्गम्यते यथा अवसर्पत्यादित्य इति उच्यते उपरिष्टादस्तत्यस्तमिते तृतीयमाविरिति ॥ १२ ॥

---

* द्राह्यायणेऽप्येवम् ।

विषिते द्वितीयम्मध्येन* ॥ १३ ॥

विगते षिते विषिते विगते शुक्ले वर्णे द्वितीयं पर्य्यायं गायेन्मध्यमेन स्वरेण ॥ १३ ॥

अस्तमिते तृतीयमाविः* ॥ १४ ॥

अस्तङ्गते आदित्ये तृतीयं पर्य्यायं गायेत् प्रकाशम् ॥ १४ ॥

यदोपाकुर्युस्तुवीरन्नेव † ॥ १५ ॥

इह प्रथमं कालनियमः कृतः अवसर्पति प्रथमं पर्य्यायमित्येवमादि सोऽयं विकल्पयति यदा यस्मिन् काले उपाकुर्युरध्वर्यवः तस्मिन्नेव काले स्तुवीरन् न स्वं कालमाद्रियेरन् अपरे विनिवेशं वर्णयन्ति सन्धिकाले षोडशिनि अत्यग्निष्टोमेऽहनि अतिरात्रे रात्राविति, अपरे ब्रुवते विचारितं, किमर्थमिदम् षोडशिन उद्गातुरिति उच्यते अत्राचार्य्याणामुभयथा प्रतिपत्तिः येषामहरन्ते तेषामहन्युपाकरणं येषां रात्रौ तेषां रात्राविति अतोऽयमाचार्य्य आरभते यदोपाकुर्युः तदा अप्रकाशं स्तुवीरन्नेवेति अथ तत्र कः स्वर इत्युच्यते ॥ १५ ॥

अहनि कृत्स्नं रात्रावाविः ‡ ॥ १६ ॥

---

* शाट्यायनकेऽप्येवम् ।

† शाट्यायनेन सूत्रद्वयमेकसूत्रं कृतम् ।

यदाह्न्युपाकुर्युः तदा अप्रकाशं स्तुवीरन् रात्रौ प्रकाशम् ॥ १६ ॥

उद्गात्रे दद्यादश्वहिरण्ये दक्षिणावत्सु* ॥ १७ ॥

उद्गात्रे दद्यात् यजमानः अश्वहिरण्ये अश्वस्य हिरण्यस्याश्वहिरण्ये दक्षिणावत्सु यज्ञेषु अथ दक्षिणावत्स्विति किमर्थम् अदक्षिणेषु दानप्रसङ्ग एव नास्ति उच्यते, पश्यत्ययं सत्रेष्वङ्गदक्षिणाप्रसङ्गं तेन सत्यप्यङ्गदक्षिणाप्रसङ्गे सत्रेषु षोडशिन्यश्वहिरण्ये निवर्त्तयति ॥ १७ ॥

सत्र एव ग्रहस्य भक्षयेयुरैन्द्रꣳसह इत्युदस्य हरिवद्धरिकासु चेत् स्तुवीरन् † ॥ १८ ॥

षोडशिग्रहस्य सत्र एव भक्षयेयुः नैकाहाहीनेषु ऐन्द्रं सह इत्यनेन यजुषा उदस्य हरिवद्धरिकासु स्तुवीरन् योऽस्मिन् यजुषि हरिवच्छब्दः तम् उत्क्षिप्य उत्सृज्य यद्यहरिकासु ऋक्षु षोडशिनं स्तुवीरन् अथ पुनः हरिवतीषु स्तुवीरन् नैव हरिवच्छब्दमुदस्येयुः हरिवत् कृतमेव मन्त्रं प्रयुञ्जीरन् अत्रैवशब्दः किमर्थं सत्र एवेति उच्यते, न केवलं षोडशिग्रहस्य अन्ये ये ग्रहास्तेषामपि च सत्र एव भक्षयेयुः नैकाहाहीनेषु एतस्यान्यतरस्मिन् व्यहे नियाम्नाणां द्रव्याणां भक्षयेयुरित्येतदादिना ॥ १८ ॥

---

* आम्नायशोऽप्येवम् ।

† आम्नायशेनैतेन सूत्रद्वयं कृतम् ।

अनुष्टुप्छन्दसा चमसस्य* ॥ १९ ॥

योऽन्तिमे स्तोमे यश्चमसः तस्यानुष्टुप् छन्दसा भक्षयेयुः ॥१९॥

पूर्वेण वा* ॥ २० ॥

मन्त्रेण चमसस्य भक्षयेयुः ऐन्द्रं मद इत्यनेन उदस्य हरिवद्हरिकास्तु स्तुवीरन्नित्यनुषज्यतएव ॥ २० ॥

तथा कुर्वन्निन्द्रस्य सम्राड्वरुणस्य राजा तौ ते भक्ष्यं चक्रतुरग्र एतं तयोरहमनुभक्ष्यं भक्षयामि वाग्जुषाणा सोमस्य तृप्यत्विति ग्रहस्य* ॥ २१ ॥

तथा कुर्वन् पूर्वेण मन्त्रेण चमसस्य भक्षणम् इन्द्रस्य सम्राड्वरुणस्य राजेत्येतदादिना यथासूत्रितेन मन्त्रेण ग्रहस्य भक्षयेयुः ॥ २१ ॥

इन्द्रमिद्धेति वा वाग्देवी सोमस्य पिबत्वित्येतदधिकया* ॥ २२ ॥

इन्द्रमिद्धरिवदित्येतयर्चा वाग्देवी सोमस्य पिबत्वित्येतदधिकया भक्षयेदिति विकल्पः ॥ २२ ॥

---

* माध्याविष्टेऽप्येवम् ।

ऐन्द्र७ सव इति चमसस्य सवे त्रिष्टुप्छन्दसा वाजपेयसाम्नि भक्षयेदिति गौतमः* ॥ २३ ॥

वाजपेयसाम्नि त्रिष्टुप् छन्दसा इत्येव छन्द आदेशं कृत्वा भक्षयेदिति गौतम आचार्य्य आह तच्छन्दस्त्वात् सोमस्य ॥ २३ ॥

अनुष्टुप्छन्दसेति धानञ्जय्यशाण्डिल्यौ † ॥ २४ ॥

अनुष्टुप्छन्दसा वाजपेयसाम्नि भक्षयेदिति धानञ्जय्यशाण्डिल्यावाचार्यावाहतुः यदूर्द्ध्वमुक्थेभ्यः अनुष्टुभः सभाग इति अनुष्टुप् छन्दसा रात्रौ ॥ २४ ॥

अनुष्टुप्छन्दसा रात्रौ † ॥ २५ ॥

न भक्षयेयुः अनुष्टुभत्वात् रात्रेः ॥ २५ ॥

पृथक् तृचेभ्यः सन्धौ हिं कुर्युः † ॥ २६ ॥

पृथङ्नानेत्यर्थः नानातृचेभ्यः सन्धौ हिंकुर्युः नानादैवत्यत्वात्तृचानाम् ॥ २६ ॥

इष्ट यजुष इति भक्ष्यः † ॥ २७ ॥

---

* लाट्यायनेनैतेन सूत्रद्वयं कृतम् ।

† लाट्यायनेऽप्येवम् ।

इष्टयजुष इत्यनेन यजुषा सर्वो भक्षः ॥ २७ ॥

गायत्रच्छन्दसातिरिक्तस्तोत्रेष्विति गौतमः* ॥ २८ ॥

अतिरिक्तस्तोत्रेषु गायत्रच्छन्दसा भक्षणमिति एवं गौतम आचार्य्यो मन्यते समाप्तेषु भक्षच्छन्दःसु पुनरुपक्रमे कोऽन्यो गायत्र्यात् स्यादिति ॥ २८ ॥

पृथग्भक्षच्छन्दोभिरनुपूर्वमिति धानञ्जय्यशाण्डिल्यौ* ॥२९॥

यानि चत्वारि भक्षच्छन्दांसि तैः पृथक् पृथक् आनुपूर्व्येण चतुर्व्वनवेक्ष्य तदानुपूर्व्येण भक्षयेयुरिति धानञ्जय्यशाण्डिल्यावाचार्य्यावाहतुः सम्भवाच्च सर्व्वेषां भक्षच्छन्दसाम् अर्थाच्च, कोऽर्थः अग्न्यादीनां देवतानाञ्च छन्दोभावात् ॥ २९ ॥

अनुष्टुप्छन्दसा वा* ॥ ३० ॥

मन्त्रेण भक्षयेयुः अनुष्टुप्भागनिमित्तत्वात् यदूर्द्ध्वमुक्थेभ्यः अनुष्टुभः सभाग इति ॥ ३० ॥

अच्छन्दसा वा* ॥ ३१ ॥

अच्छन्दसा वा मन्त्रेण भक्षयेयुः उपयुक्तत्वात् भक्षच्छन्दसाम् ॥३१॥

---

* द्राह्यायणेऽप्येवम्।

सन्धिवद्वा* ॥ ३२ ॥

यथा वा सन्धौ तथा वा भक्षयेयुः प्रवृत्तत्वात् मन्त्रस्य अनुपदेशाद्वान्येषाम् ॥ ३२ ॥

इति तृतीयस्य प्रथमा कण्डिका ।

अथ द्वितीया कण्डिका ।

आहिताग्निरसोमयाजी परꣳ सोमेन याजयित्वा परिभक्षं कुर्वीत* ॥ १ ॥

उक्ताः षोडशिनो धर्माः सोमस्य च भक्षविधानमुक्तं यावदतिरिक्तसोमाप्नोति साम्प्रतमुपरि भक्षविधानमुच्यते आहिताग्निः आहिता अग्नयो येन स आहिताग्निः असोमयाजी येन सोमेन इष्टं स सोमयाजी न सोमयाजी असोमयाजी परम् अन्यं सोमेन याजयित्वा अपरिभक्षं कुर्वीत अपरिभक्ष इति कर्मणः संज्ञा परस्याग्निषु येन सोमो भक्षितः तेन स्वाग्नयः परिभक्षिताः पितरश्च तदपरिभक्षार्थमिदं कर्मारभ्यते ननु आहिताग्निग्रहणं किमर्थमिति यदा

---

* भाष्यादर्शेऽप्येवम् ।

अवक्ष्यदसोमयाजीति नह्यनाहिताग्नेः सोमयागः स्यात् अन्यार्थेन वाहिताग्नित्वं विज्ञाप्यते इह गार्हपत्यदक्षिणाग्न्याहवनीयेषु आज्याधिश्रयणदर्भनिधानाज्यग्रहणान्यादेक्ष्यन्ते हुतायां प्रातराहुतावाज्यं गार्हपत्येऽधिश्रित्योदगुद्वासयेत् कंसे चमसे वा दर्भानवधाय दक्षिणाग्नावुपसादयेत् स्फ्यदर्भमुष्टी च पश्चिमेन गार्हपत्यं गत्वा पश्चादाहवनीयस्योपविश्य स्रुवेण स्रुच्याज्यं गृह्णीयाद्यावद्गृहीती स्यादिति अस्य च कर्मणो नान्तरेणाहिताग्नेः प्रसिद्धिः तदेवमर्थादाहिताग्नित्वे सिद्धे यदुच्यते आहिताग्निरित्येतदनर्थकं तस्मादाहिताग्निग्रहणं न कर्त्तव्यं क्रियमाणे कारणं वक्तव्यम् उच्यते, यद्याहिताग्निग्रहणं न कुर्य्यात् अनाहिताग्नेर्याजनप्रसङ्गो न स्यात् सोऽयमाहिताग्निग्रहणं करोति आहिताग्निरसोमयाजी परं सोमेन याजयित्वा इत्थं कर्म कुर्यात् अनाहिताग्निर्याजयित्वापि परं न वेदं कुर्य्यात् यावता तस्याग्नयो नैव सन्ति येषामपरिभचार्थमेवेदं कर्म क्रियते अथासोमयाजीति किमर्थं यावता वक्ष्यति सोमयाज्यपीति शाण्डिल्य इति असोमयाजिग्रहणं कथमुच्यते अनिष्टप्रथमस्येदं कर्म स्यात् इति सोमयाजी हि अनाहिताग्निरपि भवति सत्रेषु तथाप्यसावसोमयाज्येव अथ परग्रहणं किमर्थं यदा याजयितृत्वं सिद्धमेतत् परमिति उच्यते, परग्रहणं परमेव याजयित्वा न पितरं वा पुत्र वा भ्रातरं वेति निर्गुणः स्वजनः एभ्यो योऽन्यः परः पर एव सः ॥१॥

सोमयाज्यपीति शाण्डिल्यः* ॥ २ ॥

---

* शाण्डायनोऽप्येवम् ।

सोमयाज्यप्येतत् कर्म कुर्यादिति शाण्डिल्य: आचार्य आह, साम्प्रतमस्यापरिभक्तस्य कर्मण: कर्त्तव्यतोच्यते ॥ २ ॥

हुतायां प्रातराहुतावाज्यं गार्हपत्येऽधिश्रित्योदगुद्वासयेत्* ॥ ३ ॥

हुतायां प्रातराहुतौ हुतेऽग्निहोत्रे आज्यं घृतं गार्हपत्याग्नावधिश्रित्य उदक् उद्वासयेत् ॥ ३ ॥

कंसे चमसे वा द्रप्सानवधाय दक्षिणाग्नावुपसादयेत्* ॥ ४ ॥

कंसे वा भाजने दारवे वा चमसे दधिद्रप्सानवधाय दध्यवयवान् दक्षिणाग्नेः समीपे स्थापयेत् ॥ ४ ॥

स्फ्यदर्भमुष्टी च* ॥ ५ ॥

स्फ्यश्च दर्भमुष्टिश्च स्फ्यदर्भमुष्टी दक्षिणाग्नेः समीपे स्थापयेत् ॥ ५ ॥

पश्चिमेन गार्हपत्यं गत्वा पश्चादाहवनीयस्योपविश्य स्रुवेण स्रुच्याज्यं गृह्णीयाद्यावद्गृहीती स्यात्* ॥ ६ ॥

द्रप्सान् स्फ्यदर्भमुष्टी च स्थापयित्वा अनन्तरं पश्चिमेन प्रदेशेन

---

* माह्यायनेऽप्येवम्।

गार्हपत्यस्य गत्वा आहवनीयस्य पश्चिमे प्रदेशे उपविश्य यत्तदाज्यं गार्हपत्येऽधिश्रित्योदगुद्वासितं तस्मात् स्रुवेण स्रुचि गृह्णीयात् यावद्गृहीती स्यात् यदि चतुर्गृहीती यदि पञ्चगृहीती ॥ ६ ॥

तज्जुहुयादिमामग्ने शरणिं मीमृषो न इममध्वानं यममगाम दूरमापिः पिता प्रमतिः सोम्यानां भृमिरस्यृषिकृन्मर्त्यानाꣳ स्वाहेति* ॥ ७ ॥

यदि चतुर्गृहीतं यदि पञ्चगृहीतं तज्जुहुयादिमामग्न इत्येतदादिना यथासूचितेन मन्त्रेण ॥ ७ ॥

एवमेव गृहीत्वापां पुष्पमस्योषधीनाꣳ रसोग्नेः प्रियतमा तनूरिन्द्रस्य प्रियतमꣳ हविः स्वाहेति* ॥ ८ ॥

एवमेव गृहीत्वा यदि चतुर्गृहीतं यदि पञ्चगृहीतं अपां पुष्पमित्येतदादिना यथासूचितेन मन्त्रेण जुहुयात् ॥ ८ ॥

आज्यस्य पूर्वान् ग्रहान् गृहीत्वा दध्न उत्तमं विश्वेभ्यो देवेभ्यः स्वाहेति* ॥ ९ ॥

आज्यस्य पूर्वान् ग्रहान् गृहीत्वा यदि चतुर्गृहीतं चीनाज्यस्य

---

* आश्वलायनेऽप्येवम् ।

गृहीत्वा दध्न उत्तमं यदि पञ्चगृहीतं चत्वार आज्यस्य गृहीत्वा दध्न उत्तमं विश्वेभ्यो देवेभ्यः स्वाहेति अनेन यजुषा जुहुयात् ॥ ९ ॥

दधिशेषꣳ स्रुच्यानीयोदङ्ङावृत्य प्राश्नीयात्तव सोम व्रते वयं मनस्तनूषु पिप्रतः प्रजावन्तो अशीमहीति* ॥ १० ॥

दध्नो गृहीतावदानस्य अवयवः स्यात् तं स्रुच्यानीय स्रुचि कृत्वा उदङ्ङावृत्य प्राश्नीयात् तव सोम व्रते वयमित्येतदादिना यथासूत्रितेन मन्त्रेण ॥ १० ॥

प्रक्षाल्य स्रुचं यथेतं प्रत्याव्रज्य प्राचीनावीती भूत्वा दक्षिणा दक्षिणाग्नेः स्थण्डिलꣳ समुह्याद्भिः सम्प्रोक्ष्य स्फ्येन सकृदुल्लिख्योल्मुकमुपनिधाय दर्भानुपस्तीर्याप उपनिनीयामीषां त्र्यम्बकानां निपृणुयादवमेभ्यः पितृभ्यः स्वधा सह भक्षेभ्य इति प्रथमम्* ॥ ११ ॥

प्राश्य दधिशेषम् आचम्य प्रक्षाल्य स्रुचं अद्भिस्तत्क्षणं शौचप्राप्तेः यथागतं प्रत्याव्रज्य दक्षिणाग्नेः समीपं प्राचीनावीतित्वमुक्तं गृह्ये एवं प्राचीनावीती भवतीति तत्कृत्वा दक्षिणाग्नेः दक्षिणे प्रदेशे स्थण्डिलं समुह्य शोधयित्वा अद्भिः सम्प्रोक्ष्य स्फ्येन सकृदुल्लिख्य उल्लेखनं कृत्वा उल्मुकं उपनिधाय उल्मुकं लेखायाः समीपे निधाय दर्भा-

स्तीर्य अपो निनीय दर्भेषु अमीषां द्रप्सानान्निपृणयात् ये ते ध्वद्रप्साः कंसे चमसे च कृत्वा दक्षिणाग्नेः समीपे स्थापिताः तेषामेकं गृहीत्वा तेषु दर्भेषु निपृणयात् निदध्यात् अवमेभ्य इत्यनेन सूचितेन मन्त्रेण प्रथमम् ॥ ११ ॥

और्वेभ्यः काव्येभ्य इत्येवमेव दक्षिणा पृथक्* ॥ १२ ॥

योऽयं विधिरुक्तः प्रथमस्य निपरणस्य अनेनैव विधिना तस्य दक्षिणार्द्धे द्वितीयस्य निपरणं कुर्यादौर्वेभ्य इत्यनेन मन्त्रेण तदनन्तरमनेनैव विधिना तृतीयं निदध्यात् काव्यम् इत्यनेन उक्तं पितृभिरिति सर्वत्रानुसंहरेदित्येतदादि ॥ १२ ॥

अत्र पितरो मादयध्वं यथाभागमित्युक्त्वोदङ्ङावर्त्तेतासित्वा यावन्मन्येत तावदभिपर्यावर्त्तमानो जपेदमीमदन्त पितरो यथाभागमनन्तरिताः पितरः सोमपीथ्यादिति† ॥ १३ ॥

एवं सर्वेषां निधानं कृत्वा अत्र पितरो मादयध्वं यथाभागमित्युक्त्वा आसित्वा यावत् मन्येत तावत् यावन्तं मन्येत मनुष्याणां भोजनकालं तावन्तमासित्वा भुक्तं पितृभिरिति मत्वा ततः आभिमुख्येन पर्य्यावर्त्तमानो जपेत् अमीमदन्त पितर इत्येतं यथासूचितं मन्त्रम् ॥ १३ ॥

---

* शाङ्खायनेऽप्येवम्।

† शाङ्खायनेनैतेन सूत्रद्वयं कृतम्.

तान् दर्भान् द्रप्साꣳश्च दक्षिणाग्नौ प्रहरेत्* ॥ १४ ॥

तान् दर्भान् येषु निपरणं कृतं तांश्च द्रप्सान् ये निहिताः दक्षिणाग्नौ प्रहरेत् प्रक्षिपेत् ॥ १४ ॥

इति तृतीयस्य द्वितीया कण्डिका।

अथ तृतीया कण्डिका।

अतोऽनन्तरं कर्त्तव्यमित्युच्यते।

यज्ञोपवीती भूत्वाप उपस्पृश्य गृहान् व्रजञ्जपेद्गृहा मा बिभीत मावेपिध्वमूर्जं बिभ्रत एवमस्यूर्जं बिभ्रद्वः सुमनाः सुमेधा गृहानेमि मनसा दैवेन येषामध्येति प्रवसन्नेषु सौमनसो बहुर्गृहानुपह्वयामहे तेनोजानन्तु जान उपहूता इह गाव उपहूता अजावयोऽथो अन्नस्य यो रस उपहूतो गृहेषु न इति* ॥ १ ॥

इह प्राचीनावीतिना कर्म्म कृतं पैतृकमनन्तरमाह यज्ञोपवीती भूत्वेति यज्ञोपवीती भूत्वाप उपस्पृश्य अपः स्पृष्ट्वा गृहान् व्रजन् जपति गृहामाबिभीतेत्येतदादि यथासूचितं मन्त्रम् अत्रोच्यते गृहान् व्रजन् जपेदित्याह अथेदं पूर्वं कर्म कस्मिंश्चिद्देशे कृतमिति

---

* द्राह्यायणेऽप्येवम।

येनेदानीमाह गृहान् व्रजन् जपेदिति तत्रैके तावद्वर्णयन्ति योऽग्निहोत्र एवासौ यज्ञभूमिगतः अतस्तस्मिन् देशे इदं कर्म कृत[illegible] अतोऽनन्तरं गृहान् व्रजन्निदञ्जपेदिति, अपरे वर्णयन्ति त्रेता[illegible] हविर्गृहेभ्यः पृथगेव भवति तस्मिन्निदं कर्म कृत्वा गृहान् व्रजन्नेतज्जपेदिति, उभयमविरुद्धम् ॥ १ ॥

पश्चाच्छालाग्नेरुपविश्य जपेदिह गावः प्रजायध्वमिहाश्वा इह पुरुषा इहो सहस्रदक्षिणोऽपि पूषा निषीदत्विति* ॥२॥

गृहान् प्रविश्य शालाग्नेः पश्चिमे प्रदेशे उपविश्य जपेदिह गावः प्रजायध्वमित्येतदादि यथासूत्रितम् ॥ २ ॥

अग्नेस्तृणानि प्रत्यूह्य यः सुहृत्तमभिभाषेत* ॥ ३ ॥

शालाग्नेः समीपे यानि तृणानि प्रातर्होमस्तरणसम्बन्धीनि तानि प्रत्यूह्य योऽस्य सुहृत्तमस्य पिता वा पुत्रो वा भार्य्या वा तं प्रथममभिभाषेत ॥ ३ ॥

गोषु गा अपि सृजेदुपेदमुपपर्चनमासु गोषूपपृच्यतामुपर्षभस्य रेतस्युपेन्द्र तव वीर्य्ये इति* ॥ ४ ॥

गोषु गा अपिसृजेत् या अस्य स्वागावः तासु या दक्षिणा प्राप्तास्तामिश्रयेत् उपेदमुपपर्चनमिति यथासूत्रितेन मन्त्रेण ॥ ४ ॥

---

* द्राह्यायणेऽप्येवम् ।

सत्रेषु सर्वानध्वर्युर्दीक्षयेत्* ॥ ५ ॥

साम्प्रतमस्य गवामयनस्य विधिः विवक्षितः तं विवक्षुः सर्वसत्राणां सामान्यं विधानमारभते सत्रेषु सर्वानध्वर्युर्दीक्षयेदिति सत्रेष्वित्यधिकरणे सप्तमी सर्वानिति निरवशेषवाची शब्दः सत्रेषु सर्वान् सत्रिणः अध्वर्युर्दीक्षयेत् ॥ ५ ॥

दीक्षिष्यमाणान्दर्शयेत् स्वस्त्यात्रेयमरुन्धतीं ध्रुवमुदपात्रं य एषोऽक्षिणि पुरुषो दृश्यते* ॥ ६ ॥

दीक्षिष्यमाणान् स्वस्त्यात्रेयादीनि दर्शयेत् दृशिरो प्रेक्षणे स्वस्त्यात्रेय आदर्शः स्वज्वन्यत् ॥ ६ ॥

नैतानि परासुः पश्यतीति † ॥ ७ ॥

किमर्थं पुनरेषां दर्शनमुच्यते नैतानि परासुः पश्यति येषां पराभूताः असवः प्राणाः मुमूर्षवस्ते स्वस्त्यात्रेयादीनि न पश्यन्तीति ॥ ७ ॥

तान्न दीक्षयेत् † ॥ ८ ॥

तान् परासून्न दीक्षयेत् कस्माद्यतः असमाप्ते सत्रे तेषां मृत्यु-

---

* द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम्।

† द्राह्यायणोऽप्येवम्।

र्भवति एतत् विधानं संवत्सरसत्रं यावद्गृह्यं ऊर्ध्वं मृत[redacted]मदर्शनात् ॥ ८ ॥

दीक्षिष्यमाणाः संवदेरन् सह नः साधुकृत्या नाना पापकृत्या यास्मिन् सत्त्रे* ॥ ९ ॥

दीक्षाकाले उपस्थिते संवदेरन् एतत् समयं कुर्युः सह नः साधुकृत्याः साधूनां कर्मणां या क्रिया सा नः साधारणी या पापानां सा पृथक् अस्मिन् सत्रे ॥ ९ ॥

अथ यत् पुरा चकृम कर्त्तास्मस्तत् यथोपस्थितमेव नस्तदिति* ॥ १० ॥

अथ यत्पुरासन्नाः कृतवन्तः कर्त्तास्मः यथोक्तं करिष्यामः यथोपस्थितमेव नस्तदिति यद्यः करोति तस्यैव तदिति, ननु अनुक्तेऽप्येवमेव नह्यन्येन कृतमन्यस्मिन्नृच्छति कर्मकर्त्तारं गच्छति अत्रोच्यते, प्राक् सत्रदीक्षायाः तेषां साधारणं इष्टकापशुर्भवति ऊर्ध्वञ्च वक्ष्यति संवत्सरं संवसेयुर्द्वादशरात्रमहोरात्रौ वा यावद्वा सुनुयुरिति तत्कालनिवृत्त्यर्थमारभते यास्मिन् सत्रे इति ॥ १० ॥

तेषां दीक्षाप्रभृति पत्नीशालायां भोजनसंवेशने स्याताम्* ॥ ११ ॥

---

* शाङ्खायनेऽप्येवम् ।

तेषां सत्रिणां दीक्षामारभ्य पत्नीशालायां भोजनं संवेशनञ्च भवेतां प्रभृति शब्द आदौ ॥ ११ ॥

उपवसथ्यप्रभृत्याग्नीध्रीये* ॥ १२ ॥

उपवसथ्यादह्न आरभ्य सत्रिणां भोजनसंवेशने आग्नीध्रीये भवेयाताम् ॥ १२ ॥

सन्धिवेलयोर्वाचं यच्छेयुः* ॥ १३ ॥

द्वयोरपि सन्धिवेलयोर्वाग्यमनं कुर्य्युः आसूर्य्योदयादानक्षत्रदर्शनाच्च ॥ १३ ॥

विचक्षणान्तां वाचं भाषेरन्* ॥ १४ ॥

वाग्यमनादनन्तरं यां वाचं भाषेरन् तां विचक्षणान्तां विचक्षणमन्ते यस्याः सा विचक्षणान्ता, अपरे ब्रुवते विचक्षणान्तामिति साध्वन्तां वाचं ब्रूयुरिति पूर्वएव तु यः श्रेयान् तस्य साधुवचनप्रसङ्गोऽस्ति ॥ १४ ॥

न कञ्चनाभिवादयेरन्* ॥ १५ ॥

योऽप्यवश्यमभिवादनीयः तमपि नाभिवादयेरन् चनेत्ययं निपातः नेत्ययं प्रतिषेधः ॥ १५ ॥

---

* द्राह्यायणोऽप्येवम्।

न शूद्रेण सम्भाषेरन्* ॥ १६ ॥

न शूद्रेण सह सम्भाषणं कुर्युः ॥ १६ ॥

नाधिष्ण्यउत्तपेरन्* ॥ १७ ॥

ये परिगृहीता अग्नयः तानुक्त्वा अन्येष्वग्निषु नोत्तपेरन् ॥ १७ ॥

न प्रतीच्या द्वारा पत्नीशालाया निष्क्रामेयुः* ॥ १८ ॥

ऋज्वर्थः ॥ १८ ॥

प्राञ्चमुदञ्चं वोच्चारं कुर्वीरन्* ॥ १९ ॥

देवयजनस्य प्रागुदग्वा निष्क्रम्य मूत्रपुरीषे कुर्वीरन् ॥ १९ ॥

न बहु वदेयुः* ॥ २० ॥

नाप्रयोजनं बहु वदेयुः ॥ २० ॥

न दन्तान् दर्शयेरन्* ॥ २१ ॥

न कस्यचिद्दन्तान् दर्शयेरन् जायते वाव दीक्षयति ॥ २१ ॥

नाहुतस्याश्नीयुः* ॥ २२ ॥

हविरुच्छिष्टभक्षाः स्युः ॥ २२ ॥

---

* शाङ्खायनोऽप्येवम् ।

ननानन्यो अनः पश्येत्* ॥ २३ ॥

नैनान् भुञ्जानानन्यः पश्येत् परिवेष्टृभ्योऽन्यत्र ॥ २३ ॥

सर्वेषां सवनानां प्राश्नीयुः* ॥ २४ ॥

सर्वेषां सवनानां सवनमुखीयान् भक्षयित्वा सन्नेषु नाराशंसेषु भोजनं कुर्युः ॥ २४ ॥

क्रोधानृते वर्जयेयुः* ॥ २५ ॥

स्पष्टार्थः ॥ २५ ॥

एतानि व्रतानि दीक्षासु † ॥ २६ ॥

एतानि यथोद्दिष्टव्रतानि दीक्षासु भवन्ति ॥ २६ ॥

दीक्षोपसत्सु वा † ॥ २७ ॥

अथवा दीक्षासु चोपसत्सु च ॥ २७ ॥

आवा सत्रान्तात् † ॥ २८ ॥

यावत्सा सत्रसमाप्तिरिति एतानि यथासम्भवं स्युः ॥ २८ ॥

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणे एतदंश नास्ति ।

उदयास्तमयावभ्याश्रावणञ्च बहिर्वेदि प्रहृते वर्जयेयुः* ॥ २८॥

आदित्यस्य उदयास्तमयौ अभ्याश्रावणञ्च हविषः प्रहृते सुत्यासु बहिर्वेदि वर्जयेयुः एतेषु कालेषु बहिर्वेदिस्थानमासनं वा वर्जयेयुः॥२८॥

इति तृतीयस्य तृतीया कण्डिका ।

अथ चतुर्थी कण्डिका ।

तेषाञ्चेदेनाꣳस्त्रयाणां किञ्चिदेयाद् गृहपतावुपहवमिच्छेरन् † ॥ १ ॥

तेषां उदयास्तमयाभ्याश्रावणानां बहिर्वेदि स्थानं किञ्चिदागच्छेत् गृहपतावुपहवमिच्छेरन् उपहवे गृहपतिरधिकरणभूतः गृहपतेः सकाशादुपहवमिच्छेयुः ॥ १ ॥

तच्चेदुद्गातरि † ॥ २ ॥

तं यदि गृहपतिः एषां त्रयाणां किञ्चिदागच्छेत् उद्गातुः सकाशादुपहवं गच्छेत् ॥ २ ॥

दीक्षानुपूर्व्येण वा सर्वेषाम् † ॥ ३ ॥

---

* शाट्यायने विशेषोऽस्ति ।

† शाट्यायनेऽप्येवम् ।

दीक्षानुपूर्व्व्येण वा यो यस्यानन्तरं दीक्षितः स तस्मादुपह्वमिच्छेत् ॥ ३ ॥

परिहृतासु वसतीवरीषु संविशेयुः* ॥ ४ ॥

वसतीवरीपरिहरणे कृते ततः स्वपेयुः ॥ ४ ॥

तेषाञ्चेत् कश्चित् प्रेयादतीर्थेन निर्हृत्याहार्येणानाहिताग्निं दहेयुः* ॥ ५ ॥

तेषां सत्रिणां यदि कश्चित् म्रियेत तमतीर्थेन निर्हृत्य निष्क्राम्य आहार्य्येणाग्निना अनाहिताग्निन्दहेयुः तेषां सत्रिणां आहार्य्येण लौकिकेनेत्येतद्विधानं अनाहिताग्नेरपि सत्रासनं दर्शयति ॥ ५ ॥

अरण्योरग्नीऽ समारोप्य ते आम्नानेन निर्हृत्य निर्मन्थ्येनाहिताग्निम्* ॥ ६ ॥

अरण्योः अग्नीन् समारोपणं कृत्वा मन्त्रवन्ते अरणी आम्नानेन तीर्थेन निर्हृत्य निर्मन्थ्येनाग्निना आहिताग्निं दहेयुः ते इति किमर्थम् उच्यते, प्रेतोऽत्राधिकृतः अतस्ते इत्याह, ते अरणीतीर्थेन निर्हरेयुः नत्वाहिताग्निमपि तीर्थेन, ननु यदा तावदुक्तं दीक्षिष्यमाणान् दर्शयेत् स्वस्त्यात्रेयादीनि नैतानि परासुः पश्यतीति तान् दीक्षयेदिति तद्दर्शिना नैव दीक्षन्ते तत् किमिदमारभ्यते तेषाञ्चेत्

---

* द्राह्यायणेऽप्येवम् ।

219

कश्चित् म्रेयादित्यादि अथ पुनस्तद्दर्शितोऽपि म्रियन्ते ततः तद्विधानानर्थक्यम् उच्यते यान्येतानि निमित्तानि तानि परिमितकालानि तेषां दीर्घसत्रेष्वसम्भवः अतोविधानं तदर्थम् ॥ ६ ॥

मध्यमस्य रात्रिपर्य्यायस्य दैवोदासं होतृषाम स्यादौर्द्धसद्मनं वा* ॥ ७ ॥

इह सत्रिप्रकरणे मध्यमे पर्य्याये द्वे होतृषामनी पठिते तयोश्च द्वयोरेकस्मिन् क्रतौ सम्भवो नास्ति एकार्थत्वात् अतो ब्रवीति दैवोदासं होतृषाम स्यादौर्द्धसद्मनञ्चेति विकल्पयति सत्रे ॥ ७ ॥

अभिप्लवस्य द्वितीयेऽहनि भर्गौयश इति प्राग्विषुवतो व्यत्यासं स्यातामिति गौतमः* ॥ ८ ॥

इह मशकः पठत्याभिप्लविके द्वितीयेऽह्नि परितोषिषश्च तासु तमिति माधुच्छन्दसश्च भर्गस्य यशो वेति तत् किमयं विनिवेशार्थं विभाषितः अथैकत्र यद्द्वयमेव विकल्पयति सोऽयमाचार्य्यो विनिवेशं विकल्पयति अभिप्लवस्य द्वितीयेऽहनि भर्गो यश इति प्राग्विषुवतोव्यत्यासं स्यातामिति ये प्राग्विषुवतोऽभिप्लवाः तेषु भर्गस्य यशसीति द्वितीयेऽहनि व्यत्यासं स्यातामिति प्रथमे भर्गः द्वितीये यश इति ॥८॥

ऊर्द्धञ्च त्रिष्वभिप्लवेषु* ॥ ९ ॥

---

* द्राह्यायणेऽप्येवम् ।

ऊर्द्धञ्च विषुवतः ये त्रयोऽभिप्लवाः तेषु च भर्गो यशो भर्ग इति ॥ ९ ॥

यशोभर्ग इति परेषु* ॥ १० ॥

तेषामप्यूर्द्धं येऽभिप्लवाः उत्तरस्मिन् पक्षसि † तेषु यशो भर्ग इत्येवं व्यत्यासः स्यात् ॥ १० ॥

सकृद्द्विर्वा यशः पुरस्तात्तथोपरिष्टाद्भर्ग इतरेष्वित्यपरम्* ॥ ११ ॥

अपरमन्यद्विधानं सकृद्द्विर्वा यशः पुरस्ताद्भवेत् तथोपरिष्टाद्विषुवतः त्रिष्वभिप्लवेषु सकृद्द्विर्वा यशो भवेत् भर्ग इतरेषु अभिप्लवेषु स्यात् ॥ ११ ॥

भर्गः पूर्वस्मिन् पक्षसि यश उत्तरस्मिन्नित्यपरम्* ॥ १२ ॥

अपरम् अन्यत्तृतीयं विधानं भर्गः पूर्वस्मिन् पक्षसि स्यात् यश उत्तरस्मिन्निति अभिप्लवेष्विति प्रकृतम् ॥ १२ ॥

एताभ्यामुक्ते वीङ्क श्रुद्धाश्रुद्धीये* ॥ १३ ॥

---

* द्राह्यायणेऽप्येवम् ।

† पक्षसीत्यसंस्कृतः पाठः पक्षे इति साधुः किन्तु पञ्चसु पुस्तकेष्वप्यनेकत्र सूत्रे वृत्तौ चैवं दर्शनात्तथैव रक्षितः ।

आभिप्लविक एवं चतुर्थेऽहनि पठति वीङ्कशाङ्कुशाङ्कुशीयञ्चेति तयोरप्येत एव विकल्पाः स्युः ये भर्गयशसः ॥ १३ ॥

विषुवत ऊर्द्ध्वं वीङ्कमेव स्यादिति धानञ्जय्यः* ॥ १४ ॥

विषुवत ऊर्द्ध्वं येऽभिप्लवास्तेषु वीङ्कमेव स्यात् न शाङ्कुशाङ्कुशीयम् इत्येवं धानञ्जय्य आचार्य्यो मन्यते एवशब्दोऽवधारणार्थः ॥ १४ ॥

पञ्चमे यदहर्ग्रामे गेयꣳ सन्ततिः स्यान्मानवात्पूर्वꣳसामꣳ स्यात्* ॥ १५ ॥

पञ्चमेऽभिप्लवे [यस्मिन्नहनि ग्रामे गेयं सन्ततिः स्यात् तस्मिन्मानवात् पूर्वंसामं स्यात् इहत्याम् अजाम्यर्थेन उक्तमर्षीणाम युमन्तम इति गायत्रञ्च य एवस्यापत्यं सन्ततिः शाकरवर्णान्तान्युत्तरेष्विति ॥ १५ ॥

इषोवृधीयसमन्ते पृष्ठ्यानन्तर्ये षष्ठे* ॥ १६ ॥

एवं मशकः पठति आभिप्लविके षष्ठेऽहनि इन्द्रायेन्दो मरुत्वत इति गायत्रस्यास्यसूक्तस्य महादिषोवृधीयं कुर्यात् मृज्यमानः सुहस्त्येत्यैडस्यौचोरन्त्यं विनिधनस्याख्यास्य महत् समन्तं कुर्यात् महत् महादित्युक्तेन वै स्पष्टं कतरस्मिन्नभिप्लव इति सोऽयमाचार्य्यः स्पष्टी-

---

* भाष्ययोरप्येवम् ।

करोति पृष्ठ्यानन्तर्ये षष्ठेऽहनि इषोवृधीयञ्च समन्तञ्च इषोवृधीयसमन्ते यस्याभिप्लवस्यानन्तरः पृष्ठ्यः स्यात्तस्य षष्ठेऽहनि कुर्यात् अथ षष्ठग्रहणं किमर्थमिति चेत् यदा षष्ठे विषये एव एते उक्ते उच्यते आवृत्तस्याप्येतस्मिन् पक्षसि नियमार्थम् ॥ १६ ॥

पूर्वस्मिन् पक्षसि त्रिषु चतुर्थोऽभिप्लवो लुप्येत* ॥ १७ ॥

पूर्वस्मिन् पक्षसि षष्ठे मासि त्रीनभिप्लवान् पठति तत्र त्रिषु कर्त्तव्येषु प्रथमो लुप्यताम् उतान्य इति संशयः सोऽयमाचार्य्य आह त्रिषु कर्त्तव्येषु चतुर्थो लुप्येत आकरवर्णवानिति ॥ १७ ॥

एत एवावृत्ता ऊर्द्ध्वं विषुवतोऽभिप्लवाः* ॥ १८ ॥

य एते पूर्वस्मिन् पक्षसि अभिप्लवा अनुक्रान्ताः एत एव सर्वे उत्तरस्मिन् पक्षसि आवृत्ता भवेयुः उत्तमादुत्तमादारभ्येरन् नतु प्रतिमासम् ॥ १८ ॥

तेषां प्रतिलोममहान्युपेयुः* ॥ १९ ॥

तेषामभिप्लवानाम् आवृत्तानां सताम् अहान्यपि प्रातिलोम्येन कुर्युः षष्ठादह्न आरभ्य प्रातिलोम्येन यावत् प्रथमम् ॥ १९ ॥

पृष्ठ्यस्वरसाम्नाञ्च* ॥ २० ॥

---

* द्राह्यायणेऽप्येवम् ।

पृष्ठ्यस्य स्वरसामानस्य पृष्ठ्यस्वरसामानः तेषां पृष्ठ्यस्वरसाम्नां उत्तरस्मिन् पक्षसि प्रातिलोम्येन अहान्युपेयुः ॥ २० ॥

दशरात्रसमीपे त्रिषु चतुर्णामावृत्तानां प्रथमो लुप्येतेति धानञ्जप्य उत्तम दूषोवृधीयसमन्ते स्यातामिति* ॥ २१ ॥

दशरात्रस्य सन्निकर्षे ये गोआयुषः पूर्वोक्तयोऽभिप्लवाः तेषु चतुर्णामावृत्तानां यः प्रथमः स लुप्येत एवं धानञ्जप्यो मन्यते उत्तमे चाभिप्लविके उत्तमे दूषोवृधीयसमन्ते स्यातामिति ॥ २१ ॥

विपरीतमेतच्छाण्डिल्यायनस्य † ॥ २२ ॥

एतद्विधानं विपरीतं शाण्डिल्यायनस्य विपर्ययः प्रातिलोम्यं उत्तमो लुप्येत प्रथम दूषोवृधीयसमन्ते स्यातामिति ॥ २२ ॥

विषुवत्समीपे च † ॥ २३ ॥

विषुवत्समीपे च येऽभिप्लवास्तत्स्थेषु चैवमेव शाण्डिल्यायनस्य ॥ २३ ॥

त्रिष्वभाव दूषोवृधीयसमन्तयोः † ॥ २४ ॥

---

* द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

† द्राह्यायणोऽप्येवम् ।

त्रिष्वभिप्लवेषु कर्त्तव्येषु अभावः अक्रिया दूषोऌधीयममन्तयोः ॥ २४ ॥

भावस्त्वाचार्य्याणां भावस्त्वाचार्य्याणाम्* ॥ २५ ॥

दूषोऌधीयममन्तयोः भावः आचार्य्याणां मतेन, तुशब्द अक्रियापेक्षानिवृत्त्यर्थः ॥ २५ ॥

इति तृतीयस्य चतुर्थी कण्डिका ।

अथ पञ्चमी कण्डिका ।

पृष्ठ्ये रथमतिवक्षेयुः पश्चात् प्राञ्चं दक्षिणतो वोदञ्चं बहिर्वेदि रथन्तरस्य स्तोत्रे* ॥ १ ॥

अभिप्लवे ये संशयास्ते निर्णीताः साम्प्रतं पृष्ठ्यस्य धर्म्मा विवक्षिताः तद्विवक्षुराह पृष्ठ्ये रथमतिवक्षेयुरिति इह ब्राह्मणं प्रजापतिर्वा एतां गायत्रीं योनिमपश्यत् स आदीधीतास्माद्योनेः पृष्ठानि सृजा इति स रथन्तरमसृजत तद्रथस्य घोषोऽन्वसृज्यतेत्येतदादि एषां पृष्ठानां रथन्तरादीनां घोषादयो धर्म्मा ज्योतिष्टोमप्रकरणे आम्नाता तेषाञ्च समुदितानामसम्भवः ज्योतिष्टोमे तैश्च धर्म्मैः प्रतिप्रयोगमवश्य

---

* लाट्यायनेऽप्येवम् ।

भवितव्यं ततः तत्प्रत्यनुष्ठेयाः यावता अनुब्राह्मणस्य[redacted]ाः पृष्ठधर्माः तत्प्रत्यनुष्ठेया इति तेषां समुदितानां प्रयोगविषयोऽयं विधिस्तस्मात् पृष्ठ्ये रथमतिवहेयुरिति अत्रोच्यते, तत् किमिदं पृष्ठ्यग्रहणं यावता अभिप्लवस्यानन्तरः पृष्ठ्य एव आभिप्लविकस्तु विधिरुक्तः तच्छेषो विधिरुच्यमानः आनन्तर्यादत्र पृष्ठ्यो भवत्येव वैरूपादीनामसम्भवादभिप्लव इति उच्यते पृष्ठ्यग्रहणं क्रियते विशेषविध्यर्थं पृष्ठ्यानां समस्तानां धर्मार्थं पृष्ठान्यस्मिन् सन्तीति पृष्ठ्यः एतद्दर्शयति यत्र यत्र समुदितानि पृष्ठानि भवेयुः तत्र तत्र धर्मा भवेयुरिति यथा विश्वजिति विश्वजिच्छिल्पेऽप्तोर्यामीति पृष्ठ्य इत्यधिकरणे सप्तमी आधारोऽधिकरणं आश्रियते रथघोषादयो धर्मा रथमतिवहेयुः शीघ्रं वहेयुः पश्चात्प्राञ्चन्देवयजनस्य पश्चात् प्राङ्मुखं वहेयुः दक्षिणतो वा उदञ्चम् अतिवहेयुः बहिर्वेदि वेदेर्बहिः रथन्तरस्य स्तोत्रे रथन्तरस्य साम्नः स्तोत्रे स्तूयमाने आस्तोत्रान्तात् ॥ १ ॥

बृहतो दुन्दुभिमाहन्युः* ॥ २ ॥

बृहतः स्तोत्रे स्तूयमाने दुन्दुभिमाहन्युः स्तनयित्नुशब्दोऽनुकर्षणार्थः नहि शक्यं स्तनयित्नुशब्दं बलादुपपादयितुम् अतो दुन्दुभिं वादयेयुः बहिर्वेदीति प्रकृतम् ॥ २ ॥

उपवाजयमाना वैरूपेण स्तुवीरन्नुपवाज्यमाना वा* ॥ ३ ॥

---

* आश्वलायनोऽप्येवम् ।

व्यजनेन इतरेतरम् उपवाजयमानाः सन्तः वैरूपेण साम्ना स्तुवीरन् अन्यैर्वोपवाज्यमानाः इतरेतरमेकेन व्यजनेन ॥ २ ॥

वाचयित्वा यजमानं स्तुतमसीत्यनेन वातआवात्विति तृचेनानुमन्त्रयेत्* ॥ ४ ॥

कतमस्यानुमन्त्रणं व्यजनस्य यो घोषवाहः ॥ ४ ॥

वैराजस्य स्तोत्र उपाकृत उपर्य्यनूरुसकलं निधाय तृणे च तस्योपरि तिरश्चीमरणिं निधायाभ्यात् संप्रजननं कृत्वा त्रिः प्रदक्षिणमभिमन्थेद्गायत्रं छन्दोऽनुप्रजायस्व त्रैष्टुभं जागतमानुष्टुभं वैराजमिति गौतमः* ॥ ५ ॥

वैराजस्य साम्नः स्तोत्रे उपाकृते पुरस्ताज्जपं जपित्वा उरोरुपरिष्टात् सकलम् आनुलोम्येन निधाय प्रस्थापयित्वा तृणे च तस्य सकलस्योपरि तिरश्चीमरणिं स्थापयित्वा अभिमुखमात्मनः अग्निप्रजननं कृत्वा येन प्रदेशेनाग्निः अवतार्य्यते तदुत्तरारण्या त्रिः प्रदक्षिणमभिमन्थेत् गायत्रं छन्दोऽनुप्रजायस्वेत्येतदादिना मन्त्रेण गौतम आचार्य्य आह ॥ ५ ॥

चतुर्भिरिति धानञ्जप्यः* ॥ ६ ॥

---

* द्राह्यायणेऽप्येवम ।

चतुर्भिश्छन्दोभिरिति धानञ्जय्य आचार्य्यो मन्यते गायत्रं छन्दोऽनुप्रजायस्व त्रैष्टुभं जागतमानुष्टुभमिति ॥ ६ ॥

त्रिभिरिति शाण्डिल्यः* ॥ ७ ॥

त्रिभिश्छन्दोभिरिति शाण्डिल्य आचार्य्य आह, गायत्रं छन्दोऽनुप्रजायस्व त्रैष्टुभं जागतमिति क्रियायाः सर्वत्रानुवचनम् ॥ ७ ॥

अरण्योः सन्धानमालभ्योपजिघ्रेत् तेजोऽसि तेजो मयि धेहीति* ॥ ८ ॥

अरण्योः सन्धानमालभ्य स्पृष्ट्वा उपजिघ्रेत्तेजोऽसि तेजो मयि धेहीत्यनेन मन्त्रेण, घ्रा गन्धोपादाने ॥ ८ ॥

मथ्यमाने स्तोमं युञ्ज्यात्* ॥ ९ ॥

मथ्यमानेऽग्नौ यथाविधानं स्तोमयोजनं कुर्य्यात् ॥ ९ ॥

जाते स्तुवीरन्* ॥ १० ॥

जातेऽग्नौ स्तुवीरन् अग्निघोषे ॥ १० ॥

वाचयित्वा यजमानं पुनरूर्जा निवर्त्तस्व पुनरग्न इषायुषा पुनर्नः पाह्यंहसः सह रय्या निवर्त्तस्वाग्नेऽपिन्वस्व धारया

---

* द्राह्यायणोऽप्येवम् ।

विश्वस्मा विश्वतस्परीत्यनुमन्त्र्याभिजुहुयात् तदुक्तं ब्राह्मणेन* ॥ ११ ॥

वाचयित्वा यजमानं स्तुतस्य स्तुतमसीति पुनरूर्जा निवर्त्तस्वेत्ये तदादिना यथासूचितेन मन्त्रेण अग्निमनुमन्त्र्य प्राहुत्याहवनीये आज्येनाभिजुहुयात् तदुक्तं ब्राह्मणेन प्रेद्धो अग्ने दीदिहि पुरो न इति विराजाभिजुहोतीति ॥ ११ ॥

स्वाहाकारेणोत्तराम* ॥ १२ ॥

उत्तरामाहुतिं स्वाहाकारेण जुहुयात् आगत्योपरिष्टाज्जपः ॥ १२ ॥

अपः सावका उपनिधाय महानाम्नीभिः स्तुवीरन्* ॥ १३ ॥

अप इति कर्मणि द्वितीया सह अवकाभिः सावकाः अवका सैवालाः ॥ १३ ॥

यो यः सामाङ्गं ब्रूयात् स उद्घोषं जनयेत्* ॥ १४ ॥

यो यः स्वभक्तिं ब्रूयात् स उद्घोषं कुर्य्यात् निधनं तत् सर्वे ॥ १४ ॥

---

* द्राह्यायणेऽप्येवम।

वाचयित्वा यजमानं ता निनयेदास्तावेऽनाधृष्टासि तान्त्वा सोमोराजावनुयाम पीता उपतिष्ठन्त आपो ये प्राकृता स्वा ये स्वराजस्ते अर्षन्तु ते वर्षन्तु ते कृण्वन्त्विषमूर्जꣳ रयिस्पोषन्तद्धिदेयेति* ॥ १५ ॥

वाचयित्वा यजमानं आपः अवकार्मिश्रा निनयेत् निक्षिपेत् आस्तावं अनाधृष्टासीत्येतदादिना यजुषा यथाम्नातेन आस्तावस्थत्वात्तदर्थो प्रसिद्धः ॥ १५ ॥

समन्यायन्तीति वा † ॥ १६ ॥

समन्यायन्तीति एतयर्चा वा निनयेत् ॥ १६ ॥

समुद्रं वः प्रहिणोमीति वा † ॥ १७ ॥

समुद्रं वः प्रहिणोमीत्येतदादिना यजुषा वा निनयेत् ॥ १७ ॥

सर्वैर्वा* ॥ १८ ॥

सर्वैर्वा निनयनमन्त्रैः अनाधृष्टासीत्येतदादिभिः निनयेत् ॥ १८ ॥

अष्ठीवतोरवका उपोहेरन्* ॥ १९ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

सर्वेर्व्वा अष्ठीवतोरङ्गप्रश्लेषयोः स्थापयेयुः अष्ठीवतोरिति जानुभ्यामुपरि ॥ १९ ॥

छदिषि वर्षकामोऽध्यासयेदिति शाण्डिल्यः* ॥ २० ॥

छदिषि छादनस्योपरि वर्षकामः निदध्यात् एवं शाण्डिल्य आचार्य्य आह ॥ २० ॥

गोष्ठे पशुकामः* ॥ २१ ॥

अवका निदध्यात् ॥ २१ ॥

सभायां यशस्कामः* ॥ २२ ॥

यशस्कामः सभायामवका निदध्यात् ॥ २२ ॥

श्मशानेऽभिचरन्* ॥ २३ ॥

अभिचरन् अभिचारं कुर्वन् श्मशाने अवका निदध्यात् श्मं शरीरं तद्यस्मिन् शेते तत् श्मशानम् ॥ २३ ॥

इति तृतीयस्य पञ्चमी कण्डिका ।

---

* द्राह्यायणोऽप्येवम् ।

अथ षष्ठी कण्डिका ।

वारवन्तीयस्य स्तोत्रे धेनुः संवाशयेयुर्दक्षिणतः कृत्वोत्तरतो वत्सान्* ॥ १ ॥

उक्तं स रेवतीरसृजत तद्भवा घोषोऽभ्यसृज्यतेति ताश्च रेवत्यः पवमाने प्रयुज्यन्ते रथन्तरादीनां पञ्चानां पृष्ठानां पृष्ठस्थानेषु प्रयुज्यमानानां सन्निधौ रथव्यतिवर्त्तनादयो धर्म्माः प्रयुक्ताः तत्सन्निधित्वात् धर्म्माणां किं सन्निधौ रेवतीनां पवमान एव क्रियते धर्माः अथ पृष्ठस्थाने इत्यत्राह. वारवन्तीयस्य स्तोत्रे धेनूः संवाशयेयुरिति अपा वा एष रसो यद्रेवत्यो रेवतीनां रसो यद्वारवन्तीयमिति रेवतीनां वारवन्तीयं रसः सारमिति तद्वारवन्तीयमिति सन्निधौ प्रयुज्यमाना रेवत्यः प्राप्नुवन्ति वारवन्तीयस्य साम्नः स्तोत्रे धेनुः संवासयेयुः कथं संवासयेयुः देवयजनस्य दक्षिणे प्रदेशे कृत्वा गा उत्तरतो वत्सान् कृत्वा ॥ १ ॥

पूर्वेण सदः संसृज्य पश्चिमेनाग्नीध्रीयमुदीचीरत्यजेयुः* ॥ २ ॥

समाप्ते स्तोत्रे सदसः पूर्वे प्रदेशे मिश्रयित्वा वत्सैः समाधाय आग्नीध्रीयस्य पश्चिमे प्रदेशे उदीचीं दिशं प्रति प्रस्थापयेयुः निष्कालयेयुः इदमुद्गातृकर्म तत्संयोगात् रथप्रवर्त्तनादिधर्म्मवन्ताः पृष्ठधर्माः

---

* द्राह्यायणेऽप्येवम् ।

सर्वत्र भवेयुः तेषामुपदिष्टत्वात् यस्य येन कर्मणा संयोगः सतद्द्रव्यं लभते प्रतिस्तोत्रमुद्गात्रे एतत् दद्यात् ॥ २ ॥

वाचयित्वा यजमानं गोनामभिरनुमन्त्रयेत हव्ये काम्ये चन्द्रे ज्योत इडेरन्ते जुष्टे स्वर्नरि मयि वोरायः अयन्तामिड़ एह्यदित एहि जुष्टे जुष्टिन्ते गमेयमुपह्नता उपह्वं वोशीयेति* ॥ ३ ॥

वाचयित्वा यजमानमुद्गाता गाः गोनामभिरनुमन्त्रयेत हव्ये काम्ये इत्येतदादिभिर्यथासूत्रितैः अत्रोच्यते गोनामभिरिति किमर्थं यदा सर्वाणि निर्दिष्टान्येव, उच्यते गोनामग्रहणं संव्यवहारार्थम् अन्यत्रापि यत्र गोनामानीति ब्रूयात् तत्रैतान्येव प्राप्तव्यानि यथा दक्षिणेऽस्याः कर्णे गोनामानि जपित्वेति यानि च प्रकरणाम्नातान्येव तानि च ॥ ३ ॥

सहर्षभा इति वा* ॥ ४ ॥

सहर्षभा इत्येतयर्चा वा उपमन्त्रयेत् ॥ ४ ॥

उभाभ्यां वा* ॥ ५ ॥

सहर्षभा हव्ये काम्ये इत्येतदादिना मन्त्रेण वानुमन्त्रयेत् ॥ ५ ॥

---

* द्राह्यायणेऽप्येवम् ।

अङ्गिश्चेदुपाकुर्युस्तानिनयेदास्तावे आपोहिष्ठीयाभिः* ॥६॥

यद्यङ्गिरुपाकरणं कुर्युरध्वर्यवः ता आपः निनयेदास्तावे आपोहिष्ठीयाभिः ऋग्भिः अङ्गिरुपाकरणस्य कः सम्बन्धः आपोवै रेवत्य इति ॥ ६ ॥

षष्ठेऽहनि सꣳस्थितेऽब्रह्मवादिनः स्युर्न चाधीयीरन्नोत्तरस्याह्न उपाकरणात् † ॥ ७ ॥

ब्राह्मणे च ऊह्नषी वा एतर्हि वाग्यदा षडहः सन्तिष्ठते न ब्रह्मवदेन्नान्यं पृच्छेन्नान्यस्मै प्रब्रूयात् मधु वाशये घृतं वा यथोह्नषावद्धं प्रत्यनक्ति तथा तदिति एते संस्थाधर्म्माः श्रूयन्ते अत आह षष्ठेऽहनि संस्थितेऽब्रह्मवादिनः स्युरिति षष्ठेऽहनि समाप्तेऽब्रह्मवादिनः स्युः न चाधीयीरन् आ उत्तरस्याह्न उपाकरणात् उपाकरणं नाम प्रारम्भः एतद्दर्शयति अन्येद्युःसमाप्तिस्वध्ययनं कुर्वीतेति अथ षष्ठग्रहणं किमर्थमिति उच्यते नियमार्थमेव यदा षडहः सन्तिष्ठत इति तदा वृत्तस्य प्रथमेऽहनि संस्थानं तत्र संस्थाधर्म्माः प्राप्नुवन्ति सोऽयमाचार्य्यः षष्ठग्रहणं करोति कथं आवृत्तेऽप्येतस्मिन् स्युरिति एतदावृत्तेरूपं य इह उपक्रमधर्म्मास्ते आवृत्तेः संस्थाधर्माः ये तत्र संस्थाधर्मास्ते इह उपक्रमधर्मा इति ॥ ७ ॥

---

* शाङ्खायनेऽप्येवम्।

† शाङ्खायनेनैतेन सूत्रद्वयं कृतम्।

सर्पिर्मधुभ्यामृत्विजोभोजयेदहीनेषु* ॥ ८ ॥

सर्पिषा मध्वा च यजमान ऋत्विजो भोजयेदहीनेषु सर्पिरिति घृतस्य पर्यायः ॥ ८ ॥

अन्यतरेण वा* ॥ ९ ॥

सर्पिषा मध्वा वा एकेन भोजयेत् ॥ ९ ॥

सर्पिषैव तृतीयसवने सत्रेषु † ॥ १० ॥

सर्पिषैव तृतीयसवने भोजनं सत्रिणाम् एवशब्दो मधु निवर्त्तयति अथ तृतीयसवनग्रहणं किमर्थमिति चेत् उच्यते षष्ठेऽहनि संस्थिते एतेनोक्तं तत् सत्रेषु यदेव तार्त्तीयसवनीकम्भोजनमुपदिष्टम् तदेव सर्पिषा स्यात् तत् संस्थितेऽहनि भोजनमस्तु सत्रिणां न अनुसवनन्तु सत्रेष्विति तद्यथाकाम्यादेवेति ॥ १० ॥

एतस्यान्यतरस्मिꣳस्त्र्यहेति ग्राह्याणां भक्षयेयुः स्तुत्वा पृष्ठेन † ॥ ११ ॥

एतस्य पृष्ठ्यस्य षडहस्य अन्यतरस्मिंस्त्र्यहे अतिग्राह्याणां भक्षयेयुः अतिग्राह्या ग्रहाः अतिरिक्ताः प्रकृतेभ्यो गृह्यन्ते इत्यतिग्राह्या यस्मिंस्त्र्यहे गृह्येरन् तस्मिंस्तेषां भक्षयेयुः, कस्मिन् काले स्तुत्वा पृष्ठेन ॥११॥

---

* द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

† द्राह्यायणोऽप्येवम् ।

विषुवद्गतयोश्च* ॥ १२ ॥

विषुवद्गतयोश्च अतिग्राह्याणां भक्षयेयुः ॥ १२ ॥

त्रिष्टुप्छन्दसा† ॥ १३ ॥

त्रिष्टुप्छन्दसा मन्त्रेण भक्षयेयुः ॥ १३ ॥

पूर्वं चमसेभ्यः† ॥ १४ ॥

पूर्वं सर्वचमसेभ्यो भक्षयेयुः ॥ १४ ॥

अन्यत्र चैतस्मिन् काले यानाहरेयुः* ॥ १५ ॥

अन्यत्र च अन्ययज्ञेषु च एतस्मिन् काले यान् यज्ञान् भक्षानाहरेयुस्तेषां त्रिष्टुप्छन्दसा पूर्वं चमसेभ्यो भक्षयेयुः ॥ १५ ॥

सह धर्मैः सर्वत्र पृष्ठ्यः स्यात्* ॥ १६ ॥

एते पृष्ठ्यस्य धर्मा गवामयनप्रकरण आम्नाताः एते यत्र यत्र पृष्ठाः प्रयुज्यन्ते तत्र तत्र स्युर्न केवलं गवामयने ॥ १६ ॥

दशमव्रते च* ॥ १७ ॥

---

* शाङ्खायनेऽप्येवम् ।

† शाङ्खायने सूत्रद्वयेनैकसूत्रं कृतम् ।

दशमश्चाहव्रतश्च यत्र यत्र क्रियेतां तत्र तत्र सत्त्वधर्म्मौ ॥ १७ ॥

आभीवर्त्तस्तोत्रीयानाभिप्लविकान् पृष्ठ्ये शंसयेद्ब्राह्मणाच्छंसिना कालेयर्चोऽच्छावाकेन सर्व्वत्र यदा पवमाने स्याताम्* ॥ १८ ॥

ये आभीवर्त्तस्तोत्रीया: आभिप्लविका: तान् सर्वत्र पृष्ठ्ये शंसयेत् ब्राह्मणाच्छंसिना यदाभीवर्त्तपवमाने स्यात् कालेयस्यर्च: अच्छावाकेन शंसयेत् यदा तत् पवमाने स्यात् न केवलं पृष्ठ्ये कालेयस्य अन्यत्रापि यदा कालेयं पवमाने स्यात् तत्राऽप्येतस्य स्तोत्रीयं शंसयेदच्छावाकेन यथा विश्वजितीति ॥ १८ ॥

सर्वत्रैन्द्रक्रतुं ब्राह्मणाच्छंसिनोर्द्ध्वं विषुवत: प्रागतिरात्रात्* ॥ १९ ॥

ऊर्द्ध्वं विषुवत: यान्यहानि तेषु सर्वेष्विन्द्रक्रतुं ब्राह्मणाच्छंसिन: शंसयेत् प्रागतिरात्रात् उदयनीयम् अतिरात्रं वर्जयित्वा सर्वशब्दो निरवशेषवाची ॥ १९ ॥

विश्वजिति वै राजे धर्म्मान् कुर्यात्* ॥ २० ॥

उक्तं यत्र यत्र समुदितानि पृष्ठानि प्रयुज्येरन् तत्र तत्र एषां

---

* द्राह्यायणोऽप्येवम्।

रथव्यतिवर्जमासादयो धर्माः स्युरिति तदिह सर्वपृष्ठविश्वजित् तस्मिन् विश्वजिति रथन्तरादीनां सर्वेषां पृष्ठ्यादीनां वैराजेऽधिकरणे धर्मान् कुर्यात् एतद्धि धर्माणां स्थानं होतापि सर्वेषां तस्मिन्नेव योन्योः संशति ॥ २० ॥

इतरेष्वपि पृष्ठेष्वित्याचार्य्यमतिः* ॥ २१ ॥

इतरेष्वपि पृष्ठेषु धर्मान् कुर्य्यात् एषा आचार्य्याणां मतिः सन्निकृष्टन्यायत्वाद्धर्माणाम् इतरेषु त्रिषु पृष्ठेषु महानाम्नीविरूपरैवतीषु धर्मा स्युः बृहद्रथन्तरवैराजानां वैराजा धर्माः स्युरिति ॥ २१ ॥

सप्तमेऽहन्यग्नेरर्कोऽध्यर्द्धेडस्य सोमसाम मौक्षस्य पूर्वयोः* ॥ २२ ॥

अथ ब्राह्मणे अष्टमनवमयोरह्नोः स्वाग्निरामकंदीर्घतमसोऽर्कौ वाम्नातौ अग्नेरर्कोऽन्तरितः तमग्नेरर्कं सप्तमेऽहनि कल्पयत्याचार्य्यः सप्तमेऽहन्यग्नेरर्कोऽध्यर्द्धेडस्य सोमसाम मौक्षस्य पूर्वयोरिति यस्ते मदो वरेण्य इति गायत्रं तृचे कृत्वा एतस्मिन्नेव सामतृचः स्यात अग्नेरर्कोऽध्यर्द्धेडस्य सोमसाम मौक्षमिति ॥ २२ ॥

मौक्षसोमसामनी गायत्रस्योत्तरयोरग्नेरर्कस्तिसृष्विति वा* ॥ २३ ॥

---

* शाण्ड्यायनोऽप्येवम् ।

अथवा गायत्रमेकर्चं कृत्वा तस्योत्तरयोर्मौक्षसामसामनी कृत्वा तस्मिन्नेव तृचे अग्नेरर्कस्त्रिसृषु कुर्यात् अरण्ये गेयमिदमपवित्रमिति ॥ २३ ॥

साकमश्वेडानां संचारौ व्यतिहरन्त्येके* ॥ २४ ॥

साकमश्वस्य इडानां संचारस्य च अष्टमनवमयोरह्नोर्व्यतिहारमेके आचार्याः कुर्वन्ति आष्टमिकी इडा विभक्तिर्नवमेऽहनि कृत्वा अष्टम एव कल्पयति इडा संचारोऽष्टमस्य विभक्तिर्नवमेऽहनि क्रियत इति व्यतिहारो नाम अन्योऽन्यस्थानोपादानं इडानां संचारं साकमश्वस्य स्थाने कुर्वन्ति साकमश्वमिडानां संचारस्येति ॥ २४ ॥

सरूपक्रौञ्चे एकर्चयोरेके* ॥ २५ ॥

अष्टमेऽहनि सुरूपं गायत्र्यां तृचस्थमाम्नातं क्रौञ्चं चानुष्टुभि उष्णिक्ककुभावेकर्चौ कृतौ तदेके आचार्या लिङ्गं दृष्ट्वा विकल्पयन्ति प्राणा शिशुर्महीनामिति प्राणवत्यो भवन्तीति अस्य च बहुवचनस्य उष्णिक्ककुभोरेकर्चे क्रियानर्थक्यं तदेके उष्णिक्ककुभौ तृचयोः कुर्वन्ति उष्णिक्ककुभोस्तूचैकर्चत्वमन्यथा तेनेति सुरूपक्रौञ्चे एकर्चयोः ॥ २५ ॥

नवमस्य ज्योतिष्टोमः पर्यासः† ॥ २६ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

नवमेऽहनि बहिष्पवमाने एवं ब्राह्मणं पठन्ति सवा उत्तमः षडृचो ऽभवतीत्युक्त्वाह तृच उत्तमो भवतीति न च तस्यानन्तरस्तृचोऽस्ति षडृचः तस्यानन्तरः नचावच्छेदं कृत्वा कल्पना युक्ता कृते वचनात् सोऽयमाचार्य्यः प्राकृतं पर्य्यासं विधित्सुराह नवमस्य ज्योतिष्टोमः पर्य्यास इति अनादेशे प्रकृतिप्रत्ययात् ॥ २६ ॥

साप्तमिक इत्येके* ॥ २७ ॥

एके आचार्याः साप्तमिकः पर्य्यासः स्यादित्येवमाहुः कस्मात् प्रकृतित्वात् उक्तं सप्रभृतयो भवन्तीति ताः श्वसनादयः ॥ २७ ॥

तस्य बृहत्यामरण्ये गेयानि तृचेषु पृष्ठ्यस्य† ॥ २८ ॥

तस्य ग्रहणं यदि ज्योतिष्टोमः पर्य्यासः यदि साप्तमिकः तस्य बृहत्यामेकादशसामानि पठितानि तेषां तृचैकर्चत्वकल्पिभिः कल्पयति यान्यरण्ये गेयानि तानि तृचेषु स्युः पृष्ठ्यस्य अन्यान्येकर्चेषु ॥ २८ ॥

वासिष्ठमध्यास्यायाम्† ॥ २९ ॥

तत् किमिदमारभ्यते अनुप्राप्तमेव वासिष्ठमध्यास्यायाम् आचार्य्येणापि प्रकरणेऽध्यास्यायामेव गीतम् उच्यते नियमार्थमारभ्यते वक्ष्यति ममैव तृचेषु सोरजामीत्यपरमिति न तत् कल्पे वासिष्ठं स्यात् अध्यास्याविषयमेव वासिष्ठमिति ॥ २९ ॥

---

* लाट्यायनेन सूत्रद्वयेनैकसूत्रं कृतम् ।

† लाट्यायनेऽप्येवम् ।

वैयश्वं प्रागभर्गादाभीशवं यशसः* ॥ ३० ॥

पाठक्रमं विकल्पयति अजाम्यर्थेन वैयश्वं प्रागभर्गाद्भवेत् आभीशवं यशसः प्रागिति वर्त्तते ॥ ३० ॥

सप्तैव तृचेषु यैरजामीत्यपरम्* ॥ ३१ ॥

अपरः कल्पः बृहत्यां सप्तैव तृचेषु स्युः यैः क्रियमाणैर्जामि न भवति एतदपरं आचार्य्यमतं प्रथमः कल्पो यथाम्नातानां क्रिया शेषे विकल्पः ॥ ३१ ॥

दीर्घतमसोऽर्कोऽन्त्यः सामराजं वा* ॥ ३२ ॥

अन्ते दीर्घतमसोऽर्कः सामराजञ्च तयोश्च द्वयोरेकस्मिन् सम्भवो नास्ति तस्माद् विकल्पः स्यात् एकार्थत्वात् ॥ ३२ ॥

पृष्ठस्योत्तरयो दीर्घतमसोऽर्को माण्डवञ्चैडं सामराजेऽन्त्ये* ॥ ३३ ॥

यदा तावत् दीर्घतमसोऽर्कोऽन्त्यः स्यात् तदा सामराजस्याभाव एव यदा पुनः सामराजमन्त्यं स्यात् तदा पृष्ठस्योत्तरयोः स्तोत्रीययोः दीर्घतमसोऽर्कः स्यात् माण्डवं चैडं दीर्घतमसोऽर्कः अर्कोऽनुग्रहार्थः माण्डवं स्तोमपूर्णार्थम् ॥ ३३ ॥

इति तृतीयस्य षष्ठी कण्डिका ।

---

* द्राह्यायणेऽप्येवम् ।

अथ सप्तमी कण्डिका ।

दशमस्य बहिष्पवमानं द्वितीयप्रभृतीनां पञ्चानामह्नामनुरूपाः प्रथमाच्च बहिष्पवमानं तन्नवर्चम्* ॥ १ ॥

दशानां पूरणः दशमः दशमस्येति सम्बन्धलक्षणा षष्ठी बहिष्पवमानमिति स्तोत्रोपदेशः द्वितीयप्रभृतीनामिति निदध्युरुपदेशः प्रभृतिशब्दः आद्याभिधायी पञ्चानामिति संख्या अह्नामिति अहर्निर्देशः अनुरूपा इति बहिष्पवमानं तन्नवर्चं नवर्चमिति संज्ञा बहिष्पवमानस्य आद्यद्वितीयान्त्यास्तृचः प्रतिपदनुरूपपर्यासः प्रथमाच्चाह्नः बहिष्पवमानन्तन्नवर्चं नवर्चमिति संज्ञा एतद्दशमस्याह्नो बहिष्पवमानम् अत्रोच्यते यदा तावदेव बहिष्पवमानं दाशमिकं क्लृप्तमेव सर्वं ब्राह्मणे पञ्चानामह्नामनुरूपैः प्रत्यवयन्ति नवर्चा भवन्ति या एवामूः प्रयच्छन् या आवदधातीति च सम्बन्धोऽस्य दर्शितः प्राथमिकस्य नवर्चस्य वारुण्येका भवति आदित्येका भवतीति च लिङ्गचोदना तत् किमिदं सिद्धं सति पुनरारभ्यते दशमस्य बहिष्पवमानमिति उच्यते, आचार्य्यस्येयं प्रवृत्तिः यत्र हि कालो वा विशेषो वा कश्चिद्विवक्षितो भवति तत्र सिद्धस्यापि सतो विधेः पुनरुपादानं करोति यथा एकत्रिके सद्यः सर्वं कुर्युरेकदीक्षमसुपसत्क इति गौतमस्तस्य गायत्रपार्श्वमार्भवो या रुचेति पुरोजित्यमिति शाण्डिल्य इति एतद् विवक्षुः सिद्धमिदं गायत्रपार्श्वं पुनराम्नाति

---

* साम्नायवशोऽप्येवम् ।

एवमिह विधिशेषं विवक्षुः सिद्धोपादानं करोति कः पुनर्विधिः शिष्यते यो वक्तव्यः उच्यते, ब्राह्मणं पञ्चानामह्नामनुरूपैः प्रत्यवयन्तीति तथा वक्तव्यम् एतदर्थं सिद्धमपि सन्तं पुनराददते उच्यते यद्येवं सिद्धेऽपि सति पुनराददते दशमग्रहणं तावन्न कर्त्तव्यं कस्मात् नावमिकं विधानमुक्तं शेषोऽपि विधिरुच्यमानः संख्यानात् दशमादन्यत्र क्व भवेत् तस्माद्दशमग्रहणं शक्यमवक्तुं बहिष्पवमानग्रहणं शक्यमेव वक्तुं बहिष्पवमानस्य ग्रहणस्य किं कारणं तच्छक्यत्वात् तत् विवक्तव्यम् अत्र होतुराज्यादारभ्य सुसमिद्धो न आवहेत्येतस्माद्दाशमिकानि स्तोत्राणि प्रत्यक्षशिष्टानि तस्मात् कारणं न वक्तव्यं द्वितीयप्रभृतीनामित्येतदप्यनारब्धव्यमेव यस्माद्द्वितीयप्रभृतिष्वहःसु बहिष्पवमानद्वितीयास्तृचस्तेषामनुरूपा इति संज्ञा पवस्वेन्दो वृषा सुत इत्येतदादीनां अह्नामनुरूपा इत्येतच्च न वक्तव्यं कस्मात् उक्तं पञ्चानामह्नामनुरूपैः प्रत्यवयन्तीति प्रथमाच्च बहिष्पवमानात्तन्नवर्च्चमित्येतदपि न वक्तव्यं कस्मात् उक्तं नवर्चो भवतीति या एवामूः प्रयच्छन् या अवदधाति ता एता उदस्यतीति प्राथमिकेनैव बहिष्पवमानेन सम्बन्धं दर्शयति तस्मात् सर्वमेव सूत्रं नारब्धव्यम् आरम्भे वा प्रयोजनं वक्तव्यम् अत्रोच्यते, यदुक्तं नारब्धव्यमित्यारब्धव्यमिति ब्रूमः शेषविध्यर्थं यत्तावदुच्यते दशमग्रहणं न कर्तव्यमिति अत्र ब्रूमः कर्त्तव्यमेव छन्दोमा इति पठति अभ्यसज्ञः पञ्चाहश्चत्वारः छन्दोमा विश्वजिदतिरात्र इति तत्रेदं संख्यानतो नवमं तत्रायं संशयः किमत्र दाशमिकं बहिष्पवमानं भवत्यत उत्पत्तिकत्वात् नावमिकं माभूदिति यावता निदानकारेणापि विचारितं कथं

दशमधर्मा मानसमिति कर्त्तव्या इत्येके तस्माद्वर्जायत इति अकर्तव्य इत्यपरमदशमस्य लुप्तस्य दशरात्र इति सोऽयमाचार्य्योऽनियमार्थं दशमग्रहणं करोति कथं अदशमेऽप्येतस्मिन् बहिष्पवमानं स्यादिति, अथ यदुक्तं बहिष्पवमानग्रहणं न कर्त्तव्यमित्यत्र ब्रूमः बहिष्पवमानग्रहणं क्रियते नियमार्थं कथं एतस्मिन्नहनि न कदाचिदन्यं बहिष्पवमानं स्यादिति कुतः पुनराशङ्का यथान्यं बहिष्पवमानं स्यादिति उच्यते, मशकः पठति द्वादशाहविचारेषु अपि वा प्रतिपदावेतान्योन्यस्याः स्थानं व्यतिहरेदिति न कदाचिदपि बहिष्पवमानस्य विकारः स्यात् दशमेऽहनीति, अथ यदुक्तं द्वितीयप्रभृतीनामिति न वक्तव्यमित्यत्र ब्रूमः अन्योन्यस्य स्थानं द्वितीयप्रभृतीनामेव स्युः, अथ यदुक्तं पञ्चानामित्यत्र ब्रूमः अविद्यमानेष्वपि पञ्चानामेव कुर्युः यथा छन्दो भवति दशरात्रे, अथ यदुक्तमक्तामिति न वक्तव्यमित्यत्र ब्रूमः अहर्व्यत्यासोऽप्यानुपूर्व्येण स्यात्, अथ यदुक्तमनुरूपा इति न वक्तव्यमित्यत्र ब्रूमः अनुरूपग्रहणं साप्तमिकप्रतिषेधार्थं कथं समूहिते द्वादशाहे एता अनुरूपा न स्युरिति येषामेवानुरूपा संज्ञा ता एवेति, अथ यदुक्तं प्रथमाश्च बहिष्पवमानं तन्नवर्चमित्येतदपि न वक्तव्यमित्यत्र ब्रूमः अविच्छिन्नबहिष्पवमानं कृत्स्नं छन्दोमा सन्ति दशरात्रे तन्माभूदिति तस्मात् सूत्रमारब्धव्यम् ॥ १ ॥

अनुरूपेषु तृचा प्रतिलोमा ऋचो नवर्च इति गौतमः* ॥२॥

---

* द्राह्यायणोऽप्येवम्।

उक्तं पञ्चानामङ्गानामनुरूपैः प्रत्यंवयन्ति यथाभ्यारुह्य प्रत्यवरोहेत्तथा तदिति तत्प्रत्यवरोहणं किं ऋक्प्रातिलोम्येन अथवा तृचः प्रातिलोम्येनेति उच्यते अनुरूपेषु तृचा प्रतिलोमा ऋचो नवर्चे षाष्टिकादनुरूपादारभ्य प्रातिलोम्येन तावद्यावद्द्वितीयक इति तैः प्रत्यवरोहः न ऋचामपि असृक्षत प्रभ्राजिनः पवमानस्य विश्ववित्पवमानो अजीजनत्तदेते असृग्रमिन्दवः पवस्वेन्दोवृषासुत इत्येष कर्म्मक्रमः तत ऋचः प्रतिलोमाः स्युः उपास्मै गायतानर इत्यत आरभ्य यावदस्य प्रत्नामनुद्युतमिति एवं प्रत्यवरोहणं गौतम आचार्य्यो मन्यते ॥ २ ॥

सर्वत्र तृचा इति धानञ्जय्यः* ॥ ३ ॥

सर्वत्र सर्वस्मिन् बहिष्पवमाने तृचा प्रातिलोम्येन धानञ्जय्य आचार्य्यो मन्यते अनुरूपाणां यथोक्तं नवर्चे तु उपस्मित्ताय तस्युष एष प्रत्नेन जन्मनास्य प्रत्नामनुद्युतमित्येवन्तृचः प्रातिलोम्यम् ॥ ३ ॥

यथाधीतं नवर्चमिति शाण्डिल्यायनः* ॥ ४ ॥

अनुरूपाणां यथोक्तमेव प्रातिलोम्यं नवर्चे तु यथाधीतमेवेति एवं शाण्डिल्यायन आचार्य्यो मन्यते ॥ ४ ॥

सर्वत्रर्चः प्रतिलोमा इति शाण्डिल्यः* ॥ ५ ॥

---

* द्राह्यायणोऽप्येवम् ।

सर्वत्रानुरूपेषु नवर्चेष्वृचः प्रतिलोमाः स्युरित्येवं शाण्डिल्य आचार्यो मन्यते, द्वितीयकादनुरूपादारभ्य यावत् षाष्टिक इति एते ऋक्प्रतिलोमाः स्युः अन्यथा हि यदि षाष्टिकादारभ्येरन् एवमुभयप्रातिलोम्यं स्यात् ऋक् प्रातिलोम्यन्तृचप्रातिलोम्यञ्च नवर्चे तु सर्वमृक्प्रतिलोममेव स्यात् उपास्मै गायतानर इत्यत आरभ्य यावदस्य प्रत्नेति ॥ ५ ॥

अप्रतिभामेतस्मिन्नहन्यनुष्टुम्मात्रा कृत्वाचक्षीरन्* ॥ ६ ॥

अप्रतिभां न प्रतिभाम् अनवस्थानमित्यर्थः यदेतस्मिन्नहनि प्रतिभायाः स्तोत्राङ्गं किञ्चित्तदनुष्टुम्मात्रां कृत्वाचक्षीरन् उक्तं यावत्यनुष्टुप्तावतीं वाचं सम्पाद्य विब्रूयुरिति अथ मात्राग्रहणं किमर्थमिति उच्यते ऋक्न्यायन्नाद्रियेरन् द्वात्रिंशन्मात्रां कृत्वाचक्षीरम् ॥६॥

ज्यायसि छन्दसि लुम्पेयुरक्षराणि कनीयस्यभ्यस्येयुः† ॥७॥

ज्यायस्त्वं नाम वृद्धिः कनीयस्त्वं ह्रासः ज्यायसि छन्दस्याख्यातव्ये अनुष्टुम्मात्रां कृत्वा अधिकान्यक्षराणि लुम्पेयुः कनीयसी अभ्यस्येयुः के येषामुद्गातॄणामिदं कर्म्म उपदिष्टम् ॥ ७ ॥

अग्निष्टोमसाम्ना स्तुत्वा प्राक् पत्नीसंयाजेभ्योयदेभिः प्रस्तुते परार्ध्यं व्रजितश्च स्यात्तद्गत्वा प्रत्याव्रज्य मनसानुतसाह्व

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

हुतेषु पत्नीसंयाजेषु गार्हपत्य उद्गाता जुहुयादुपसृजन्धरुणं मात्रे मातरं धरुणोधयन् रायस्पोषमिषमूर्जमस्मासु दीधरत्स्वाहेति पूर्वम्* ॥ ८ ॥

अग्निष्टोमसाम्ना स्तुत्वा प्राक् पत्नीसंयाजेभ्यः यदेभिरुद्गातृभि प्रस्तुते सोमे प्रसवादारभ्य सर्वैर्दूरङ्गतं स्यात् तद्गत्वा प्रत्याव्रज्य मनसानुत्साहे यद्युत्साहो न स्यात् गमनागमने मनसा गमनागमने कृत्वा हुतेषु पत्नीसंयाजेषु गार्हपत्य उद्गाता जुहुयात् उपसृजन्धरुणं मात्र एतदादिना यथासूचितेन मन्त्रेण उद्गातृग्रहणं न सर्व एव ॥८॥

स्वाहाकारेणोत्तराम्* ॥ ९ ॥

उत्तरामाहुतिं स्वाहाकारेण जुहुयात् ॥ ९ ॥

आहवनीयं गत्वा पश्चात्तिष्ठन्तोऽयं सहोहा इति त्रिरुद्गाता गायेत् निधनमितरावनूपेयानाम् † ॥ १० ॥

गार्हपत्ये उद्गाता हुत्वा अध्वर्युणा सम्प्रेषिते आहवनीये गत्वा तस्य पश्चिमे प्रदेशे तिष्ठन्तो यद्वक्ष्यते तत् कुर्युः किं पुनस्तत् अयं सहोहा इत्येतत्साम त्रिरुद्गाता गायेत् निधनमितरौ प्रस्तोतृप्रतिहर्त्तारौ

---

* द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

† द्राह्यायणेनानेन सूत्रद्वयं कृतम् ।

उद्गातारमुपयन्तं अनुपेयातां गानग्रहणं उक्तमतिक्रन्दमाहवनीयमुपतिष्ठन्त इति ऋचा माभूदिति ॥ १० ॥

यजमानसञ्चरेण गत्वा पूर्वया द्वारा सदः प्रविश्[illegible]॥११॥

यजमानस्य यः सञ्चरस्तेन गत्वा नोद्गातृसञ्चरेण पूर्वया द्वारा सदः प्रविशेयुः ॥ ११ ॥

इति तृतीयस्य सप्तमी कण्डिका ।

अथ अष्टमी कण्डिका ।

यदा अध्वर्युरुपाकुर्य्यादथ मानसेन स्तुवीरन् नायं गौः पृश्निरक्रमीदिति गायत्रेण पृथक् स्तोत्रीयाभ्यो हिंकारं त्रिकेन स्तोमेनास्तोमयोगा यजमानवाचनेन । ॥ १ ॥

यस्मिन् काले अध्वर्युरुपाकरणं करोति अथानन्तरं मानसेन स्तोत्रेन स्तुवीरन् मनसा क्रियत इति मानसम् उक्तं मनसोपावर्त्त्यत्येतदादि आयङ्गौः पृश्निरक्रमीदित्येतास्मिंस्तृचे गायत्रेण साम्ना उक्तं सार्पराज्ञा ऋग्भिः स्तुवन्तीति एता सार्पराज्ञ्यः पृथक् स्तोत्री-

---

* द्राह्यायणे विशेषोऽस्ति ।

† द्राह्यायणेनैतेन सूत्रचतुष्टयं कृतम् ।

याभ्यो हिङ्कारं पृथक् नानेत्यर्थः स्तोत्रीयाभ्यो हिंकारं कुर्युः त्रिकेण स्तोमेन उक्तं पराचीभिः स्तुवन्तीति एवं पराक्रम् अस्तोमयोगा यजमानवाचनेन नात्र स्तोमयोजनं स्यात् न च यजमानवाचनम् ॥ १ ॥

प्रतिहारबेलायां प्रतिहर्त्तापान्यात्* ॥ २ ॥

प्रतिहारदेशकाले प्रतिहर्त्ता अपान्यात् उक्तं तस्माद्धयं प्राणेन करोति प्राणिति चापानिति च तदपानसंज्ञकवायुरन्तः प्रवेशयेत् ॥२॥

उत्तमां प्रस्तुत्यैषेति होतारमीक्षेत* ॥ ३ ॥

उत्तमां स्तोत्रीयां प्रस्तुत्यैषेत्यनेन होतारमीक्षेत् ॥ ३ ॥

सर्वमेतस्मिन् स्तोत्रे मनसा कुर्युः* ॥ ४ ॥

समीक्षणेन विज्ञापयन्तः* ॥ ५ ॥

यत्किञ्चिदस्मिन् स्तोत्रे पुरस्ताज्जपादि तत्सर्वं मानसं कुर्युः समीक्षणेन विज्ञापयन्तः अस्मांस्तोष्यामः प्रशास्तरित्यतः आरभ्य समीक्षणमात्रेण विज्ञापनं कुर्वन्तः सर्वप्रैषेषु प्रज्ञापनं मनसैव स्यादिति ॥४॥५॥

यमध्वर्युर्भक्षं प्रयच्छन् मन्येत तस्य मनसोपहूय कस्त्वा कं भक्षयामीति भक्षयेयुः* ॥ ६ ॥

---

* द्राह्यायणेऽप्येवम् ।

यमध्वर्युर्भक्षं प्रयच्छन्मन्येत यदि ग्रहं यदि चमसं तस्य मनसोपह्वय कस्त्वा कं भक्षयामीति भक्षयेयुः मनसैव उक्तं ग्रहं वा गृहीत्वा चमसं वोन्नीय स्तोत्रमुपावर्त्तयतीति न भक्षं स्तोत्रेण सम्बध्यतेऽतः पुनर्मनसेत्याह ॥ ६ ॥

ब्रह्मोद्यं वदन्तीति गायत्रीं निर्ब्रूयुरिति धानञ्जप्यः* ॥७॥

उक्तं ब्रह्मोद्यं वदन्ति ब्रह्मवर्चस एव प्रतितिष्ठन्तीति किं पुनर्ब्रह्मोद्यमिति उच्यते गायत्रीं निर्ब्रूयुरिति धानञ्जप्य इति गायत्र्यास्त्रिर्वचनं ब्रह्मोद्यं सा च गायत्री परिभाषिता तं स आप्याययेदभिमृश्याप्यायस्वेत्युक्त्वाह सर्वे वैतया गायत्र्येति ॥ ७ ॥

चतुर्होतारमभिप्रेत्यैतदिति गौतमः † ॥ ८ ॥

चतुर्होतारं ब्रह्मोद्यमभिप्रेत्य एतद्ब्राह्मणम् इति गौतम आचार्यो मन्यते ॥ ८ ॥

यथाश्वत्रिरात्र इति शाण्डिल्यः † ॥ ९ ॥

स्वाहाकृतिभिश्च चरते पूर्वेण सद उपविश्य ब्रह्मोद्यं वदेयुरिति एतद्ब्रह्मोद्यमिहापि स्यादिति शाण्डिल्य आह ॥ ९ ॥

एतस्यां वेलायां वरान् वृणीरन् मनसा यानिच्छेयुः † ॥१०॥

---

* द्राह्यायणेनैतेन सूत्रद्वयं कृतम ।

† द्राह्यायणोऽप्येवम् ।

एतस्यां वेलायां वरान् वृणीरन्मनसा यो यस्येप्सितः स तं वर वृणीते ॥ १० ॥

उत्तरत उद्गातौदुम्बरीं गृह्णीयात् पश्चात् प्रतिहर्त्ता दक्षिणतो ब्रह्मा पुरस्तादितरे सर्वे* ॥ ११ ॥

उत्तरे प्रदेशेऽवस्थित उद्गाता औदुम्बरीं गृह्णीयात् अन्वारभेत् पश्चात्प्रतिहर्त्ता पश्चिमे प्रदेशे चावस्थितः प्रतिहर्त्ता अन्वारभेत् दक्षिणतो ब्रह्मा अन्वारभेत् पूर्वप्रदेशेऽवस्थिता इतरे सर्वे अन्वारभेरन् ॥११॥

अथ जपेयुरिह धृतिरिह स्वधृतिरिह रन्ति रिह रमध्वं, मयि धृतिर्मयि स्वधृतिर्मयि रमो मयि रमध्वमिति वा* ॥ १२ ॥

अथशब्द आनन्तर्ये अन्वारभ्याद्यनन्तरं जपेयुः इह धृतिरित्येतदादि यथासूचितं मन्त्रं मयि धृतिरित्येतदादि वा ॥ १२ ॥

उभौ वा* ॥ १३ ॥

उभौ वा मन्त्रौ जपेयुः ॥ १३ ॥

वाग्यता अपिधाय द्वारे आसीरन्नानक्षत्रप्रवचनात्* ॥१४॥

एवं जपित्वानन्तरं वाग्यता वाचं यमयित्वा अपिधाय द्वारे

---

* द्राह्यायणेऽप्येवम् ।

आसीरन् आकुतः कालात् आ नक्षत्रप्रवचनात् यावन्नक्षत्रं प्रोक्तमिति उक्तं वाचं यच्छन्ति दुग्धानीव वै तर्हि छन्दांसि यातयामान्यन्तगतानि तान्येव तद्रसेनाप्याययन्त्यथोऽस्वस्तनामेवाभिमन्तश्चन्नोति ॥ १४ ॥

प्रोक्ते नक्षत्रे पूर्वया द्वारा निष्क्रम्य सुब्रह्मण्याप्रणवैर्वाचं विसृजेरन्निति धानञ्जप्यः* ॥ १५ ॥

उक्तम् आसीरन् आनक्षत्रप्रवचनादिति ततोऽन्येन प्रोक्ते नक्षत्रे पूर्वया द्वारा सदसो निष्क्रम्य सुब्रह्मण्याप्रणवैः सुब्रह्मण्योमित्येभिः वाग्विसर्गं कुर्युरिति धानञ्जप्यः आचार्य्यो मन्यते ॥ १५ ॥

श्रुत्वैवाहूयमानाया इति शाण्डिल्यः* ॥ १६ ॥

वसतीवरीपरिहरणस्यान्ते सुब्रह्मण्येनाहूयमानायाः सुब्रह्मण्यायाः प्रणवान् श्रुत्वा वाचं विसृजेयुरित्येवं शाण्डिल्य आचार्य्यो मन्यते न स्वयं प्रणवं ब्रूयुरिति ॥ १६ ॥

वरवरणवाग्यमने यजमान एव कुर्यादहीनेषु* ॥ १७ ॥

वरवरणञ्च वाग्यमनञ्च ते वरवरणवाग्यमने यजमान एव कुर्यादहीनेषु धारणार्थः सर्वकर्त्तृकमिदं कर्मापग्रियं तद् यजमानः कुर्या इति सर्वर्त्विजो न कुर्युः ननु यदा द्वावेवाहीनौ ताण्डके ययोर्दशममहः तयोश्च अहीनद्वादशाहछन्दोमवांश्च

---

* शाट्यायनेऽप्येवम् ।

दशरात्रः तत् किमिदं बहुवचनम् अहीनेष्विति उच्यते शाखान्तराभिप्रायेण अथवा पौण्डरिके चतुष्टोमे च विचारितं कथं इममधर्मा मानसमित्यकर्त्तव्या इत्येके तत्त्वेन नामधेयेनैकाह आद्रियते चतुष्टोमोऽग्निष्टोम इत्यथापि न दाशमिकं लिङ्गं दृश्यते यथैतद् बहिष्पवमानस्यावृत्तिसाम्नां विप्रच्यावनमनुष्टुभं परोक्षीचिकीर्षेदिति शाण्डिल्यः कर्त्तव्या इत्याचार्या येऽन्ये मानससंयुक्तेभ्यः संस्थापनीयं मानसं चतुष्टोमेऽग्निष्टोम इति सोऽयमाचार्य्य अनेनैव बहुवचनेन एवं विधिमादर्शयतीति॥ १७॥

कृत्वेतरे यथार्थं कृत्वेतरे यथार्थम्* ॥ १८ ॥

वरवरणवाग्यमने यजमान एव कुर्यादहीनेषु इतरे ऋत्विजः वरवरणवाग्यमनाभ्यां यदन्यत्कर्माङ्गं तत् कृत्वा यथार्थं स्युः इति कर्मणः समाप्तिं दर्शयति ॥ १८ ॥

इति तृतीयस्य अष्टमी कण्डिका ।

अथ नवमी कण्डिका ।

मघाग्नतस्य पृष्ठ्य उपाकृते युक्त्वा [illegible] ारेमादो गायेदिति भाण्डितायनः* ॥ १ ॥

---

* आश्वायनेऽप्येवम् ।

इह महाव्रतप्रकरणे त्रयोदशपरिमादः पठिता ब्राह्मणेन पुरस्तादाहवनीयमुपतिष्ठन्त इत्यत आरभ्य यावद्गार्हपत्योपस्थानमिति तदनन्तरं पठति आसन्दीमारुह्योद्गायतीति परिमादगानानन्तरं महाव्रतस्य स्तवनं दर्शयति तेषां परिमादां क्रियाविधिं विवक्षुरिदं सूत्रमारभते महाव्रतस्य पृष्ठे उपाकृते युक्त्वा स्तोमं परिमादो गायेदिति महाव्रत इति कर्मणो नामधेयं तस्येति सम्बन्धलक्षणा षष्ठी पृष्ठमिति स्तोत्रसंज्ञा तस्मिन् पृष्ठे उपाकृते उपाकरणं नामाध्वर्यवं कर्म उपावर्त्तध्वमिति युक्त्वा स्तोमं स्तोमयोजनं कृत्वा यथोक्तेन मन्त्रेण परिमाद इति संज्ञा परिमाद्भिश्चरन्ति त्वक् च वा एतल्लोम च महाव्रतस्य यत्परिमाद इति गायेदिति क्रियोपदेशः भाण्डितायन इत्याचार्य्यमतसंकीर्त्तनं एष सूत्रार्थः महाव्रतस्य क्रतोः होतृपृष्ठे उपाकृते स्तोमयोजनं कृत्वा ततः परिमादगानमिति उच्यते, दशममहः निरवशेषमुक्तं तस्मादनन्तरं महाव्रतमाम्ना तं द्वादशाहस्य द्वादशाहानि महाव्रतञ्चेति तदेवमानन्तर्यादेव प्राप्ते महाव्रतके विधौ परिमादसम्बन्धाच्च यावता महाव्रतादन्यत्र परिमादो न भवन्ति तत् किमिदं महाव्रतग्रहणं महाव्रतस्य पृष्ठे इति उच्यते नियमार्थं महाव्रतग्रहणं महाव्रतस्यैव प्राप्तावेतस्मिन् पृष्ठ उपाकृते नान्यत्र पृष्ठमात्रे यथा वक्ष्यति माहेन्द्रस्य महाव्रतपृष्ठ इति ॥ १ ॥

प्रतिगृह्य तृणे अयुक्तेति गौतमशाण्डिल्यौ धानञ्जय्यस्तु* ॥ २ ॥

---

* शाट्यायनोऽप्येवम् ।

प्रतिगृह्य हणे उपाकरणेके अयुक्ता स्तोमं परिमादो गायेदित्येवं गौतम शाण्डिल्यावाचार्यावाहतुः धानञ्जप्यस्य ॥ २ ॥

प्रागेव स्तोत्रोपाकरणादित्येके* ॥ ३ ॥

एके आचार्य्या मन्यन्ते प्रागेव स्तोत्रोपाकरणात् परिमादो गायेदिति ॥ ३ ॥

दक्षिणेनाग्नीध्रीयं गत्वोत्तरेणाग्निं प्राणप्रभृतिभिरुपतिष्ठेरꣳस्तदुक्तं ब्राह्मणेन* ॥ ४ ॥

आग्नीध्रीयस्य दक्षिणेन गत्वा इष्टकाचितस्याग्नेः उत्तरेण गत्वा प्राणप्रभृतिभि स्वस्य सामान्तैः आहवनीयादिगार्हपत्यान्तानि ब्राह्मणोक्तानि उपतिष्ठेरन् तदुक्तमुपस्थानविधानं ब्राह्मणेन प्राणेन पुरस्तादाहवनीमुपतिष्ठन्त इत्येतदादि ॥ ४ ॥

सर्वाण्युद्गाता सकृत्सकृद्गायेत् †॥ ५ ॥

सर्वाण्येतानि प्राणप्रभृतीनि सकृत्सकृदुद्गाता गायेत् अथ किं सकृत्सकृदिति उच्यते, उक्तं अयं सहोता इति त्रिरुद्गाता गायेदिति तद्दर्शनमपि गम्यते अत आह सकृत्सकृदिति ॥ ५ ॥

निधनमितरावनूपेयाताम् † ॥ ६ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

इतरौ प्रष्टौ उद्गात्रा सह निधनमुपेयातां प्राणेन पुरस्तादाहवनीयमुपतिष्ठन्त इति सर्वेषामुपस्थानमुक्तन्तत्सूत्रकार उद्गातुः प्राणादीनि विधाय इतरयोर्निधनमुपेत्य बहुवचनस्यार्थवत्त्वं दर्शयति ॥६॥

अपि मध्ये निधनेषु* ॥ ७ ॥

मध्ये निधनेष्वपि सामसु इतरावनूपेयातान्निधनानि ॥ ७ ॥

आद्यन्तस्तुब्धेषु पदाय पदाय स्तोभेत्* ॥ ८ ॥

यान्याद्यन्तस्तुब्धानि सामानि तेष्वनुपदं स्तोभं कुर्यात् तत् किमिदं सिद्धे सति पुनरारभ्यते उच्यते, एतेषां सत्रस्यच्छाद्यन्तस्तुब्धं पद्यत अयस्त्वानुपसंहार आविकेषु पादेषु विहितः तत्र च दैवतानि तिष्ठन्ति तेष्वपि पदाय पदाय स्तोभेदित्यत आरभ्यते ॥ ८ ॥

तेनैव प्रत्याव्रज्य पुच्छम्* ॥ ९ ॥

येनैव गतास्तेनैव प्रत्याव्रज्य पुच्छमुपतिष्ठेरन् यथोक्तेनैव साम्ना प्राङ्मुखाः ॥ ९ ॥

व्रतपक्षयोः पूर्वेण दक्षिणं पक्षम्* ॥ १० ॥

उक्तं व्रतपक्षाभ्यां पक्षावुपतिष्ठन्त इति तयोर्व्रतपक्षयोः पूर्वेण दक्षिणं पक्षमुपतिष्ठेरन् अर्थादापक्षमुत्तरेणोत्तरमिति ॥ १० ॥

---

* आम्नायश्चोऽप्येवम् ।

उत्तरमपि कक्षमुपतिष्ठेरन्*॥ ११ ॥

उक्तं प्रजापतेर्हृदयेनापि कक्षे उपतिष्ठन्त इति तत्र द्वावपि कक्षौ कतरस्योपस्थानमिति अत्राह, उत्तरमपि कक्षमुपतिष्ठेरन्निति ॥ ११ ॥

विश्वेदेवा इति वसिष्ठनिह्नवमूहेत्*॥ १२ ॥

ब्राह्मणं वसिष्ठस्य निह्नवेन चात्वालमुपतिष्ठते वैश्वदेव्यामृचि भवतीति सोऽयमाह, विश्वेदेवा इत्येतस्यामृचि वसिष्ठस्य निह्नवमूहेदिति अस्य हि अन्यत्रोत्पत्तिः अत ऊहेदित्युक्तम् ॥ १२ ॥

चात्वालमुपस्थायोत्तरेणाग्नीध्रीयं गत्वा पश्चात्तिष्ठन्तः*॥ १३

चात्वालमुपस्थायाग्नीध्रीयस्योत्तरेण प्रदेशेन गत्वा पश्चिमे प्रदेशे तिष्ठन्तः तस्योपस्थानं कुर्युः उक्तं सत्रस्यर्द्धाग्नीध्रमुपतिष्ठन्त इति॥१३॥

तत एव प्रत्यङ्मुखा इति धानञ्जप्यः*॥ १४ ॥

चात्वालस्योपस्थानं कृत्वा तस्मिन्नेव देशेऽवस्थिताः प्रत्यङ्मुखा आग्नीध्रीयमुपतिष्ठेरन्नित्येवं धानञ्जप्यः आचार्यो मन्यते ॥ १४ ॥

तस्योत्तमं निधनमानमितोरुपेयुः*॥ १५ ॥

---

* द्राह्यायणोऽप्येवम् ।

यदि पश्चात्तिष्ठन्तः यदि चात्वालदेशे तस्य मन्त्रस्यर्द्धैः उत्तमनिधनमातमितोः उपेयुः तावदर्द्धयेयुर्यावन्नान्तः उक्तम् आतमितोर्निधनमुपयन्तीति ॥ १५ ॥

पूर्वेण हविर्द्धाने पुरस्तात् प्रत्यङ्मुखाः* ॥ १६ ॥

ब्राह्मणं स्तोकानुस्तोकाभ्यां हविर्द्धाने उपतिष्ठन्त इति हविर्द्धानयोः पूर्वे प्रदेशेऽवस्थिताः प्रत्यङ्मुखाः स्तोकानुस्तोकयोः साम्नोः पूर्वेण स्तोकेनेत्यर्थः हविर्द्धानयोरुपस्थानं कुर्युः ॥ १६ ॥

पश्चादितरेण* ॥ १७ ॥

पश्चिमे प्रदेशे तयोरेव स्थिताः प्रत्यङ्मुखाः अनुस्तोकेनोपतिष्ठेरन् त एव हविर्द्धाने ॥ १७ ॥

तत एवेक्षमाणा मार्जालीयं यत् द्वन्द्वेषु नाके सुपर्णमिति † ॥१८॥

तत्रैव देशेऽवस्थिताः ईक्षमाणा मार्जालीयं यामेनोपतिष्ठेरन् उक्तं यामेन मार्ज्जालीयमुपतिष्ठन्त इति तत्र सर्वेषां यामानां प्राप्तौ नियमयति यद्द्वन्द्वेष्विति यामानामनेकत्वान्नियमयति यन्नाके सुपर्णमिति यामन्नत् स्यादिति ॥ १८ ॥

---

* द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम्।

† द्राह्यायणेऽप्येवम् ।

यथा हविर्द्धाने तथा सदः* ॥ १९ ॥

यथा हविर्द्धाने उपस्थिते तेनैव प्रकारेण सद उपतिष्ठेरन् उक्तमायुर्नवस्तोभाभ्यां सद उपतिष्ठन्त इति पूर्वे प्रदेशे सदसः प्रत्यङ्मुखा अवस्थिताः तमायुषा साम्नोपतिष्ठेरन् पश्चादितरेण पश्चिमे प्रदेशे प्राङ्मुखा अवस्थिताः नवस्तोभेन साम्नोपतिष्ठेरन् ॥ १९. ॥

अन्तर्वेदेः प्रत्यङ्मुखा गार्हपत्यमिति धानञ्जप्यः* ॥ २० ॥

उक्तं ऋत्व्यस्य साम्ना गार्हपत्यमुपतिष्ठन्त इति अन्तर्वेदेरन्तर्वेदि प्रत्यङ्मुखास्तिष्ठन्त गार्हपत्यमुपतिष्ठेरन् यथोक्तेनैव साम्ना ॥ २० ॥

तस्यैव पश्चात्तिष्ठन्त इति शाण्डिल्यः* ॥ २१ ॥

तस्यैव गार्हपत्यस्य पश्चिमे प्रदेशेऽवस्थिताः प्राङ्मुखा उपतिष्ठेरन्नित्येवं शाण्डिल्य आचार्य्यो मन्यते ॥ २१ ॥

इन्द्रप्रभृति प्रत्यक्षं निधनमुपेयुः* ॥ २२ ॥

ब्राह्मणं यत्परोक्षं निधनमुपेयुर्ह्रीतमुखं प्रतिमुञ्चेरन् यत्प्रत्यक्षमुपयन्ति ह्रीतमुखमेवापजयन्तीति इन्द्रशब्दादारभ्य प्रत्यक्षं निधनं ब्रूयुः लोकवत् प्रत्यक्षपरोक्षे आमन्त्रितं प्रत्यक्षं निर्द्दिष्टं परोक्षं देवदत्तः सः देवदत्तः इन्द्रेति प्रत्यक्षम् स इन्द्र इति परोक्षम् ॥ २२॥

इति तृतीयस्य नवमी कण्डिका ।

---

* द्राह्यायणोऽप्येवम् ।

अथ दशमी कण्डिका ।

अथ राजानꣳ सन्नाहयेत्* ॥ १ ॥

परिमादः गीत्वा अथानन्तरं राजानं सन्नाहयेत् अथशब्द आनन्तर्य्ये राजानमिति क्षत्रियं सन्नाहयेत् अन्यत् उक्तं सन्नद्धाः कवचिनः परियन्तीति ॥ १ ॥

तस्य द्व्यवरार्द्ध्यौ रथावनुयायिनौ स्याताम्* ॥ २ ॥

तस्य राज्ञः द्व्यवरार्द्ध्यौ रथौ अनुयायिनौ स्यातां भवेयातां पश्चाद्यायिनौ सर्वनिकृष्टौ द्वौ यदि बहवो रथा न स्युः ननु तस्य द्व्यवरार्द्ध्या रथा अनुयायिनः स्युरित्येवं सूत्रं कर्त्तव्यमासीत् तत्रैवमपरे वर्णयन्ति द्व्यवरार्द्ध्यौ मनुष्यौ यस्मिन् रथे सोऽयं द्व्यवरार्द्ध्यो रथः द्व्यवरार्द्ध्यश्च द्व्यवरार्द्ध्यश्च द्व्यवरार्द्ध्यौ एकस्मिन्नेव एकस्मिन् रथे बहवो मनुष्या अभिप्रेताः तत आह द्व्यवरार्द्ध्यौ इति ॥ २ ॥

पूर्वेण देवयजनꣳ सन्नह्येरन्नन्ये तस्मात्* ॥ ३ ॥

देवयजनस्य पूर्वे प्रदेशे सन्नह्येरन् राजानं मुक्त्वान्ये अनुयायिनः ॥३॥

दक्षिणेन परियायुः* ॥ ४ ॥

सन्नद्धाः सन्तः दक्षिणेन देवयजनं परिगच्छेयुः ॥ ४ ॥

---

* द्राह्यायणोऽप्येवम्

पूर्वेण पत्नीशालामुद्गाता गत्वा दक्षिणे वेद्यन्ते प्राचो दर्भानास्तीर्य्य तेष्वेनं प्राङ्मुखमुपवेशयेत्* ॥ ५ ॥

उद्गाता पत्नीशालायाः पूर्वेण प्रदेशेन गत्वा महावेदेर्दक्षिणे वेद्यन्ते दर्भान् प्रागग्रान् आस्तीर्य तेषु दर्भेषु एनं राजानं प्राङ्मुखम् उपवेशयेत् ॥ ५ ॥

अथास्मै वर्म्माभिहरेदन्यं वाभिहरन्तमनुमन्त्रयेत उत्तिष्ठ राजन् परिवर्म्मास्यस्व युक्तो रथो वितनो दैव आखणाविशा राजा ब्राह्मण एधि गोप्तेति† ॥ ६ ॥

अथशब्द आनन्तर्य्ये प्रागग्रेषु दर्भेषूपवेश्य राजानम् अनन्तरमस्मै वर्म्म बध्नीयात् उत्तिष्ठ राजन्नित्येतदादिना यथासूचितेन मन्त्रेण अन्यं वाभिहरन्तमेनं मन्त्रं ब्रूयात् ॥ ६ ॥

पश्चिमेन परियाहीत्युक्त्वा तेनैव प्रत्याव्रज्योत्तरएनं वेद्यन्तेऽवस्थाप्य ब्रूयाद् हस्तघ्नं बध्नीष्वाज्यमायुधं कुरुष्व त्रीनिषूनुपकल्पयस्वायस्मायान्यमेव कञ्च चतुर्थमिति* ॥ ७ ॥

राजानं पश्चिमेन देवयजनं परियाहीत्युक्त्वा येनैव गतस्तेनैव पुनराव्रज्य उत्तरे वेद्यन्ते एनं राजानम् अवस्थाप्य ब्रूयात् हस्तघ्नं

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

बध्नीष्व उज्ज्यमायुधं कुरुष्व त्रीनिषूनुपकल्पयस्व अनुगच्छेष्व आयस्मायान् कार्ष्णायसान् यमेव कञ्च चतुर्थमिति यं कञ्चेषुचतुर्थेन नियमः ॥ ७ ॥

प्रतिधत्स्वेति ब्रूयात्* ॥ ८ ॥

इषुं प्रतिधत्स्वेति ब्रूयात् ॥ ८ ॥

तं प्रतिदधानमनुमन्त्रयेत वैणावताय प्रतिधत्स्व शंकुमापप्राऽष्टमो नेति पप्रद्ब्रह्मणा गुप्तैर विधृत्यै धारयात्रेति* ॥ ९ ॥

तं राजानं प्रतिदधानम् इषुं सन्दधानं अनुमन्त्रयेत वैणावताय प्रतिधत्स्व शंकुमित्येतदादिना यथासूत्रितेन मन्त्रेण ॥ ९ ॥

संहृत्यातिष्ठेति ब्रूयात्* ॥ १० ॥

संहृतेषु रथमारोहेति ब्रूयात् राजानम् ॥ १० ॥

दक्षिणेन रथपथं कृत्वोत्तरेणाग्नीध्रीयं पूर्वापरे चर्मणी विबध्नीयुः* ॥ ११ ॥

दक्षिणेन प्रदेशेन रथपथं कृत्वा कस्य दक्षिणेन वक्ष्यति पूर्वापरे चर्मणी विबध्नीयुरिति तयोश्चर्मणोर्दक्षिणेन उत्तरेणाग्नीध्रीयस्य प्रथमप्रयोगे द्वितीया आग्नीध्रीयस्य उत्तरे प्रदेशे पूर्वापरे चर्मणी वि-

---

* शाङ्खायनेऽप्येवम् ।

भ्नीयुः पूर्वञ्च अपरञ्च पूर्वापरे चर्मप्रहारात्तर्ह्यानं ते चर्मणी द्वे विबध्नीयुः ॥ ११ ॥

तं ब्रूयात् प्रदक्षिणं देवयजनं परीयात् पूर्वञ्चर्मागमनेषु विध्येरेकैकेनोत्तरोत्तर्यनतिपातयन्* ॥ १२ ॥

तं राजानं ब्रूयादुद्गाता प्रदक्षिणं देवयजनं परीयात् पूर्वं चर्म यत्तदागमनेषु विध्येः आगमनागमनेषु एकैकेनेषुणा विध्येः उक्तं त्रीनिषूनुपकल्पयस्वेति उत्तरोत्तरा वेधस्य वेधस्योपरिष्टादुत्तरोत्तरो प्रथमस्योपरिष्टाद्द्वितीयः द्वितीयस्योपरिष्टात् तृतीय इति अनतिपातयन् भूमावपातयन्निषुं तथा विध्येर्यथा तस्मिन्नेव चर्मणि संसक्ताः भवन्ति ॥ १२ ॥

अपरस्मा इतरे यथाभिप्रेतमस्येयुः* ॥ १३ ॥

अपरस्मै चर्मणि इतरे रथिनः यथाभिप्रेतं यथेष्टं क्षिपेयुः ॥ १३ ॥

तृतीयेन विध्वोदङ् प्रयायाः* ॥ १४ ॥

एवं ब्रूयाद्राजान तृतीयेनेषुणा विध्वा उदङ्मुखः प्रयायाः गच्छेत् ॥ १४ ॥

तदा चतुर्थमिषुं यान्दिशं मन्येथास्तामस्येर्गा दृष्ट्वावतिष्ठेयाः* ॥ १५ ॥

---

* द्राह्यायणेन सूत्रपञ्चकेनैकसूत्रं कृतम् ।

तदा तस्मिन् काले उदङ् गच्छत् चतुर्थमिषुम् उक्तं यमेव कञ्च चतुर्थमिति यान्दिशं मन्येथाः इच्छा भवेत् तामस्येः एतदुक्तं भवति उदङ्गच्छन् चतुर्थबाणं यान्दिशं प्रति इच्छा भवति तां दिशं क्षिपेत् यस्मिन् देशे गाः पश्येयुः तस्मिन्नेव देशे अवतिष्ठेथा अवस्थानं कुर्वीरन् ॥ १५ ॥

तत्र त्वा विश्रम्भयेयुः* ॥ १६ ॥

तत्र यस्मिन्देशे अवतिष्ठेरन् तस्मिन् देशे त्वां विश्रम्भयेयुः वर्मादिसन्नहनमपनयेयुः ॥ १६ ॥

ब्राह्मणमुक्त्वेमम् † ॥ १७ ॥

हिङ्कारवेलायां कारयेरिति † ॥ १८ ॥

भूमिदुन्दुभिमाव्रजेत् † ॥ १९ ॥

एवं सम्प्रेष्य राजानं अनन्तरं ब्राह्मणं ब्रूयात् यदिदं मया राज्ञे उपदिष्टम् एतत्सर्वं राजानं हिङ्कारवेलायां कारयेरिति एवमुक्त्वा भूमिदुन्दुभिमाव्रजेत् क्व भूमिदुन्दुभिर्भवतीत्यत आह ॥ १७ ॥ १८ ॥ १९ ॥

---

* द्राह्यायणेन सूत्रपञ्चकेणैकसूत्रं कृतम्।

† द्राह्यायणेन सूत्रत्रयेनैकसूत्रं कृतम्।

इति तृतीयस्य दशमी कण्डिका।

अथ एकादशी कण्डिका ।

पश्चादाग्नीध्रीयस्यार्द्धमन्तर्वेदि श्वभ्रस्य खातꣳ स्यादर्द्धं बहिर्वेदि* ॥ १ ॥

उक्तं भूमिदुन्दुभिर्भवतीति स भूमिदुन्दुभिरुच्यते आग्नीध्रीयस्य पश्चिमे प्रदेशे वेदेरन्तः अन्तर्वेदि अर्द्धं श्वभ्रस्य खातं स्यात् श्वभ्रः गर्त्तः अर्द्धं बहिर्वेदि श्वभ्रस्य खातं स्यादिति ॥ १ ॥

आर्षभेणोत्तरलोम्ना चर्मणाभिविहितं स्यात्* ॥ २ ॥

स श्वभ्रः आर्षभेण चर्मणा ऋषभस्य अवयवमार्षभं तेन आर्षभेण उत्तरलोम्ना उपरि लोमानि यस्य चर्मणः तदिदमुत्तरलोम्ना तेन आर्षभेन उत्तरलोम्ना चर्मणा अभिविहितं स्यात् सर्वतः अवनद्धः स्यात् ॥ २ ॥

त्वं वागसि ये नः सत्रे अनिन्दिषु दीक्षायाꣳ आन्त आसितेराद्धिन्तेभ्यो दुन्दुभेराद्धिमस्मभ्यमावदेति, परावदद्विषन्त घोरां वाचं परावदाथास्मभ्यꣳ सुमित्रियां वाचं दुन्दुभे कल्याणीं कीर्त्तिमावदेति, परावदद्विषतो वाद्यन्दुर्हार्दो ये विषूकुहोथास्मभ्यं पुष्टिं राद्धिꣳश्रियमावदुन्दुभ इत्येनमेतैः पृथगाहृत्य वालधानेनान्यं वाघ्नन्तमनुमन्त्र्याप उपस्पृश्य

---

* द्राह्यायणेऽप्येवम् ।

२८.

पश्चात्तिष्ठन्तोऽग्निमुपतिष्ठेरन् नमस्ते गायत्राय यत्ते पुरो यत्ते शिरो नमस्ते रथन्तराय यत्ते दक्षिणतो यत्ते दक्षिणः पक्षो नमस्ते बृहते यत्ते उत्तरतो यत्ते उत्तरः पक्षो नमस्ते यज्ञायज्ञीयाय यत्ते पश्चाद्यत्ते पुच्छं नमस्ते वामदेव्याय यत्ते आत्मा यत्ते मध्यमित्येतैः पृथगङ्गान्यन्वर्थम* ॥ ३ ॥

त्वं वागसीत्येतदादिभिः यथासूत्रितैर्मन्त्रैः इतिकरणप्रज्ञापितान्तैः एतैर्भूमिदुन्दुभिं पृथगाहत्य बालधानेन पृथक् नानेत्यर्थः बाला अस्मिन् धीयन्ते इति बालधानं पुच्छं तेन बालधानेन वादयित्वा अन्यं वा ब्राह्मणं वादयमानं अनुमन्त्र्य अपः स्पृष्ट्वा पश्चात्तिष्ठन्तोऽग्निमुपतिष्ठेरन् पश्चिमे प्रदेशे इष्टकाचितस्याग्नेः तिष्ठन्तः शिरआदीनामङ्गानामात्मनश्चोपस्थानं कुर्युः नमस्ते गायत्राय यत्ते पुरो यत्ते शिर इत्येतदादिभिर्यथासूत्रितैर्मन्त्रैः पृथक नानेत्यर्थः अर्थमनु अन्वर्थं अर्थानुसारेण नमस्ते गायत्रायेति शिरः नमस्ते रथन्तरायेति दक्षिणं पक्षं नमस्ते बृहत इत्युत्तरं नमस्ते यज्ञायज्ञीयायेति पुच्छं नमस्ते वामदेव्यायेति आत्मानम् ॥ ३ ॥

अथ समस्तेन तस्मै ते सुभोः सुभवो भूयास्म नामासि नाम भूयासमाविरस्याविर्म्माकुरु सवितः प्रमासुवया मनुष्याणां भूतौ सम्पश्यसि तेष्वभिभूयासꣳश्रियं मयि धेहीति† ॥ ४ ॥

---

* द्राह्यायणेनैतेन सूत्रचतुष्टयं कृतम्।

† द्राह्यायणोऽप्येवम्।

२१५

व्यस्तानामुपस्थानं कृत्वा अथानन्तरं समस्तानां सामस्त्येनैव मन्त्रेणोपस्थानं कुर्युः तस्मै तदित्येतदादिना मन्त्रेण यथासूत्रितेन॥ ४ ॥

उपस्थाय सदः प्रविशेयुः* ॥ ५ ॥

उपस्थाय व्यस्तसमस्तैस्ततोऽनन्तरं सदः प्रविशेयुः ॥ ५ ॥

इति तृतीयस्य एकादशी कण्डिका ।

अथ द्वादशी कण्डिका ।

अपरया द्वारौदुम्बरीमासन्दीमौञ्जविवानाम् अतिहरेयुः* ॥१॥

उक्तम् उपस्थाय सदः प्रविशेयुरिति साम्प्रतं पृष्ठेन स्तवनमुक्तम् आसन्दीमारुह्योद्गायतीति तस्या आसन्द्याः प्रवेशनमुच्यते अपरया द्वारा सदसः पश्चिमयेत्यर्थः औदुम्बरीमासन्दीमुदुम्बरस्य विकारः औदुम्बरी आसन्दी संज्ञा आस्यते अस्यामित्यासन्दीं मौञ्जविवानामतिहरेयुः मौञ्जं विवानं मुञ्जेभ्यो निर्वृत्तां मौञ्जविवानामतिहरेयुः प्रविशेयुः ॥ १ ॥

---

* द्राह्यायणोऽप्येवम् ।

यज्ञियस्य वृक्षस्यौदुम्बराभावे* ॥ २ ॥

यद्युदुम्बरो न स्यात् यस्य कस्यचित् यज्ञियस्य वृक्षस्यावयवनिष्पन्ना स्यात् आसन्दी यज्ञमर्हति यज्ञियः ॥ २ ॥

मुञ्जाभावे दार्भम्* ॥ ३ ॥

यदि मुञ्जो न स्यात् दर्भमयं विधानं स्यात् अभावोऽनुपपत्तिः ॥३॥

प्रादेशमात्राः पादा अरत्निमात्राणीतराण्यङ्गानि † ॥ ४ ॥

उक्तं प्रादेशमात्री भवतीति तस्या आसन्द्याः प्रादेशमात्राः पादा इतराण्यङ्गानि अरत्निप्रमाणानि स्युः अङ्गुलं प्रादेशोऽरत्निरित्येतदादीनि परिमाणानि सिद्धानि ग्रन्थान्तरे ॥ ४ ॥

दक्षिणेनौदुम्बरीꣳ हृत्वा तस्या उत्तरतोनिदध्युः* ॥ ५ ॥

तामासन्दीमौदुम्बर्य्या दक्षिणेन प्रदेशेन हृत्वा तस्या उत्तरार्द्धे सन्निकर्षे स्थापयेयुः तस्या इति किमर्थम् उच्यते, सदोह्यधिकृतम् अतस्तस्या इति ब्रवीति तस्या औदुम्बर्य्या उत्तरतो न सदसः ॥ ५ ॥

तामुत्तरेणोद्गाता गत्वा पश्चादुपविश्य भूमिस्पृशोऽस्याः पादान् कृत्वा कूर्चावधस्तादुपोह्याभिमृशेद्बृहद्रथन्तरे ते

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

पूर्वौ पादौ श्यैतनौधसे अपरौ वैरूपवैराजे अनूचौ शाक्वररैवते तिरश्चौ इत्येतैः पृथगङ्गान्यन्वर्थम्* ॥ ६ ॥

तस्या आसन्द्या उत्तरेण प्रदेशेनोद्गाता गत्वा पश्चिमे प्रदेश उपविश्य भूमिस्पृशः अस्या आसन्द्याः पादान् कृत्वा कूर्चौ तस्या अधस्तादुपोह्य तानभिमृशेत् बृहद्रथन्तरे ते पूर्वौ पादावित्येतदादिभिर्यथासूत्रितैर्मन्त्रैः पृथगासन्द्यङ्गान्यन्वर्थं पृथङ्नानेत्यर्थः अर्थमनु अन्वर्थं यथालिङ्गमित्यर्थः ॥ ६ ॥

विवयनमालभ्यर्चः प्राञ्च आताना यजूँषि तिर्यञ्चः सामान्यास्तरणँ श्रीरूपबर्हणं वाकोवाक्यमतोरोका वारवन्तीयँ सन्धयो राजनमात्मा प्रतिष्ठा यज्ञायज्ञीयमिति* ॥ ७ ॥

यदि मौञ्जं यदि दार्भं विवानमालभ्य स्पृष्ट्वा ऋचः प्राञ्च इत्येतदादिना यथासूत्रितं मन्त्रं जपेत् ॥ ७ ॥

तां मुखेनोरसा बाहुभ्यामिति स्पृष्ट्वारोहेत् वसवस्त्वा गायत्रेण छन्दसा रोहन्तु तानन्वधिरोहामि राज्याय. रुद्रास्त्वा त्रैष्टुभेन छन्दसा रोहन्तु तानन्वधिरोहामि वैराज्यायादित्यास्त्वा जागतेन छन्दसा रोहन्तु तानन्वधिरोहामि स्वाराज्याय. विश्वे त्वा देवा आनुष्टुभेन छन्दसा रोहन्तु तानन्वधिरोहामि साम्राज्यायेति* ॥ ८ ॥

---

* द्राह्यायणोऽप्येवम् ।

तामासन्दीं मुखेनोरसा बाहुभ्याञ्च स्पृष्ट्वोद्गाता आरोहेत् वसवस्त्वेत्येतदादिभिर्यथासूचितैर्मन्त्रैः तामिति किमर्थम् उच्यते, विवानमालभ्येति प्रकृतम् अतस्तामित्याह ॥ ८ ॥

अथैतैरेव देवता उदस्य राजशब्दञ्चामुना त्वा छन्दसा रोहामीत्यारोहेत्* ॥ ९ ॥

अथशब्दो विकल्पार्थः अथागमपरः विकल्प एतैरेव मन्त्रैर्देवता उत्क्षिप्य पदानामन्विष्य राजशब्दञ्च अमुना त्वा छन्दसा रोहामीत्यारोहेत् प्रकारमुपदिशते गायत्रेण त्वा छन्दसा रोहामि त्रैष्टुभेन त्वा छन्दसा रोहामि जागतेन त्वा छन्दसा रोहामि आनुष्टुभेन त्वा छन्दसा रोहामि इति ॥ ९ ॥

वैराजपञ्चमैरिति गौतमः* ॥ १० ॥

एतैः उदस्य देवता राजाशब्दैः वैराजपञ्चमैरारोहेत् इत्येवं गौतम आचार्य्यो मन्यते वैराजेन त्वा छन्दसा रोहामीत्येव पञ्चमे प्रयोगः ॥ १० ॥

चतुर्भिरिति धानञ्जप्यः† ॥ ११ ॥

---

* शाट्यायनेन सूत्रद्वयेनैकसूत्रं कृतम् ।

† शाट्यायनोऽप्येवम् ।

एतेषामेवोदस्य देवताराजशब्दानां चतुर्भिः पूर्वैः स्तोमैरारोहेदित्येवं धानञ्जय्य आचार्य्यो मन्यते ॥ ११ ॥

त्रिभिरिति शाण्डिल्यः* ॥ १२ ॥

एतेषामेव पूर्वैस्त्रिभिरिति शाण्डिल्य आचार्य्यो मन्यते नका-र्थीनामेव, ननु आनन्तर्यार्थो अथशब्दः कस्मान्न भवति अथानन्तरमेतैरुदस्य देवताराजशब्दैः आरोहेदिति उच्यते, उक्तं छन्दोभिरारोहतीति तदेकेनैवारोहणस्यार्थवत्त्वं कृतं भवति अथ पुनः समुच्चयः कल्प्यते तदा पूर्वेण कल्पेनारुह्य पुनरारोहणार्थमवरोहणं स्यात् तन्माभूदित्यतो विकल्पार्थोऽथशब्दः कल्प्यते ॥ १२ ॥

आरुह्य जपेत् स्योनामासदꣳ सुखदामासदं नमस्तेऽस्तु मा मा हिꣳसीरिति* ॥ १३ ॥

आरुह्य आसन्दीं स्योनामासदमित्येतं मन्त्रं जपेत् ॥ १३ ॥

तस्मिन्नारोहति कूर्चानारोहेयुः प्रष्टी ब्रह्मा गृहपतिः* ॥ १४ ॥

तस्मिन्नुद्गातरि आरोहति आसनार्थान् पूर्वकल्पितान् कूर्चानारोहेयुः के प्रष्टी पार्श्ववर्त्तिनौ प्रष्टी प्रस्तोतृप्रतिहर्त्तारौ ब्रह्मा गृहपतिश्च ॥ १४ ॥

---

* द्राह्यायणेऽप्येवम् ।

आसन्द्या व्याख्यातं द्रव्यं वाणस्य द्रव्यं वाणस्य * ॥ १५ ॥

आसन्द्या व्याख्यातम् उक्तं निर्दिष्टं द्रव्यं वाणस्य उक्तं वाणं वितन्वीति तत् किंमयो वाणो भवति तदुच्यते आसन्द्या व्याख्यातं द्रव्यं वाणस्येति औदुम्बरो वाणः स्यात् उदुम्बराभावे यज्ञियवृक्षस्य ॥१५॥

---

* द्राह्यायणेऽप्येवम् ।

इति तृतीयस्य द्वादशी कण्डिका ।

इति तृतीयः प्रपाठकः समाप्तः ।

चतुर्थः प्रपाठकः।

अथ प्रथमा कण्डिका।

रोहितेनानडुहेनोत्तरलोम्ना चर्मणापिहितः स्यात्* ॥१॥

उक्तम् औदुम्बरो वाण इति वाणो वीणा स वाणः रोहितेनानडुहेनोत्तरलोम्ना चर्मणा पिहितः स्यादिति रोहितेनेति वर्णनिर्देशः अनडुहेनेति अनडुहविकारमानडुहम् उपरिष्टाल्लोमानि कृत्वा तेन उत्तरलोम्ना चर्मणा अपिहितः स्यात् योवाण अपिनद्धः ॥ १ ॥

तस्य दशसु पश्चाच्छिद्रेषु दश दश तन्त्र्यो बद्धाः स्युर्मौञ्ज्यो दार्भ्यो वा* ॥ २ ॥

तस्य वाणस्य दशसु पश्चाच्छिद्रेषु दश दश तन्त्र्यो बद्धाः स्युः एकस्मिन्नेकस्मिंश्छिद्रे दश दश तन्त्र्यो बद्धाः स्युः उक्तं शततन्त्रीको भवतीति अग्रमालोक्य पश्चाच्छब्दः इह तन्त्र्यः नाड्यः स्नायुमय्यः लोके प्रसिद्धः तासामत्र द्रव्यविशेषमारभते मौञ्ज्यो दार्भ्यो वेति अन्यथा हि आसन्द्या व्याख्यातं द्रव्यं वाणस्येति सिद्धमेव ॥ २ ॥

---

* द्राह्यायणेऽप्येवम्।

त्रिष्विति शाण्डिल्यश्चतुस्त्रिꣳशन्मध्यमे त्रयस्त्रिꣳशतावभित इति* ॥ ३ ॥

त्रिषु पश्चाच्छिद्रेषु इति शाण्डिल्य आचार्य्यो मन्यते त्रीणि पश्चाच्छिद्राणि स्युर्न दशेति तेषां त्रयाणां पश्चाच्छिद्राणां मध्यमे चतुस्त्रिंशत्तन्त्वो बद्धाः स्युः, ये मध्यमस्याभितश्छिद्रे तयोः त्रयस्त्रिंशत्त्रयस्त्रिंशत्तन्त्वो बद्धाः स्युः ॥ ३ ॥

पुरस्तादेकैकशस्तांस्त्रैधं विभज्य भूर्भुवः स्वरित्येताभिरुत्तरोत्तर्युदूहेत्* ॥ ४ ॥

तांस्तन्त्वः यदि दशसु पश्चाच्छिद्रेषु यदि त्रिषु बद्धाः त्रैधं विभज्य त्रिधा कृत्वा चतुस्त्रिंशन्मध्यमे त्रयस्त्रिंशतावभित इति भूर्भुवः स्वरित्येताभिर्व्याहृतिभिः पृथक् एकैकया उत्तरोत्तर्युदूहेत् उत्क्षिपेत् मूलत आरभ्य तत उपरिष्टादिति ॥ ४ ॥

तमभिमृशेद्वदो वद वदा वदी वदो वदोरुः पृथुः सुगः सुगत्वः कर्म्मः करणः करः करस्सुरभीपाट्चाभीपाद्वी चाभिमातिहश्चाभिमातिहा च सासहिश्च सहीयाꣳश्च सहस्वाꣳश्च सहमानाश्चोदयाश्च बृहद्वयाश्च सवयाश्च बृहद्वयाश्चैन्द्रीं वाचं बृहतीं विश्वरूपाꣳ शतायुषीं प्रवद देव वाणीति* ॥ [illegible]

---

* द्राह्यायणेऽप्येवम् ।

तं वाणमभिमृशेत् वदो वद इत्येतदादिना यथासूचितेन मन्त्रेण ॥ ५ ॥

शिथिलाꣳस्तन्तुना यच्छेदभिर्नो वाण तन्तुभिः शतं गाङ्गीरिहावद्धारात्स्म सर्वताम्रजीवा ज्योतिरश्नीमहीति* ॥ ६ ॥

शिथिलान् मन्दायत्तान् आयच्छेत् यो यो वाणस्य शिथिलस्तन्तुतन्तम् आयच्छेत् आयत्तं कुर्य्यात् बध्नीयात् एभिर्नो वाण तनभिरित्येतदादिना यथासूचितेन मन्त्रेण ॥ ६ ॥

वाक्सवँ मनोज्योतिर्मा नो भद्र इति जपित्वा वादयेदिन्द्रेण तयेषीकया वेतसशाखया च सपलाशया मूलतः* ॥ ७ ॥

वाक्सर्वं मन इत्येतदादि यजुर्जपित्वा वादयेद्वाणं इन्द्रेण तयेषीकया इषीका काशः इन्द्रः कालः स्वभावनतया न वाणवन्नामितया वेतसशाखया च सपलाशया तया इषीकाशाखयोर्मूलाभ्यां वादयन्नाग्राभ्याम् ॥ ७ ॥

प्राणाय त्वेत्यूर्द्ध्वमुल्लिखेदपानाय त्वेत्यवाचम* ॥ ८ ॥

प्राणाय त्वेत्यनेन मन्त्रेणोर्द्ध्वमुल्लिखनं कुर्य्यात् अपानाय त्वेत्य[illegible]चम् प्रातिलोम्यम् ॥ ८ ॥

---

* द्राह्यायणेऽप्येवम् ।

व्यानाय त्वा व्यानाय त्वेति त्रिः संलिख्योदञ्चं प्रोक्षेत्* ॥ ९ ॥

व्यानाय त्वा व्यानाय त्वेति त्रिः संलिख्य वाणम् उदञ्चम् उदङ्मुखं प्रोक्षेत् ॥ ९ ॥

ब्राह्मणमुक्त्वेममुल्लिखन्नास्वेति* ॥ १० ॥

ब्राह्मणं विधिज्ञम् एवमुक्त्वा इमं वाणमुल्लिखं नास्वेति ॥ १० ॥

आहत दुन्दुभीन् प्रवदन्तु वीणा इति ब्रूयात् † ॥ ११ ॥

आहध्वं दन्दुभीन् प्रवदन्तु वीणा इति एवं ब्रूयात् ॥ ११ ॥

इति चतुर्थस्य प्रथमा कण्डिका ।

अथ द्वितीया कण्डिका ।

अलावुवीणा वक्राकपिशीर्ष्ण्यौ च पूर्वस्यां द्वारि बहिः सदसम् † ॥ १ ॥

---

* द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

† द्राह्यायणेऽप्येवम् ।

उक्तं प्रवदन्तु वीणा इति ब्रूयादिति अलावुवीणां वक्रा कपिशीर्ष्णौ च सदसः पूर्वस्यां द्वारि बहिर्भवेयुः अलावुवीणां वक्रा कपिशीर्ष्णौ चेति वीणाविकारः अलावुवीणा प्रजाता वक्रात्यर्थं कुटिला कपिशीर्ष्णा बध्नीत कः ॥ १ ॥

वक्राकपिशीर्ष्ण्यौ दुन्दुभिंश्च प्रतिमन्त्रयेत या वक्रायां कपिशीर्ष्ण्यां दुन्दुभौ यच्च वाद्यं घोषो यो महतो। महाँस्तेन नोराड्ढि मावदेति* ॥ २ ॥

वक्रा कपिशीर्ष्णौ दुन्दुभींश्च प्रतिमन्त्रयेत या वक्रायां कपिशीर्ष्णामित्येवमादिना यथासूत्रितेन मन्त्रेण ॥ २ ॥

महावीणापि शीलवीणे चापरस्यामन्तरिति गौतमशाण्डिल्यौ बहिरिति धानञ्जय्यः* ॥ ३ ॥

महावीणापथ्यापि शीलवीणा अपरे ब्रुवते पूर्ववीणेति अपरस्या द्वारि सदसोऽन्तः स्यातामिति एवं गौतमशाण्डिल्यावाचार्यौ मन्येते बहिःस्यातामिति धानञ्जय्य आचार्यो मन्यते ॥ ३ ॥

अलाबुवीणापि शीलवीणे च प्रतिमन्त्रयेतालाबुवीणेऽपि शीलौ च यं मन्त्रमधिजग्मतुस्तेनेदमुपगायतां ते साममहयिष्यत इति* ॥ ४ ॥

---

* द्राह्यायणोऽप्येवम्।

आहतदुन्दुभीन् प्रवदन्तु वीणा इत्येतच्च सर्वं कुर्य्यात् अलाबुवीणापिशीलवीणे च प्रतिमन्त्रयेत अलाबुवीणापिशीलौ चेत्येतदादिना यथासूचितेन मन्त्रेण ॥ ४ ॥

पश्चिमेनोपगातॄन् द्वे द्वे एकैका पत्नी काण्डवीणां पिच्छोराञ्च व्यत्यासं वादयेत्* ॥ ५ ॥

उपगातॄणां पश्चिमे प्रदेशे उपविष्टा द्वे द्वे वीणे एकैका पत्नी वादयेत् व्यत्यासं किं वीणे काण्डवीणां पिच्छोराञ्च वक्रायां वेणमय्याञ्च पिच्छोरा वैणवी ॥ ५ ॥

उपमुखं पिच्छोरां वादनेन काण्डमयीम्* ॥ ६ ॥

मुखस्य समीपे उपमुखं काण्डमयीं वादनेन वादयेत् ॥ ६ ॥

ता अपघाटिला इत्याचक्षते* ॥ ७ ॥

ता वीणाः काण्डमय्यः पिच्छोराश्च अपघाटिला इत्याचक्षते उक्तं पत्न्योऽपघाटिलाभिरुपगायन्त्यालिङ्ग्यमेव तत् पत्न्य [illegible]ति ॥७॥

ताः प्रतिमन्त्रयेत या पत्न्यपघाटिला मृदुकं वादयिष्यति सारातिमपवाधतां द्विषन्तं नैजनित्वगिति* ॥

---

* द्राह्यायणोऽप्येवम् ।

गा अपघाटिलाः प्रतिमन्त्रयेत यां पत्न्यपघाटिलाम् इत्येतदादिना मन्त्रेण ॥ ८ ॥

सर्वमनुवीक्षमाणो जपेदाक्रन्दा उलूलयः प्रक्रोशा यवाच्छति सर्वा सत्रस्य सा राद्धिस्तथेदꣳ साम गीयत इति* ॥९॥

दुन्दुभ्यादि सर्वमनुवीक्षमाणो जपेत् आक्रन्दा उलूलयः प्रक्रोशा इत्येतदादिमन्त्रम् ॥ ९ ॥

जपेदेव सुपर्णोऽस्मि गरुत्मान् प्रेमां वाचं वदिष्यामि बह्न करिष्यन्तीं बह्न करिष्यन् स्वर्गमयिष्यन्तीं स्वर्गमयिष्यन् मामिमान् यजमानानिति* ॥ १० ॥

इमं मन्त्रं जपेदेव मन्त्रा हि कर्म्मकारणाः कर्म तद्धि भवति इमं मन्त्रं जपेदेव किञ्चिदनेन कुर्य्यात् ॥ १० ॥

इति चतुर्थस्य द्वितीया कण्डिका ।

अथ तृतीया कण्डिका ।

ब्राह्मणोऽभिगरः पूर्वस्याꣳ सदसो द्वारि प्रत्यङ्मुख उपविशेत्* ॥ १ ॥

---

* ब्राह्मणेऽप्येवम् ।

अभिगृणातीत्यभिगरः अभिष्टौतीत्यर्थः सदसः पूर्वस्यां द्वारि प्रत्यङ्मुख उपविशेत् ॥ १ ॥

वृषलोऽपगरोऽपरस्यां प्राङ्मुखः* ॥ २ ॥

वृषलः शूद्रः अपगृणातीत्यपगरः स अपरस्यां द्वारि प्राङ्मुख उपविशेत् ॥ २ ॥

स ब्रूयान्नारात्सुरिमे सत्रिण इति* ॥ ३ ॥

वृषलोऽपगरो ब्रूयात् न अरात्सुरिमे सत्रिण इति ॥ ३ ॥

अरात्सुरित्यभिगरः* ॥ ४ ॥

अरात्सुरित्येवमभिगरो ब्रूयात् ॥ ४ ॥

दक्षिणेन मार्जालीयमर्योऽन्तर्वेदि दक्षिणामुखस्तिष्ठेत् बहिर्वेदि शूद्र उदङ्मुखः † ॥ ५ ॥

मार्जालीयस्य दक्षिणे प्रदेशे अर्यो वैश्यः वेदेरन्तः अन्तर्वेदि दक्षिणामुखस्तिष्ठेत् बहिर्वेदि शूद्र उदङ्मुखः वेदेर्बहिः बहिर्वेदि तिष्ठेदिति च प्रकृतम् ॥ ५ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

आर्याभावे यः कश्चार्यो वर्णः* ॥ ६ ॥

यदि वैश्यो न लभ्यते यः कश्चार्य्यो वर्णः स्यात् ब्राह्मणो वा क्षत्रियो वा ॥ ६ ॥

तौ श्वेतं परिमण्डलं चर्म व्यायच्छेतां† ॥ ७ ॥

उक्तं शूद्रार्य्यौ चर्म्म व्यायच्छेते इति तौ शूद्रार्य्यौ श्वेतं परिमण्डलं चर्म पृथक् आयच्छेताम् आक्षिपेताम् उक्तं परिमण्डल चर्म भवत्यादित्यस्यैव तद्रूपं क्रियत इत्येवं रूप आदित्य उपलभ्यते श्वेतं वर्णतः परिमण्डलम् आकृतितः ॥ ७ ॥

शूद्रः पूर्वः† ॥ ८ ॥

शूद्रः पूर्वं आक्षिपेत् चर्म्म आत्माभिमुखं पश्चादार्यो वर्ण इति ॥८॥

पूर्वेणाग्नीध्रीयं ब्रह्मचार्यन्तर्वेद्युदङ्मुखस्तिष्ठेद्बहिर्वेदि पुंश्चलो दक्षिणा मुखो* ॥ ९ ॥

आग्नीध्रीयस्य पूर्वे प्रदेशे वेदेरभ्यन्तरगतः ब्रह्मचारी उदङ्मुखस्तिष्ठेत् ब्रह्म मैथुननिवृत्तिः तच्चरतीति ब्रह्मचारी आदिष्टव्रतो गृहीतनियमः बहिर्वेदि पुंश्चलो दक्षिणामुखो पूर्वेणाग्नीध्रीयमित्ये-

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

तत् प्रकृतम् तस्मिन् देशे पुंश्चली दक्षिणामुखी तिष्ठेत् पुमांसं प्रति चलतीति पुंश्चली ॥ ९ ॥

सा ब्रूयाद्दुश्चरिति नवकीर्णिन्निति* ॥ १० ॥

सा पुंश्चली ब्रह्मचारिणं ब्रूयात् दुश्चरितिन्नवकीर्णिन्निति ॥१०॥

धिक्त्वाजाल्मिपुंश्चली ग्रामस्य मार्जनि पुरुषस्य पुरुषस्य शिश्नप्रणेजनीति ब्रह्मचारी* ॥ ११ ॥

ब्रह्मचारी पुंश्चलीमेवं ब्रूयात् धिक्त्वाजाल्मि पुंश्चली ग्रामस्य मार्जनि पुरुषस्य पुरुषस्य शिश्नप्रणेजनीति ॥ ११ ॥

एवमातृतीयं व्यत्यासम्* ॥ १२ ॥

एवमनेन प्रकारेण व्यत्यासधर्म्मेण सर्वेषान्त्रिस्त्रिः क्रिया स्यात् ॥१२॥

सर्वेषां कर्मणि निष्ठिते तदेवाभिगरस्त्रिर्ब्रूयात्* ॥ १३ ॥

सर्वेषामधिकृतानां कर्मणि समाप्ते यदुक्तं पूर्वमभिगरेण तदेव पुनस्त्रिर्ब्रूयात् अरात्सुरिति ॥ १३ ॥

अवव्रज्य शूद्रः प्रद्रवेत्* ॥ १४ ॥

शीघ्रं प्रयायात् दुष्प्रकर्षगतो ॥ १४ ॥

---

* द्राह्यायणेऽप्येवम्।

तं तेनैवावक्षिणुयात्* ॥ १५ ॥

तं शूद्रं प्रद्रावन्तं आर्य्यस्तेनैव चर्मणा हन्यात् ॥ १५ ॥

यथाभिप्रेतमितरो ब्रह्मचार्य्याक्रोशेत्* ॥ १६ ॥

यो योऽस्याभिप्रेतः आक्रोशः तेन तेन ब्रह्मचारी पुंश्चलीमाक्रोशेत् ॥ १६ ॥

पश्चिमेनाग्नीध्रीयं बहिर्वेदि परिश्रिते मिथुनौ सम्भवेतां यौ वर्णौ लभेरन्* ॥ १७ ॥

आग्नीध्रीयस्य पश्चिमे प्रदेशे वेदेर्बहिः परिश्रिते प्रदेशे परिश्रयणमावरणं मिथुनौ स्त्रीपुमांसौ मिथुनौ सम्भवेताम् एकत्र भवेतां मिथुनधर्म्मेण यौ वर्णौ लभेरन् यौ वर्णौ सत्रिणः परिलभेरन् तौ सम्भवेतां तत् किमिदं यौ वर्णौ लभेरन्निति उच्यते तुल्यवर्णासम्भवे वर्णसङ्करो न स्यादिति वर्णेष्वनियमः ॥ १७ ॥

गृहपतेर्दास्यो नवानुदहरणान् पूरयित्वा प्रदक्षिणं मार्जालीयं परियन्त्यैँमहाऽइदं मध्विदं मध्विति वदत्यः पञ्चावरार्ध्याः पञ्चशतपरार्ध्याः पञ्चविꣳशतिः साम्पृताः† ॥ १८ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

283

उक्तं परिकुम्भिन्यो मार्जालीयं यन्तीदम्मध्विदम्मध्विति इति गृहपतेर्दास्यकर्मकराः नवानुदहरणान् कुम्भान् उदकस्य पूरयित्वा प्रदक्षिणं मार्जालीयं कुर्वन्त्यः परीयुः हैमहा २ इदम्मध्विदं एवं वदन्त्यः कियत्यस्तादास्य इत्युच्यते पञ्चावरार्द्धाः सर्वनिकृष्टाः पञ्च परार्द्धाः किं वत्य इत्युच्यते पञ्चशतं परार्द्धाः सर्वोत्तमाः पञ्चविंशतिः साम्प्रताः पञ्चविंशतिर्युक्ताः अनुरूपास्य कर्मणः पञ्चविंशं महाव्रतमिति एवन्ताः सम्प्रयुक्ता भवन्ति एवं लोकेऽपि भवति साम्प्रतमनुरूपं युक्तम् अनेन चेष्टितमिति ॥ १८ ॥

सर्वासु स्रक्तिषु दुन्दुभीनाबध्नीयुः* ॥ १९ ॥

सर्व्वासु स्रक्तिषु दुन्दुभयो वदन्तीति ब्राह्मणं सर्व्वासु स्रक्तिषु सदसः दुन्दुभीनाबध्नीयुः स्रक्तयः कोणाः ॥ १९ ॥

उत्तरोत्तरि वाचो व्याहारयेयुर्यावतीरधिगच्छेयुः* ॥२०॥

उत्तरोत्तरीति तारतरा इति अपरे ब्रुवते ग्राम्याण्यधिकृत्य कथाः कारयेयुरिति परस्परतः उत्तरोत्तरयुक्ताः यावतीर्लभेयुरिति ॥ २० ॥

घोषाꣳश्च* ॥ २१ ॥

उत्तरोत्तरं कारयेयुः भेरीशङ्खपटहमृदङ्गहस्त्यश्वाश्वतरगर्दभादीनां यावतोऽधिगच्छेयुः उक्तं हि सर्वा वाचो वदन्तीति ॥ २१ ॥

---

* द्राह्यायणोऽप्येवम् ।

हिंकारमन्वभिगरः प्रभृतयः कृत्वा यथार्थꣳस्युः* ॥ २२ ॥

स्तोत्रस्य हिंकारमनु अभिगरप्रभृतयः स्वानि कर्माणि कृत्वा यथार्थं स्युः ये योऽर्थो यथार्थः ॥ २२ ॥

आस्तोत्रान्तात्कुम्भिन्यः सर्वं च घोषाः* ॥ २३ ॥

आस्तोत्रसमाप्तेः एताः कुम्भिन्यः सर्वं च घोषाः स्युरिति ॥ २३ ॥

इति चतुर्थस्य तृतीया कण्डिका ।

अथ चतुर्थी कण्डिका ।

पञ्चविꣳशे चतुर्विꣳशस्योत्तमे पर्याये परिचरायामावपेदिति गौतमः* ॥ १ ॥

उक्तं यदा अदश्चतुर्विंशं प्रायणीयं तदेतदुदयनीयं यत्संवत्सरमन्नं सम्भरन्ति सैषा पञ्चविंश्युपजायतइति तच्चतुर्विंशे पञ्चविंशः श्रूयते या सा पञ्चविंशी स्तोत्रीयोपजायते तस्याः स्थानं कल्पयत्याचार्यः पञ्चविंशे स्तोमे कर्त्तव्ये चतुर्विंशस्य स्तोमस्य उत्तमे पर्याये तां पञ्चविंशतिपरिचरायामावपेदिति गौतम आचार्यो मन्यते परिचरा मध्यमे विष्टावे उत्तमे पर्याये आवापस्थानं परिचरा तृचाभागेत्युत्तमे इति ॥ १ ॥

---

* लाट्यायनेऽप्येवम् ।

आवापस्थान इति धानञ्जप्यः* ॥ २ ॥

चतुर्विंशस्य स्तोमस्योत्तमे पर्य्याये यदावापस्थान तस्मिन्नावपेदित्येवं धानञ्जप्य आचार्य्यो मन्यते ॥ २ ॥

प्रथमस्यावापस्थान इति शाण्डिल्यः* ॥ ३ ॥

चतुर्विंशस्तोमे यः प्रथमः पर्य्यायः तस्य यदावापस्थानं तस्मिन्नावपेदित्येवं शाण्डिल्य आचार्य्य आह ॥ ३ ॥

चतुर्विꣳशेन वा स्तुत्वा मध्यमामहिंकृतां तृचस्य प्रस्तुयात्* ॥ ४ ॥

चतुर्विंशेन वा स्तोमेन स्तुत्वा तृचस्य मध्यमां स्तोत्रीयां नाम अहिंकृतां प्रस्तुयात् ॥ ४ ॥

स आस्कन्दो नाम* ॥ ५ ॥

सविधिरास्कन्दो नाम तस्येयं संज्ञा आस्कन्द इति ॥ ५ ॥

तन्न कुर्यादिति शाण्डिल्यायनः* ॥ ६ ॥

तमास्कन्दं न कुर्य्यादित्येवं शाण्डिल्यायन आचार्य्यो मन्यते तमिति निर्द्देशः किमर्थमिति चेत् उच्यते, व्यत्ययम् आस्कन्दस्तु

---

* द्राह्यायणोऽप्येवम् ।

गौतमस्त्वाग्निं धामच्छप्य इतरेष्विति तत्रापि शाण्डिल्यायनस्यानिष्ट एवास्कन्दः अत आह तमिति ॥ ६ ॥

उत्तमायां स्तोत्रीयायामस्तुतायां पादावुपावहरेत् सहनिधनेन भूमौ प्रतिष्ठापयेत् * ॥ ७ ॥

ब्राह्मणं, एकस्यां स्तोत्रीयायां स्तुतायां पादावुपावहरति सह निधनेन प्रतिष्ठामुपयन्त्येष्वेव लोकेषु प्रतितिष्ठन्तीति तदुच्यते, समाप्ते स्तोत्रे आत्मन एकस्यां स्तोत्रीयायामवशिष्टाया उद्गाता आसन्द्याः पादावुपावहरेत् सह निधनेन भूमौ प्रतिष्ठापयेत् निधनं ब्रुवन् भूमौ प्रतिष्ठापयेत् ॥ ७ ॥

आह्रियमाणे भक्षे प्रतिलोमैरारोहणीयैरवरुह्य जपेन्मही द्यौः पृथिवी च न इमं यज्ञम्मिमिक्षतां पिपृतान्नो भरीमभिरिति † ॥ ८ ॥

आह्रियमाणे भक्षे यैर्मन्त्रैः आसन्दीमारूढः तैः प्रतिलोमैः अवरुह्य अवतीर्य्य जपेत् मही द्यौः पृथिवी च न इत्येतदादि मन्त्रं यथासूचितं प्रातिलोम्येन विश्वे त्वा देवा आनुष्टुभेन छन्दसावरोहन्तु तानन्ववरोहामि साम्राज्याय आदित्यास्त्वा जागतेन छन्दसावरोहन्तु तामन्ववरोहामि स्वाराज्याय रुद्रास्त्वा त्रैष्टुभेन छन्दसावरोहन्तु

---

* द्राह्यायणेनानेन सूत्रद्वयं कृतम् ।

† द्राह्यायणोऽप्येवम् ।

तानन्ववरोहामि वैराज्याय वसवस्त्वा गायत्रेण छन्दसावरोहन्तु तानन्ववरोहामि राज्यायेत्येवं प्रातिलोम्यं अथ यद्युक्तदेवताराज्यशब्दैः आरोहेत् तत्राप्येवमेव प्रातिलोम्यम् आरोहणे ॥ ८ ॥

अथ आसीनाः शेषेण स्तुवीरन्* ॥ ९ ॥

अवरुह्य आसन्दीकूर्चेभ्यो यानि स्तोत्राणि अवशिष्टानि तैः स्तुवीरन् ॥ ९ ॥

उदयनीयेऽतिरात्रे संस्थितेऽवभृथमभ्यवेयुरनुपमज्जन्तः† ॥ १० ॥

महाव्रतस्य विधिरुक्तः अनन्तरम् उदयनीयेऽतिरात्रे उदयत्येतस्मिन्नित्युदयनीयः अस्मिन्नुदयनीयेऽतिरात्रे संस्थिते समाप्ते अवभृथं गच्छेयुः उक्तं प्रागुदयनीयादतिरात्रादप्सुषोमान्तमहःसत्रेषु दधिभक्षान्तमहीनेष्विति तत् उदयनीयेऽतिरात्रे समाप्ते अवभृथमभ्यवेयुरनुपमज्जन्तः तस्मिन्नुदकेन मज्जेयुः ॥ १० ॥

पाणिभिस्तु सन्धावेरन् । ॥ ११ ॥

पाणिभिरुदकं गृहीत्वा उद्धर्षणं कुर्युः ॥ ११ ॥

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणीये छेदविषये विशेषोऽस्ति ।

यस्यात्र पत्नी स्यात पृष्ठन्तया व्युद्धावयेत्* ॥ १२ ॥

यस्यामिन्नवभृथे पत्नी स्यात् पृष्ठन्तया व्युद्धावयेत् उद्धर्षयेत् यस्यात्र पत्नी स्यादित्याग्नीकः अपि भवन्त्येतद्दर्शयति यस्यात्रेति किम् उच्यते विद्यमानास्वपि पत्नीषु कस्यचिदस्मिन्नेवावभृथे पत्नी अधिकृता न स्यात् रजतादिस्त्रीधर्मात् सोऽन्यस्याः सकाशात्पृष्ठन्तया व्युद्धावयेत् अत आह यस्यात्रेति ॥ १२ ॥

तानुन्नेतोदानयेत्* ॥ १३ ॥

तान् सत्रिणः तस्मादवभृथात् उन्नेता उदानयेत् उत्थाप्यानयेत् ॥ १३ ॥

उदेत्य गृहपतिः सोमोपनहनं परिदधीत* ॥ १४ ॥

उदेत्य तस्मादवभृथात् गृहपतिः सोमोपनहनं वासः परिदधीत ॥ १४ ॥

वस्त्राणीतरे* ॥ १५ ॥

उदेत्यावभृथात् इतरे सत्रिणः अन्यानि वस्त्राणि अहतानि परिदधीरन् ॥ १५ ॥

अभ्युत्तरणप्रभृति समापयेयुः* ॥ १६ ॥

---

* द्राह्यायणोऽप्येवम्

परिधीय वस्त्राण्यप उपस्पृश्य अभ्युक्षणादारभ्य शेषं कर्म समापयेयुः यावदाहवनीयोपस्थानमिति ॥ १६ ॥

येनेतोगच्छेयुरन्येन प्रत्याव्रजेयुः* ॥ १७ ॥

येन मार्गेन इतो देवयजनादवभृथं गच्छेयुः तेनैव न प्रत्याव्रजेयुः अन्येन प्रत्याव्रजेयुः ॥ १७ ॥

अनूबन्ध्य वपायां हुतायां दक्षिणे वेद्यन्ते केशश्मश्रूणि वापयेरन्* ॥ १८ ॥

अनूबन्ध्य पशोः वपायां हुतायां दक्षिणे प्रदेशे केशांश्च श्मश्रूणि च वापयेरन् ॥ १८ ॥

तस्मिन् सꣳस्थिते प्राञ्च उदञ्चो वा गत्वा पृथगुदवसानीयाभिरिष्टिभिराहिताग्नयो यजेरन्* ॥ १९ ॥

तस्मिन्ननूबन्ध्ये संस्थिते समाप्ते अरण्योरग्नीन् समारोप्य प्राञ्च उदञ्चो वा गत्वा पृथक् नानेत्यर्थः उदवसानीयाभिरिष्टिभिराहिताग्नयो यजेरन् इष्टिग्रहणमतिरिक्तमिति चेत् उच्यत इष्टिः प्रकृतौ यथा गृहीता विकल्पते तदिहेष्टिग्रहणं नियमार्थं क्रियते विकल्पो न स्यादिति आहिताग्नयो यजेरन्निति अनाहिताग्नीनामपि सत्रासनं दर्शयति ॥ १९ ॥

---

* द्राह्यायणोऽप्येवम्।

गृहपति यजमानमनाहिताग्नय उपासीरन्* ॥ २० ॥

ये अनाहिताग्नयः ते गृहपतिं यजमानं उदवसानीययेष्ट्या उपासीरन् यजमानग्रहणं तदिष्टिप्रतिषेधार्थं गृहपतिमेव यजमानं न इष्टिनम् ॥ २० ॥

तद्देवत्यैः स्थालीपाकैर्यजेरन्निति धानञ्जप्यः* ॥ २१ ॥

ये आहिताग्नयस्ते यद्देवत्या उदवसानीयेष्टिस्तद्देवत्यैः स्थालीपाकैर्यजेरन्निति धानञ्जप्य आचार्य्य आह ॥ २१ ॥

संवत्सरꣳ संवसेयुः* ॥ २२ ॥

उदेत्य सत्रात् संवत्सरं एकस्मिन् एकत्र नयेयुः ॥ २२ ॥

द्वादशरात्रमहोरात्रौ वा* ॥ २३ ॥

द्वादशरात्रं वा संवत्सरं संवसेयुः अहोरात्रौ वा अहश्च रात्रिश्च अहोरात्रौ अहोरात्रमित्यर्थः ॥ २३ ॥

यावद्वा सुनुयुर्यावद्वा सुनुयुः* ॥ २४ ॥

यावदेव वा सुनुयुः तावदेव संवासः ऊर्द्ध्वं सत्रात् याथाकाम्य-

---

* द्राह्यायणेऽप्येवम् ।

मित्यपरे ब्रुवते उक्तं सत्रं सार्वक्रतुकमिदं तद्गवामयने संवत्सरं संवसेयुः द्वादशरात्रमहोरात्रौ वा अन्येषु सत्रेषु यावन्तमेव कालं सोमं सुनुयुः तावन्तमेव कालं संवसेयुरिति ॥ २४ ॥

इति चतुर्थस्य चतुर्थी कण्डिका ।

अथ पञ्चमी कण्डिका ।

अथातो गवामयनविकल्पाः* ॥ १ ॥

उक्तङ्गवामयनम् अनन्तरं विकल्पा वक्ष्यन्ते अथ अतः गवामयन विकल्पाः अथ इत्ययं निपात आनन्तर्य्ये उक्तङ्गवामयनम् अथानन्तरं तस्यैव विकल्पाः वक्ष्यन्ते इति वाक्यशेषः ॥ १ ॥

सर्वं ज्योतिष्टोमेनैके* ॥ २ ॥

सर्वङ्गवामयनं प्रायणीयादतिरात्रादारभ्य यावदुदयनीया इति ज्योतिष्टोमेन पक्षे आचार्य्याः कल्पयन्ति सर्वग्रहणं किमर्थमिति चेत् उच्यते, यावन्त्यः संस्था गवामयने स्युमाम्नातम् विकृता ज्योतिष्टोमः स्यादिति संस्थायाः स्थाने तत्संस्था ज्योतिष्टोमः स्यादिति ॥२॥

अतिरात्रचतुर्विंशमहाव्रतातिरात्रा वा यथास्थानꣳ स्युः शेषो ज्योतिष्टोमेन* ॥ ३ ॥

---

* द्राह्यायणोऽप्येवम् ।

प्रायणीयातिरात्रचतुर्विंशमहःप्रायणीयमेव अभिजित्त्रयः स्वरसामानो विषुवान् आवृत्तास्त्रयः स्वरसामानो विश्वजिदित्येव नवाहः महाव्रतमुदयनीयोऽतिरात्र इत्येतान्यहानि यथास्थानं स्युः यस्य यत स्थानं यथास्थानं शेषो ज्योतिष्टोमेन अन्यः सत्रे ह्यहः शेषः सर्वो ज्योतिष्टोमेन भवेत् पुनः ज्योतिष्टोमग्रहणं किमर्थमिति चेत् उच्यते, पूर्वस्मिन्नुक्तं गवामयनसंस्थानं विकृतो ज्योतिष्टोमः सर्वत्र स्यादिति तदिह पुनः ज्योतिष्टोमग्रहणं क्रियते अतिरात्रादिभ्यो यथास्थानकॢप्तेभ्यः योऽन्यः सत्रे शेषः सोऽग्निष्टोमसंस्थेन ज्योतिष्टोमः स्यादिति ॥ ३ ॥

अत्र वा गोआयुषी पृष्ठ्याभिप्लवौ दशरात्रमित्युपाहरेत् स संवत्सरप्रवर्हः* ॥ ४ ॥

अत्र वास्मिन् कल्पे योऽयमुक्तस्तस्मिन् तस्मिन् स्थाने गोआयुषी पृष्ठ्याभिप्लवो दशरात्रमित्येतत् कुर्य्यात् संकल्पः सम्वत्सरः प्रवर्ह इति संवत्सरोत्पादितः संवत्सरः प्रवर्हः वृह उद्यमे ॥ ४ ॥

शाङ्खाहतञ्च* ॥ ५ ॥

शंखाहतमिति चैतद्विधानमुच्यते ॥ ५ ॥

नाना छोभिर्वयं कल्पयामो यथैतद्ब्राह्मणम् † ॥ ६ ॥

---

* द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

† द्राह्यायणोऽप्येवम् ।

नाना पृथगित्यर्थः यदेतद्गवामयनस्य संखा ब्राह्मणं अतिरात्रश्चतुर्विंशं प्रायणीयमहः इत्यत आरभ्यते एतेषामह्नां प्रत्यहमेकैकस्य विकल्पं करिष्यामः ॥ ६ ॥

अतिरात्रमुभयसामानं कुर्वन्नान्धीगवादुत्तरे उद्ल बृहती षोडशिमाꣳश्चेदौद्लस्थाने नानदम्* ॥ ७ ॥

यदि प्रायणीयमतिरात्रमुभयसामानं कुर्य्यात् तदा आन्धीगवस्योत्तरयोः स्तोत्रीययोः उद्लबृहती कुर्य्यात् उद्लञ्च बृहच्च उदलबृहती यदि षोडश्यन्तमतिरात्रं कुर्य्यात् तत उद्लस्य स्थाने नानदं कुर्य्यात् उक्तं योऽनुष्टुभि नानन्दं कुर्य्यात् गौरीवितेन षोडशिना स्तुवतेजसा श्रियमुपैति न श्रिया अवपद्यते इति ॥ ७ ॥

पूर्वो बृहतः सामतृचः † ॥ ८ ॥

बृहतः पूर्वः सामतृचः स्यात् बृहत्तृचस्यम् ॥ ८ ॥

चतुर्विंꣳशमरथन्तरमेके † ॥ ९ ॥

चतुर्विंशमहः प्रायणीयं अरथन्तरमेके आचार्य्या इच्छन्ति नात्र रथन्तरं स्यादिति ॥ ९ ॥

---

* द्राह्यायणेनानेन सूत्रद्वयं कृतम् ।

† द्राह्यायणोऽप्येवम् ।

रथन्तरपृष्ठं वा बृहदनुष्टुप्ककुम्* ॥ १० ॥

रथन्तरं वा पृष्ठं कृत्वा बृहदनुष्टुभि कर्त्तव्यमिति अथ रथन्तरं वा स्यादेतदिति ॥ १० ॥

अग्निष्टोमसꣳस्थश्चेत्त्रिꣳशान्याज्यानि षट्त्रिꣳशानि पृष्ठानि* ॥ ११ ॥

ब्राह्मणम् अथो खल्वाहुरग्निष्टोममेव कार्य्यमिति अथ तथ्यद्यग्निष्टोमसंस्थं स्यात् त्रिंशस्तोमान्याज्यानि स्युः षट्त्रिंशस्तोमानि पृष्ठानि ॥ ११ ॥

षट्त्रिꣳशानि वा होत्रकसामानि* ॥ १२ ॥

मैत्रावरुणादीनां होत्रकाणां सामानि षट्त्रिंशानि स्युः होतुराज्यपृष्ठञ्च चतुर्विंशमेव स्यादिति वा ॥ १२ ॥

पृष्ठानां वाष्टाचत्वारिꣳशानि* ॥ १३ ॥

पृष्ठानां वाष्टाचत्वारिंशानि स्युः होत्रकसामानीति प्रकृतं होतुः पृष्ठञ्चतुर्विंशमेव एवं वा स्यात् ॥ १३ ॥

सर्वाणि वा त्रिꣳशानि स्तोत्राणि* ॥ १४ ॥

---

* द्राह्यायणेऽप्येवम्।

अथवा द्वादशस्तोत्राणि त्रिंशस्तोमेन स्युः ॥ १४ ॥

व्यत्यासं वा त्रिणवत्रयस्त्रिꣳशौ* ॥ १५ ॥

व्यत्यस्य व्यत्यस्य व्यत्यासं त्रिणवत्रयस्त्रिंशौ स्तोमौ व्यत्यासं स्यातां त्रिणवं बहिष्पवमानं त्रयस्त्रिंशं होतुराज्यं एवमुत्तराणि सर्वाणि व्यत्यासेन एवं वा स्यात् ॥ १५ ॥

एतदन्तरुक्थ्यम्* ॥ १६ ॥

एतत्प्रायणीयं अन्तरुक्थ्यं या स्तोत्रीया सम्पत् प्रायणीये उक्ता यावत्यश्चतुर्विंशस्तोक्थ्यस्य स्तोत्रीयास्तावत्यः संवत्सरस्य रात्रय इति तां सम्पदं प्रायणीये अग्निष्टोमसंस्थे स्तोमव्यत्यासेन उक्थ्यसंस्था सम्पद्यते अत आहैतदन्तरुक्थ्यमिति ॥ १६ ॥

अभिप्लवꣳ स्वरसाम्नश्च ज्योतिष्टोमतन्त्र एके कल्पयन्ति* ॥ १७ ॥

अभिप्लवं स्वरसाम्नश्चेति कर्मणि द्वितीया अभिप्लवं षडहं स्वरसाम्नश्च एके आचार्य्या ज्योतिष्टोमस्य तन्त्रे कल्पयन्ति उक्तं भूयिष्ठं तन्त्रलक्षणमुत्तरयोः सवनमुखीये गायत्र्याविति शौचिवृक्षिमाध्यन्दिनीयाचार्य्याणामिति इह तु भूयिष्ठ तन्त्र[illegible]मित्येतदेव

---

* द्राह्यायणोऽप्येवम्।

अस्मिन् ज्योतिष्टोमे एव कृत्स्नं भवति अभिप्लवस्वरसामसु स्तोमं तन्त्रविशेषः स एतान् स्तोमानपश्यत् ज्योतिर्गौरायुरित्यभिप्लवे मन्त्रदृशा भवन्तीति स्वरसामसु अभीवर्त्तसुज्ञानगौरीवितानि श्रुतत्वात् तत्र द्वितीयेऽहनि पञ्चदशं बहिष्पवमानन्तृचन्त्याज्यानि सप्तदशम्माध्यन्दिनं सवनं एकविंशं तृतीयसवनं सोक्थं तत्र बहिष्पवमाने आवापः एते असृग्रमिन्दवः राजा मेधाभिरीयत इति सुत्रकृत्स्निषु दृष्टत्वात् रथन्तरपृष्ठे साम्नः पुनानः सोमधारयेति द्विहिङ्कारन्तिसृषु मेधातिथमेकस्यां रौरवं* विष्टारपङ्क्तौ यौधाजयन्तिसृषु एष व्यत्यासन्यायः उष्णिक्ककुभौ तृचस्य ज्योतिषाण्येवोक्थानि एतदेव तृतीयमह्नः बहिष्पवमानन्त्वविकृतन्त्रिवृत्स्तोमत्वात् चतुर्थं तृतीयेनैव व्याख्यातं पञ्चमं द्वितीयेनैव षष्ठं प्रथमेनैव व्याख्यातं स्वरसामसु ज्योतिष्टोमतन्त्रे उपास्मै गायता नर उपोषु जातमप्तुरन्तन्त्वा वृष्णानि बिभ्रतं पवमानस्य ते वयं पवमानस्य ते कवे अग्न आयाहि वीतय इत्याज्यानि प्रसोमासो विपश्चित इति गायत्रञ्चाश्वञ्चाभिसोमास आयव इति पौरुहन्मनञ्चद्वैगतञ्च गौगवञ्च यौधाजयञ्चौशनमत्यं यज्ञा यथा अपूर्व्येति रथन्तरं स्वासु वामदेव्यं तं वोदस्ममृतीषहमित्यभीवर्त्तः स्वासु कालेयं स्वादिष्टया मदिष्ठयेति गायत्रं चतुस्त्रकवैष्टम्भञ्च या पवस्व देवयुः पवते हर्यतोऽहरिरिति सफसुज्ञाने काशीतम्बा प्रसुन्वानायान्धस इति गौरीवितन्तिसृषु गौरीवितमेकस्यां गौतममेकस्यामौदलमेकस्यामिति वा स्वरन्तिसृषु यत्पयो[illegible]मभिप्रियाणीत्यैडं कावमन्यं स्वरं यदि विकल्पयेद्यज्ञा-

---

* मामदमिति पुस्तकान्तरपाठः।

यज्ञोयमग्निष्टोमसाम एतावेव द्वितीयतृतीयौ स्वरसामानौ स्वरन्तु बृहन्निधनयोर्यत्पूर्वं तत् स्यादुत्तरमावृते तृतीये प्रथमस्वरं ज्योतिषाण्युक्थानि यद्युक्थ्याः अग्निष्टोमसस्त्वेन ॥ १७ ॥

तथा सताꣳ शाट्यायनिनः षडहविभक्तीरनुकल्पयन्ति* ॥ १८ ॥

तथा सतान्तेषां अभिन्नस्वरसाम्नां ज्योतिष्टोमतन्त्रे कल्प्यमानानां संयोगाय शाट्यायनकं ब्राह्मणं अधीयते ये ते दशरात्रप्रकरणे याः षडहस्य देवताविभक्तयः सामान्तविभक्तयश्च पठिताः ता अनुकल्पयन्ति अग्न आयाहि वीतयेऽग्निं दूतं वृणीमहेऽग्निनाग्निः समिध्यतेऽग्निर्वृत्राणि जङ्घनदग्ने स्तोमं मनामहे यमग्ने पृत्सु मर्त्यमित्येता अग्निविभक्तयः एकैकं प्रत्यहं होतुराज्यानि आयाहि सुषमाहित इन्द्रमिद्गाथिनो बृहदिन्द्रेण सन्हिदृक्षस इन्द्रो दधीचो अस्थभिरुत्तिष्ठन्नोजसा सह भिन्धि विश्वा अपद्विष इत्येता इन्द्रविभक्तयः ब्राह्मणाच्छंसिन आज्यानि प्रत्येकमेव अथ सामान्तविभक्तयः उशनं प्रथमे वासिष्ठं द्वितीये उभयतस्तोभं गौतम तृतीये आभीशवश्चतुर्थे आनूपं पञ्चमे इहवद्वामदेव्यं षष्ठे एताः स्वरविभक्तयः नैधमम्प्रथमे श्यैतं द्वितीये महावैष्टम्भं तृतीये आथर्वणं चतुर्थे बार्हद्गिर पञ्चमे गोष्ठः षष्ठे एता निधनविभक्तयः कालेयं प्रथमे माधुच्छन्दसं द्वितीये

---

* शाट्यायनोऽप्येवम् ।

रौरवं तृतीये पृश्निश्चतुर्थे गायोवाजीयं पञ्चमे गोष्ठ एव षष्ठे एता इडाविभक्तयः तासां कल्पना उग्रनन्तावत्प्रथमेऽहनि माध्यन्दिनान्त्यमेव स्थितं द्वितीयेऽहनि इह वद्वाभिष्टं गौतमं माध्यन्दिने तृतीयेऽहनि पुनानः सोमधारयेति कालेयन्तिसृषु विष्टारपङ्क्तौ रौरवं गौतमं प्रथमायां यौधाजयन्तिसृषु चतुर्थेऽहनि पुनानः सोमधारयेति कालेयमेकस्यां आथर्वणन्तिसृषु आभीशवं प्रथमायां यौधाजयन्तिसृषु प्रथमेऽहनि पुनानः सोमधारयेति कालेयन्तिसृषु आनूपमेकस्यां रौरवं विष्टारपङ्क्तौ यौधाजयन्तिसृषु षष्ठेऽहनि उच्चातेजातमन्धस इति गायत्रन्तिसृष्वामहीयवमेकस्याञ्जराबोधीयमेकस्यां इह वद्वामदेव्यमेकस्याम् एताः सामान्तविभक्तयः अथ निधनविभक्तयः नौधसम्प्रथमेऽहनि ब्रह्मसामसिद्धं श्यैतं द्वितीये महावैष्टम्भं तृतीये चतुर्थेऽहन्याथर्वणम् अन्यत्र विकल्पितं विभक्त्यर्थेन बार्हद्गिरं पञ्चमे ब्रह्मसाम षष्ठेऽहनि पुनानः सोमधारयेति कालेयमेकस्यान्दैर्घश्रवसमेकस्यां रौरवमेकस्यां पुनस्त्रिभिर्निवृत्त्यान्य उद्वत्प्राजापत्यमेकस्यां गोष्ठ एकस्यां स्तोमवशेन आम्यर्थेन च सामान्तकल्पना अथ इडाविभक्तयः कालेयं प्रथमे सिद्धमच्छावाकसाम माधुच्छन्दसं द्वितीये कालेयस्य च उतानुग्रहो हृस्त्या पुनानः सोमधारयेति कालेयन्तिसृषु मेधातिथमेकस्यां रौरवं विष्टारपङ्क्तौ यौधाजयन्तिसृषु रौरवं तृतीयेऽच्छावाकसामपृश्निः चतुर्थे गायोवाजीयं पञ्चमे षष्ठेऽहनि गोष्ठ उभयथा क्लृप्तः स्वरसामानः आभिप्लविके रौरवाद्यैस्त्रिभिः सिद्धाः एषां ज्योतिष्टोमतन्त्रे क्लृप्तानामभिप्लवस्वरसाम्नां षडह्निकानां त्रिभक्तीनामन्तकल्पना शाट्यायनिकानाम् ॥ १८ ॥

द्विविधमभिप्लवमेक उपवत्यग्नियवती च व्यत्यासम्प्रतिपदौ राथन्तरबार्हतानि चाज्यानि* ॥ १९ ॥

द्विविधमभिप्लवमेके आचार्य्याः कल्पयन्ति द्विः प्रकारं द्विविधं किं द्विविधं उपवती अग्नीयवती च व्यत्यासम्प्रतिपदौ व्यत्यस्य व्यत्यस्य रथन्तरवार्हतानि चाज्यानि व्यत्यासमेवेति प्रकृतम् राथन्तरेषु तस्योपास्मै गायतानर इति प्रतिपत् अग्न आयाहि वीतय इत्येतदादीनि राथन्तराण्याज्यानि बार्हतेषु पवस्व वाचो अग्रिय इति प्रतिपत् अग्निं दूतं वृणीमह इत्येतदादीनि बार्हतान्याज्यानि एतद्द्वैविध्यम् ॥१९॥

आज्यप्रतिपदावौशनकावे अन्त्ये पार्थयामे वा बार्हतानां स्वयोन्यभीवर्त्तौ रथन्तरपृष्ठेषु श्यैतन्तु बृहत्पृष्ठेषु† ॥ २० ॥

एवं वा द्वैविध्यं स्यात् आज्यप्रतिपदौ आज्यस्य प्रतिपद्याज्यप्रतिपदौ उपवतीति प्रतिपत् अग्न आयाहि वीतय इति होतुराज्यं माध्यन्दिनार्भवयोरौशनकावे अन्त्ये स्वयोन्यभीवर्त्तः एष प्रथमतृतीयपञ्चमेष्वहःसु आभिप्लविकेषु अन्यत्प्रकृतिवत् अग्नियवती प्रतिपत् अग्निं दूतं वृणीमह इति होतुराज्यं माध्यन्दिनार्भवयोः पवमानयोः पार्थयामे अन्त्ये श्यैतन्तु अभीवर्त्तः एष द्वितीयचतुर्थषष्ठेषु द्रव्यविशेषः अन्यद्यथा प्रकृति पूर्वं वा यथोक्तं द्वैविध्यं एतद्वा ॥ २० ॥

---

* द्राह्यायणेनैतेन सूत्रद्वयं कृतम्।

† द्राह्यायणेनानेन सूत्रपञ्चकं कृतम्।

व्यूढं पृष्ठ्यमेके* ॥ २१ ॥

उक्तं मशकेन पृष्ठ्यः षडहः मूढो वा व्यूढो वेति तमिह पृष्ठ्यमेके आचार्य्या व्यूढमिच्छन्ति ॥ २१ ॥

तस्य समूढात्प्रथमस्याह्नो बहिष्पवमानम्* ॥ २२ ॥

तस्य समूढस्य सतः पृष्ठ्यस्य षडहस्यैव समूढात् प्रथमस्याह्नो बहिष्पवमानं स्यात् समूढादित्यपादानलक्षणा पञ्चमी ननु च समूढे व्यूढे चाविच्छिन्ने समूढादेव बहिष्पवमानमेकमेव पठितमधिकृतं तत् किमिदं तस्य समूढात् प्रथमस्याह्नो बहिष्पवमानमिति उच्यते, दाशरात्रिकं पृष्ठं प्रकृतित्वेनाभिप्रेत्यैवमुच्यते अनादेशे प्रकृतिः प्रत्ययो भवति तत्प्रकृतित्वेन बहिष्पवमानम् ॥ २२ ॥

समूढमेके रथन्तरबृहत्पृष्ठम्* ॥ २३ ॥

एके आचार्य्याः समूढमेवेच्छन्ति पृष्ठ्यं अयन्तु विशेषः रथन्तरबृहत्पृष्ठं भवति ॥ २३ ॥

नाना पृष्ठे चोत्तरे चतुरहे रथन्तरबृहती व्यत्यासम्पवमानेषु बृहतीषु रथन्तरमनुष्टुप्सु बृहते द्वितीये† ॥ २४ ॥

बृहद्रथन्तरमिति प्रकृतं अत आह नाना पृष्ठे इति नाना पृष्ठे

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

चास्मिन् पृष्ठ्ये षडहे उत्तरे चतुरहे पवमानेषु रथन्तरबृहती व्यत्यासं कुर्य्यात् व्यत्यस्य व्यत्यस्य व्यत्यासं बृहतीषु रथन्तरं कुर्य्यात् अनुष्टुप्सु बृहत् तृतीयपञ्चमयोः रथन्तरं बृहतीषु कुर्य्यात् चतुर्थषष्ठयोर्बृहदनुष्टुप्सु बृहती अनुष्टुप् रथन्तरं बृहतीषु षष्ठयोः बृहत्सु इति बहुवचनस्य विषयस्ते द्वितीये रथन्तरबृहती द्वितीये स्यातां रथन्तरं बृहत्यां द्वितीयम् अनुष्टुभि बृहद्द्वितीयम् ॥ २४ ॥

बृहदुत्तमꣳ समूढे ॥ २५ ॥

यदि समूढः स्यात् अनुष्टुभि बृहदुत्तमं स्यात् चतुर्थषष्ठयोरह्नोरजाम्यर्थेन अर्थादापन्नं द्वितीयं व्यूढ इति ॥ २५ ॥

आष्कारणिधनात् पूर्वं कौल्मलबर्हिषम्* ॥ २६ ॥

तृतीयेऽहन्याष्कारणिधनादर्वाक् कौल्मलबर्हिषं स्यात् रथन्तरागमे अजाम्यर्थेन ॥ २६ ॥

आन्धीगवाच्छ्यावाश्वम्* ॥ २७ ॥

चतुर्थेऽहन्यान्धीगवात्पूर्वं श्यावाश्वं स्यात् बृहदागमे स्तोमवर्धेन ॥ २७ ॥

उपोत्तमꣳ समूढे* ॥ २८ ॥

---

* द्राह्यायणेऽप्येवम् ।

यदि समूढः स्यात् अनुष्टुभि उपोत्तमं स्यात् नानदस्यावास्वस्य अजाम्यर्थेन ॥ २८ ॥

इति चतुर्थस्य पञ्चमी कण्डिका ।

अथ षष्ठी कण्डिका ।

आनूपोपक्रमा बृहती पञ्चमे* ॥ १ ॥

आनूपारम्भणा बृहती स्यात् पञ्चमेऽहनि रथन्तरागमे अजाम्यर्थेन ॥ १ ॥

मानवात्पूर्वꣳ हारायणम्* ॥ २ ॥

पञ्चमेऽहनि मानवात्पूर्वं हारायणं स्यात् स्तोमवशेन ॥ २ ॥

मधुश्च्युन्निधनादाकूपारम्* ॥ ३ ॥

षष्ठेऽहनि बृहदागमे मधुश्च्युन्निधनात्पूर्वं आकूपारं स्यात् ॥ ३ ॥

उपोत्तमꣳ समूढे* ॥ ४ ॥

यदि समूढः स्यात् तदा उपोत्तमं आकूपारं स्यात् ॥ ४ ॥

---

* द्राह्यायणेऽप्येवम् ।

बृहतः पूर्वं त्रय एकर्चाः* ॥ ५ ॥

बृहतः पूर्वं त्रय एकर्चाः स्युः स्तोमवशेन ॥ ५ ॥

रथन्तरादुत्तरे* ॥ ६ ॥

रथन्तरादुत्तरे त्रय एकर्चाः स्युरिति रथन्तरं प्रकृतं तृतीयपञ्चमयोरह्नोः ॥ ६ ॥

षष्ठे च बृहतो व्यूढे* ॥ ७ ॥

यदि व्यूढः स्यात् ततः षष्ठेऽहनि बृहतः उत्तरे त्रय एकर्चाः स्युः समूढे तु पूर्वं एवं चतुर्थे व्यूढे च समूढे च पूर्व एव ॥ ७ ॥

नित्यौ च श्राम्रकणा तृतीये पृष्ठ्ये* ॥ ८ ॥

तृतीयेऽहनि रथन्तरादुत्तरे त्रय एकर्चाः स्युः नित्यौ च श्राम्रकर्णौ पौरुमद्गाप्स्कारणिधने, अथ किमर्थमिदमारभ्यते नित्यौ च श्राम्रकर्णाविति स्थितयोः उच्यते नियमिते रथन्तरादुत्तरे त्रय एकर्चा इति तद्यदि नारभेत सञ्चारदोषः स्यात् तयोः रथन्तरबृहतोः वृत्यामनुष्टुप्सु कल्पना तृतीयेऽहन्यभिसोमास आयव इति पौरुमद्गं प्रथमायां रथन्तरन्त्रिष्टुप्सु गौतमान्तरिक्षकौल्मलबर्हिषाणि सामतृचः आप्स्कारणिधनमध्यास्यायां चतुर्थेऽहनि पुरोजिती वो अन्धस इति सामद

---

* द्राह्यायणेऽप्येवम् ।

मेकस्यां बृहच्छ्यावाश्वान्धीगवानि तृचेषु उष्णिक्ककुभो तृचस्थे पञ्चमेऽहनि सोमउक्थाः स्तोत्रभिरिति आनूपरथन्तरे तृचयोः क्षारायण मानववाम्राणि सामतृचः सामतृचाग्नेस्त्रिणिधनन्तृचे षष्ठे सोमाः पवन्त इन्दव इति गौरीवितबृहतोस्तृचयोः आकूपारमधुश्चुन्निधन क्रौञ्चानि सामतृचः मध्ये निधनमैडं क्रौञ्चे चतुर्थे पुरोजिती वो अन्धस इति नानदान्धीगवश्यावाश्वानि सामतृचः बृहत्तृचे एते एव व्यूढकल्पः समूढकल्पे सोमाः पवन्त इन्दव इति गौरीवितमधुश्चुन्निधने तृचयोः क्रौञ्चे द्वे आकूपारञ्च सामतृचः बृहति समूढे पृष्ठ्ये ॥ ८ ॥

अभीवर्त्तकालेये बृहतीष्वनुकल्पयेदिति गौतमः* ॥ ९ ॥

अभीवर्त्तकालेये बृहतीष्वनुकल्पयेदित्येवं गौतम आचार्य्य आह नित्यं सांवत्सरिकं कल्पमनुवदति ॥ ९ ॥

नेति धानञ्जय्यः* ॥ १० ॥

धानञ्जय्योऽभीवर्त्तकालेये न कल्पयितव्ये इत्येवमाह ॥ १० ॥

व्यूढं नानुकल्पयेदिति शाण्डिल्यायनः* ॥ ११ ॥

व्यूढं पृष्ठं प्रति अभीवर्त्तकालेये नानुकल्पयेदित्येवं शाण्डिल्यायन आचार्य्य आह समूढमनुकल्पयेदिति ॥ ११ ॥

---

* द्राह्यायणोऽप्येवम्

एकविꣳशत्यहकारिण उपरिष्टादभिजितः पृष्ठ्यमुपयन्ति प्राक् च विश्वजितः स्वरसाम्नश्चोक्थ्यान्* ॥ १२ ॥

योऽयं संवत्सरस्य मध्ये नवाहः पठितः अभिजित्त्रयः स्वरसामानो दिवाकीर्त्यमहस्त्रयः स्वरसामानो विश्वजिदिति एतस्य स्थाने अपरे एकविंशत्यहं कुर्वन्ति उपरिष्टादभिजितः प्राक् स्वरसामभ्यः पृष्ठ्यमुपयन्ति प्राग्विश्वजितः स्वरसाम्नः कृत्वा पृष्ठ्यमुपयन्ति स्वरसामानश्चोक्थ्यान् कुर्वन्ति, विचारितमिदं ब्राह्मणेन तानाउक्थ्याः कार्या३ अग्निष्टोमा३ इत्येवमुक्त्वाह तदाहुर्विवीवधमिव वा एतद्यदग्निष्टोमो विषुवानग्निष्टोमौ विश्वजिदभिजितावथेतर उक्थ्याः स्युरित्यग्निष्टोमा एव सर्वे कार्या इति यदग्निष्टोमत्वमेव शब्देन नियमितमेवं नियमिते सति किमुक्थ्यत्वं स्वरसाम्नां प्रत्याम्नातमेव अथ विकल्प इति उच्यते, न प्रत्याम्नायते न च विकल्प्यते ये एकविंशत्यहकारिणः ते उक्थ्यान् कुर्वन्ति ये नवाहकारिणः ते अग्निष्टोमानेव एवञ्च कृत्वा निदानकारोऽप्याह अथैतान् स्वरसामानानग्निष्टोमान्नवाहकारिणः कुर्युरुक्थ्यानेकविंशत्यहकारिणो योऽन्यथा कुर्यादकुशलः पुरुष इति विद्यादिति ॥ १२ ॥

अभिजिद्विश्वजितौ व्यतिहरन्त्येके* ॥ १३ ॥

अभिजिच्च विश्वजिच्चाभिजिद्विश्वजितौ तावेके आचार्या व्यति

---

* द्राह्यायणोऽप्येवम् ।

हरन्ति व्यतिहारो नामान्योऽन्यस्य स्थानापत्तिः अभिजितः स्थाने [illegible]ाजत् विश्वजितः स्थाने अभिजित् ॥ १३ ॥

अभिजितो रथन्तरपृष्ठस्य राथन्तरी प्रतिपद्धोतुराज्यमाभिवायुमित्यौशनं ज्योतिष्टोमं परꣳ सुज्ञानमुष्णिहि श्यावाश्वात् पूर्वं गौरीवितबृहती* ॥ १४ ॥

एके अभिजितं रथन्तरपृष्ठं कुर्वन्ति तस्याभिजितो रथन्तरपृष्ठस्य राथन्तरी प्रतिपत् स्यात् उपास्मै गायता नर इति होतुराज्यञ्च राथन्तरमेव अग्न आयाहि वीतय इति अभिवायुमित्यौशनं माध्यन्दिनान्यं स्यात् ज्योतिष्टोमं परं ऊशनाद्यत् परं तत् सर्वं द्रव्यं ज्योतिष्टोर पौष्कलस्य तु स्थाने सुज्ञानं श्यावाश्वात्पूर्वं गौरीवितबृहती स्तोमकल्पनाय गौरीवितसत्त्वात् बृहदुभयसामत्वात् ॥ १४ ॥

स्वयोनिनी रथन्तरवृहती स्वरसामस्वेके† ॥ १५ ॥

एके आचार्याः स्वरसामिकान् पृष्ठस्तोत्रीयान् व्यावर्त्य स्वयोनिनी रथन्तरवृहती कुर्वन्ति ॥ १५ ॥

स्वरपृष्ठाश्चेत्स्वारसामिकेषु पृष्ठस्तोत्रीयेषु यथास्वꣳ स्वाराणि चार्भवान्त्यानि द्वैगतगौतमयोः स्थाने रथन्तरमन्तरिक्षस्य गौतमꣳ स्वरस्य बृहत्द्वितीये नित्यश्च सामतृचः¶ ॥ १६ ॥

---

* द्राह्यायणेनैतेन सूत्रपञ्चकं कृतम् ।

† द्राह्यायणोऽप्येवम् ।

¶ द्राह्यायणेनानेन सूत्रषट्कं कृतम् ।

यदि स्वरपृष्ठाः स्वरसामानः [illegible]षिता. [illegible] स्वरसामान एते भवन्तीति सामशब्दस्य प्रकृतस्य पृष्ठगामित्वा[illegible] : स्वरसा[illegible]मिकेष पृष्ठस्तोत्रीयेषु मध्यकाम्नातेषु यथा स्वरसामानि स्युः [illegible]योनिधनं प्रथमे बृहन्निधनं पूर्वं द्वितीये प्रथमं तृतीये स्वाराणि चार्भवान्य[illegible]स्युः नेतराणि द्वैगतगौतमयोः स्थाने रथन्तरं स्यात् द्वैगतस्य प्रथमे गौतमस्य तृतीये अन्तरिक्षस्य स्थाने गौतमं स्यात् तृतीयस्य स्वरस्य स्थानेऽनुष्टुभि बृहत् स्यात् द्वितीये नित्यस्य सामतृचः गौरीवितमेकस्यां क्रौञ्चमेकस्यामाभितमेकस्यां बृहदनुष्टुभि द्वितीये प्रथमतृतीययोरह्नोरनुष्टुभः ॥ १६ ॥

ऊद्लत्वाष्ट्रीसाम्नोरुद्धारः* ॥ १७ ॥

गौरीवितमेव तृचस्थमनुष्टुभि प्रथमतृतीययोरह्नोः ऊद्लत्वाष्ट्रीसाम्नोरुद्धारः कुर्यात् ॥ १७ ॥

विषुवतोदिवैके प्रातरनुवाकमुपाकुर्वन्ति* ॥ १८ ॥

विषुवतः दिवा एव एके आचार्य्याः प्रातरनुवाकस्योपाकरणमिच्छन्ति ॥ १८ ॥

बहिरस्यैके बहिष्पवमानेन स्तुवते* ॥ १९ ॥

यदपि सवनं प्रकृतं तदस्य विषुवत एके आचार्य्या बहिरिच्छन्ति

---

* द्राह्यायणोऽप्येवम् ।

अध्वर्योरुद्गातुश्चाय [illegible] नवमुवान्नाद्विष्पवमानयोरेव विधिर्दृष्टः दिवाकीर्त्य [illegible] पादकः ॥ १९

अग्निरिन्द्रायेपास्मै पवस्व वाच इति स्तोत्रीयꣳ शुङ्गाः* ॥ २० ॥

अग्निरिन्द्राय पवते उपास्मै गायता नरः पवस्व वाचो अग्रिय इत्येतास्विस्त्र ऋचः सम्भार्यतृचं कृत्वा एतत् स्तोत्रीयं शुङ्गा आचार्या मन्यन्ते ॥ २० ॥

वात आवात्विति माषशरावयः* ॥ २१ ॥

माषशरावय आचार्या वात आवात्वित्येवं स्तोत्रीयं कुर्वन्ति स्तोत्रीया बहिष्पवमानाद्यस्तृचः ॥ २१ ॥

यज्ञायज्ञीयभासे व्यतिहरन्त्येके* ॥ २२ ॥

एके आचार्या यज्ञायज्ञीयभासयोः व्यतिहारं कुर्वन्ति अन्योऽन्यस्थानापत्तिर्व्यतिहारः यज्ञायज्ञीयमग्निष्टोमसाम कुर्वन्ति भाससम् ष्टुभि ॥ २२ ॥

बण्महाँ असि सूर्येन्द्रमिद्देवतातये आयन्तइव सूर्यमिति महादिवाकीर्त्यस्तोत्रीया विकल्पते* ॥ २३ ॥

---

* द्राह्यायणेऽप्येवम्।

महादिवाकीर्त्यस्य नित्यस्तोत्रीयस्य स्थाने एतेषां यथोद्दिष्टानां एकः स्याद्विकल्पेन विकल्पो नाम तुल्यार्थप्राप्ताविष्टताध्यवसायः ॥२३॥

इति चतुर्थस्य षष्ठी कण्डिका ।

अथ सप्तमी कण्डिका ।

बृहत्पृष्ठश्चेदग्नियवती प्रतिपत्तृतीयात् साहस्रादाज्यानि नित्यैर्विकल्पन्त उत्सेधस्थाने रथन्तरं तस्य महादिवाकीर्त्यमयꣳ सोम इति पार्थमाभिजितानि पृष्ठानीन्द्रक्रतौ श्यैतङ्गः ककुबुष्णिहावुद्वरति पिपीलिकमध्याꣳ श्यावाश्वविकर्णगौरीवितान्यौगवादलभासान्यनुष्टुभ्यौदलस्थाने वा वाङ्निधनं कौत्समरण्ये गेये हृचयोर्व्रतात्परे* ॥ १ ॥

यदि बृहत्पृष्ठो विषुवां स्यात् ततस्तस्मिन्नग्नियवती प्रतिपद्भवेत् तीयात्साहस्रादाज्यानि च स्युः अग्निं दूतं वृणीमहे इत्येतदादीनि नेत्यानि वा यानि विषुवति तानि स्युः नित्यैर्विकल्पन्त इत्येतदुक्तं त्सेधस्थाने रथन्तरं बृहत्यान्तस्य महादिवाकीर्त्यान्तस्य रथन्तरस्य थाने महादिवाकीर्त्यं भवेत् अयं सोम इति पार्थं स्यात् निग्र ग्यामायाः स्थाने आभिजितानि पृष्ठानि, आभिजितानीति कि

---

* लाट्यायनेनैतेन द्वादशसूत्राणि कृतानि ।

आरभ्यते यदा बृहत्पृष्ठस्येदिति बृहत्पृष्ठत्वात् सिद्धम् इन्द्रक्रतौ श्यैतमिति च वक्ष्यति अनेनैव श्यैतेन सिद्धिर्भवति उच्यते, अभिजितादि पृष्ठानीत्यनेन सिद्धस्यैव स्तोत्रीयाविशेषणार्थम् अभिजितश्च ग्रहणम् इन्द्रक्रतौ श्यैतम् इन्द्रक्रतुं न आभरेत्येतस्मिन् प्रगाथे [illegible]स्मात् गोः ककुबुष्णिहौ गोरित्यपादानलक्षणा पञ्चमी विषुवतो ककुबुष्णिहौ अपोह्य गोः आहरेत् तदेतदवाच्यमविशेषादुष्णिहं कथन्तर्हि वाच्यमेव गोः ककुबुष्णिहाविति उच्यते, बृहत्पृष्ठस्येदधिकृत्य कथं ज्योतिष्टोमेन बृहत्पृष्ठे गोरेव ककुबुष्णिहे। स्याताम उद्धरन्ति पिपीलिकमध्यां पर्युख्यित्येतामनुष्टुभं पिपीलिकमध्यामुद्धरन्ति साम पुरोजित्यां कल्पयत्यतस्तामुद्धरन्ति स्यातामश्वविकर्णे गौरीवितान्यौगवौदलभासान्यनुष्टुभि एतानि यथाप्सूचितान्यनुष्टुभि भवन्त्युदलस्थाने वाङ्निधनं क्रौञ्चं अवेदा न वा अरण्ये गेये विकर्णभासे त्र्यचयोः स्याताम् अन्यानि सर्वाण्येकर्चानि स्युः अनुष्टुभि वतान्यरे य सामनी ते अतादाहृत्य सर्ववतीषु कार्वं कुर्य्यात् यज्ञायज्ञीयमग्निष्टोमसाम्नः ॥ १ ॥

विश्वजिति यज्ञायज्ञीयबृहती व्यतिहरन्त्येके * ॥ २ ॥

एके आचार्याः विश्वजिति यज्ञायज्ञीयबृहतो व्यतिहारं कुर्वन्ति यज्ञायज्ञीयमग्निष्टोमसाम तस्य स्थाने बृहदनुष्टुभि ॥ २ ॥

बृहत्पृष्ठस्येत्तृतीयात् साहस्रात् प्रातःसवनं कालेयस्थाने

---

* शाट्यायनोऽप्येवम् ।

समन्तमाभिजितानि पृष्ठानीन्द्रक्रतौ श्यैतङ्गोः ककुबुष्णिहावुद्धरति पिपीलिकमध्या अनुष्टुप्प्रभृति व्रतात्* ॥ ३ ॥

यदि विश्वजित् छन्दःपृष्ठः स्यात् ततस्तृतीयात् गाहस्मात् प्रातःसवनं भवति पवस्व वाचो अग्रिय इत्येवमादि कालेयस्य स्थाने भ्रम्नत भवति बृहत्यां आभिजितानि पृष्ठानि अत्र न भवन्ति बृहद्रादीनि इन्द्रक्रतौ श्यैतं भवति गोः ककुबुष्णिहौ भवतः पर्य्युष्णिक्ष्वेनदाद्या उद्धरति अनुष्टुप्प्रभृति व्रतात् अनुष्टुभमारभ्य याऽन्यो द्रव्यविशेषः सांवत्सरिकाद्भवति ॥ ३ ॥

उत्तरे पक्षस्ययनविकल्पः† ॥ ४ ॥

इदं नानाहोभिर्वयं कल्पयामो यथैतद्ब्राह्मणमिति सा कल्पना समाप्ता साम्प्रतमुत्तरे पक्षस्ययनविकल्पा उच्यन्ते इति वाक्यशेषः अयनविकल्पा गतिविकल्पा इत्यर्थः अयनानि

अभिप्लवपृष्ठ्यान् प्रतिलोमानुपयन्त्यक्षरावर्त्तकारिणः ॥ ५ ॥

अभिप्लवाश्च पृष्ठ्याश्च अभिप्लवपृष्ठ्याः तानभिप्लवपृष्ठ्यान् प्रतिलोमान् कुर्वन्ति ये अक्षरावर्त्तकारिण आचार्य्याः अभिप्लवपृष्ठ्यानह प्रतिलोमान् कुर्वन्ति ॥ ५ ॥

---

* शाट्यायनेनानेन सूत्रत्रयं कृतम्

† शाट्यायनोऽप्येवम्।

पृष्ठ्याभिप्लवाननुलोमान् मासावर्त्तकारिणः* ॥ ६ ॥

ये मासावर्त्तकारिण आचार्य्याः ते पृष्ठ्योपक्रमान् अभिप्लवावसानान् कुर्वन्ति अहः आनुलोम्यम् ॥ ६ ॥

गो आयुषी च विपरिहरन्ति* ॥ ७ ॥

ये मासावर्त्तकारिणः ते गो आयुषोर्व्यतिहारं कुर्वन्ति ॥ ७ ॥

उत्तमं सम्भार्य्यं कुर्वन् सप्तमान्मासान् पृष्ठ्याभिप्लवानुद्धरेत् पञ्चायनमासान् कृत्वा दशरात्रमिश्रार्दभिप्लवमुद्धरेत् † ॥ ८ ॥

यद्युत्तमं मासं सम्भार्य्यं कुर्य्यात् ततः सप्तमान्मासान् पृष्ठ्यं चौन्हा भिप्लवावुद्धरेत् स्वरसामानो विश्वजितश्च कृत्वा अन्यान् अयनमासान् कुर्य्यात् पृष्ठ्यश्चत्वारश्चाभिप्लवाः षड़हाः एषोऽयनमासः पञ्चायनमासान् कृत्वा दशरात्रमिश्रान् मासान् अभिप्लवमुद्धरेत् त्रयः स्वरसामानो विश्वजित् अभिप्लवौ षड़हौ आयुश्च गौश्च द्वे अहनी द्वादशाहस्य दशाहानि महाव्रतश्चातिरात्रश्चेत्येतत्परिसंख्यं सम्भार्य्यं मासस्योत्तमस्य ॥ ८ ॥

तथा सति पूर्वे पक्षसि विकल्प्यः* ॥ ९ ॥

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

तथा सति विकल्पे उत्तमे सम्भार्य्ये क्रियमाणे पूर्वे पक्षसि विकल्पो भवति पक्षःसामान्यात् ॥९॥

षष्ठादभिप्लवपृष्ठानुद्धृत्य चतुर्विंशादुत्तरान् कुर्यात्* ॥१०॥

षष्ठात्त्रीनभिप्लवान् पृष्ठ्यञ्चोद्धृत्य चतुर्विंशात् प्रायणीयादह्न उत्तरान् कुर्य्यात् अतिरात्रं कृत्वा तत्र चतुर्विंशं प्रायणीयमहः तत्र त्रीनभिप्लवान् पृष्ठ्यञ्च कृत्वाभिजितं त्रयः स्वरसामानः॥ १० ॥

समौ पक्षौ चिकीर्षन् पञ्चायनमासान् कृत्वा दशरात्रमिश्रं मासमुद्धरेत् पञ्चदशौ पक्षौ व्रतस्यापरिमादं बृहत्पृष्ठं विश्वजितम्† ॥ ११ ॥

समौ पक्षौ कर्त्तुमिच्छन् उत्तरस्य पक्षस्य प्रथमे मासि त्रयः स्वरसामानो विश्वजित्पृष्ठ्यस्त्रीनभिप्लवान् कृत्वा ततः परं पञ्चायनमासान् कुर्य्यात् पञ्च कृत्वा दशरात्रमिश्रं मासमुद्धरेत् पञ्चदशौ पक्षौ व्रतस्य कुर्य्यात् परिमादश्च तस्मिन्न कुर्य्यात् एवं पञ्चविंशाद्व्रतात् पञ्चदशस्तोत्रीयाः ह्रसन्ते ततस्ते पञ्चदशचतुर्विंशाः सम्पद्यन्ते एवं प्रायणीयेन चतुर्त्रिंशेन समत्वं भवति बृहत्पृष्ठं विश्वजितं करोति एवं यावन्तः पूर्वस्मिन् पक्षसि पृष्ठोपायास्तावन्त एवोत्तरस्मिन् भवन्ति एतत्पक्षसामत्वमुक्तम् ॥ ११ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रत्रयं कृतम् ।

विश्वजित उपरिष्टादायुषमेक उपयन्ति* ॥ १२ ॥

एके आचार्य्या विश्वजित उपरिष्टादायुषं कुर्वन्ति ॥ १२ ॥

तथा सति गो आयुषोरैकाह्निके बृहत्यौ* ॥ १३ ॥

तथा सति विकल्पे गो आयुषोरैकाह्निके बृहत्यौ भवेतां ॥ १३ ॥

दशरात्रमेक आवर्त्तयन्ति* ॥ १४ ॥

एके आचार्य्या दशरात्रमप्यावर्त्तयन्ति आवर्त्तं सर्वमुत्तरं पक्ष कुर्वन्ति ॥ १४ ॥

तस्माद्व्रतं यदा परं व्रतान्ते मानसं सांवर्ग्यजिता गोतमाः* ॥ १५ ॥

तस्मादावृत्ताद्दशरात्रात्परं यदा व्रतं भवति तदा तस्य परस्तान्मानसम्भवति एवं सांवर्ग्यजिता गोतमा आचार्य्या मन्यन्ते नतु तेन समयमिति ॥ १५ ॥

---

* द्राह्यायणोऽप्येवम् ।

इति चतुर्थस्य सप्तमी कण्डिका ।

अथ अष्टमी कण्डिका ।

ज्योतिषामयनविकल्पाः* ॥ १ ॥

इह गवामयनस्य षष्ठ्यधिकं त्रिशतं पठितान्यहानि ब्राह्मणेन संवत्सरविकल्पाश्चानेके श्रूयन्ते ज्योतिर्नक्षत्रादयस्तेषां कल्पना चिकीर्षिता पुरा तदारभते ज्योतिषामयनविकल्पा इति ज्योतींषि नक्षत्रादीनि तेषाङ्गतिविकल्पा वक्ष्यन्त इति वाक्यशेषः ॥ १ ॥

तत्र यदादितोऽन्ततस्तदूर्द्ध्वं विषुवतः* ॥ २ ॥

तत्र तेषु ज्योतिषाङ्गतिविकल्पेषु पूर्वस्मिन् पक्षसि यद्यदादितो वक्ष्यन्ते तदूर्द्ध्वं विषुवतः अन्ततः प्रत्येतव्यम् ॥ २ ॥

मासि मास्याद्यस्याभिप्लवस्य स्थाने त्रिकद्रुकाः* ॥ ३ ॥

ये ते सावना मासाः त्रिंशिनः कल्पिताः तेष्वेकैकस्मिन्मासि आद्यस्याभिप्लवस्य स्थाने त्रिकद्रुकाः त्र्यहा भवन्ति आभिप्लव एवेत्यर्थः उत्तरे पक्षस्यान्त्यस्य ॥ ३ ॥

स षट्त्रिंशदूनो नाक्षत्रः सप्तविंशिनो हि मासाः† ॥ ४ ॥

स एवं क्रियमाणः संवत्सरः सावनात् संवत्सरात् षट्त्रिंशता-

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणीये छेदविषये विशेषोऽस्ति ।

ह्नोभिः ऊनो भवति नाक्षत्रः नक्षत्रसम्मितः सप्तविंशिनो मासा भवन्ति तत्र सप्तविंशतिर्नक्षत्राणीति ॥ ४ ॥

षष्ठाद्यस्याभिप्लवस्य स्थाने ज्योतिर्गौश्च ज्योतिरेवावृत्ते स नवोनो नाक्षत्र एव त्रयोदशी* ॥ ५ ॥

षष्ठस्य मासस्य य आद्योऽभिप्लवः तस्य स्थाने ज्योतिर्गौश्च स्यातां ज्योतिरेवावृत्तः स्यात् न गौः उक्तं तत्र यदादितोऽन्ततस्तदूर्ध्वं विषुवत इति स सावनात् संवत्सरान्नवभिरह्नोभिरूनः चत्वार्यहानि पूर्वस्मिन् पक्षसि लुप्तानि पञ्चोत्तरस्मिन् स नाक्षत्र एव संवत्सरो भवति त्रयोदशी तत्रापि सप्तविंशिन एव मासाः त्रयोदश भवन्ति ॥ ५ ॥

युग्ममासेष्वाद्यस्याभिप्लवस्य स्थाने तत्पञ्चाहः स षडूनश्चान्द्रमसः* ॥ ६ ॥

युग्ममासेषु द्वितीयचतुर्थषष्ठेषु प्रथमस्याभिप्लवस्य स्थाने तत्पञ्चाहः अभिप्लवपञ्चाहः तत्र यदादितोऽन्ततस्तदूर्ध्वं विषुवत इत्येतदनुवर्त्तते एवं सावनात् संवत्सरात् षड्भिरह्नोभिरूनश्चान्द्रमसः एषा चान्द्रमसी गतिः ॥ ६ ॥

षष्ठादौ त्रिकद्रुकानभिप्लवञ्चोपदध्यात् सोऽष्टादशाधिकः पौर्णमासी प्रसवस्तैर्य्यगयनिक आदित्यस्य* ॥ ७ ॥

---

* शाट्यायनोऽप्येवम् ।

षष्ठस्य मासस्यादौ त्रिकद्रुकानभिप्लवञ्चोपदध्यात् उपधानं कुर्य्यात् ज्योतिषं दर्शावधि माससुशन्ति चान्द्रं सौरं तथा भास्कर-राशिचारात्। त्रिंशद्दिनं सावनसंज्ञमाहुर्य्या नाक्षत्रमिन्दोर्भगणभ्रमाच्च। बृहस्पतिः अभ्युदये रवेर्मासश्चान्द्रश्च पितृकर्म्मणि। यज्ञे सावनमित्याङ्गराद्यं सर्वव्रतादिषु। पूर्वस्मिन् पक्षसि यदादितोऽन्ततस्तदूर्ध्वमित्यनुवर्त्तते एवं सावनात् संवत्सरादष्टादशभिरहोभिरधिकः पूर्वस्मिन् पक्षसि अतिरिच्यते नवोत्तरस्मिन् एवमष्टादशाधिकः पौर्णमास्यां चास्य प्रसवः स्यात् स आदित्यः संवत्सरः तैर्य्यगयनिकः कदाचिदादित्यस्यैषा गतिर्भवति तिर्य्यग्गतिः आन्तरिक्षो गतिः तिरश्चो॥ ७॥

उत्सर्जनानि मासि मासि* ॥ ८ ॥

ब्राह्मणं श्वा वा एते संवत्सरं प्याययन्ति य उत्सृजन्ति यथा वै दृतिराध्मात एवं संवत्सरोऽनुत्सृष्ट इत्येतान्युत्सर्जनान्यादर्शयति ततस्तदुत्सर्जनानि उच्यन्ते, उत्सर्जनानि मासि मासि भवन्ति ॥८॥

यथान्त एवमावृत्तानामादिः* ॥ ९ ॥

यथा अन्तः वक्ष्यते पूर्वस्मिन् पक्षसि एवमावृत्तानामादिः उत्तरस्मिन् पक्षसि स्यात्॥ ९॥

पूर्वेष्वभिप्लवेषु षष्ठमहरुक्थ्यं कृत्वाग्निष्टोममुत्तमे* ॥१०॥

---

* द्राह्यायणेऽप्येवम्।

मासि मासि पूर्वेष्वभिप्लवेषु षष्ठमहरुक्थ्यं कृत्वा उत्तमेऽभिप्लवे चतुर्थे षष्ठमहरग्निष्टोमं कुर्य्यात् उक्तं यद्युत्सृजेयुरुक्थ्यान्युत्सृजेयुरिति उत्सर्गिणामेष विधिः यथान्त एवमावृत्तानामादित्युत्तरपाक्षिको विधिरुक्तः ॥ १० ॥

तद्धैकत्रिकस्तोमम्* ॥ ११ ॥

तद्वा अहः उत्तमस्याभिप्लवस्य षष्ठं यदग्निष्टोमसंस्थमुक्तं तदेकत्रिकस्तोमं स्यात् उक्तं अथ खल्वाहुरेकत्रिकं कार्य्यन्तदेव साद्यादुत्सृष्टमिति तस्यैकत्रिकस्तोमस्य द्रव्यमुच्यते ॥ ११ ॥

असृक्षतेति बहिष्पवमानं गायत्रं गायत्र्यामाश्वमेढ़ं बृहत्यां गोष्ठो वायारुचेति गायत्रपार्श्वमार्भवः † ॥ १२ ॥

असृक्षतेत्यस्यां बहिष्पवमानेऽवस्थितायां गायत्र्यां यथा गायत्रं स्यात् आश्वमेढ़ं बृहत्याम् अवस्थितायामेव गोष्ठो वा अयारुचेत्यस्यामृचि गायत्रपार्श्वमार्भवः अन्यत् समानमेव ॥ १२ ॥

सवनविधं पशुं कुर्वन्नुत्तममभिप्लवपञ्चाहं कृत्वा षष्ठस्थाने सवनविधः पशुः* ॥ १३ ॥

उक्तम् अभ्युह षुण्वन्ति छिद्रो वा एतेषां संवत्सर इत्याकृर्य्य

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रत्रयं कृतम् ।

सामयुक्तमश्नीति पशुमालभन्त इति प्रातः पशुमालभन्ते तस्य पुनः प्रचरन्तो येतदादिविधिरुक्तः सवनविधस्य पशोः तं सवनविधं पशुं कुर्वन्नुत्तममभिप्लवपञ्चाहं कृत्वा। षष्ठस्याह्नः स्थाने सवनविधं पशुं कुर्यात् उत्तरपाक्षिको विधिरुक्तः ॥ १३ ॥

प्रथमस्याभिप्लवं पञ्चाहं कृत्वा मासान्ते सवनविधः पशुः* ॥ १४ ॥

षष्ठमासस्याद्याभिप्लवस्य स्थाने तत्पञ्चाहं कृत्वा मासान्ते सवनविधं पशुं कुर्यात् ॥ १४ ॥

सर्वांस्तूनेके प्रथममभिप्लवपञ्चाहं कुर्युः । ॥ १५ ॥

एके आचार्याः सर्वान्मासानूनानिच्छन्ति केन न्यायेनेत्युच्यते प्रथममभिप्लवपञ्चाहं कुर्युः मासि मास्याद्यस्याभिप्लवस्य स्थाने तत्पञ्चाहं कुर्युः ॥ १५ ॥

अह्नो वा समस्येयुरभिप्लवपृष्ठ्ययोः सान्निपातिके ॥१६॥

अथवा समासं कुर्युः मासि मास्यभिप्लवपृष्ठ्ययोः आभिप्लविकश्च षष्ठमहः, पाष्ठिकश्च प्रथममहः एकस्मिन्नहनि कुर्युः ॥ १६ ॥

अभिप्लवेषूत्तमे* ॥ १७ ॥

---

* द्राह्यायणोऽप्येवम् ।

। द्राह्यायणेनानेन सूत्रद्वयं कृतम् ।

उत्तमे गवामयनस्य मासि अभिप्लवयोः सान्निपातिके छन्दोमौ समस्येयुः तत्र स्थानान्तरं पृष्ठ्यो नास्ति ॥ १७ ॥

तथा सत्येकादश्यां पूर्वपक्षस्य दीक्षित्वा त्रयोदशदीक्षाः कुर्वीरन्* ॥ १८ ॥

तथा सति विकल्पे एकादश्यां पूर्वपक्षस्य दीक्षित्वा सत्रिणः त्रयोदशदीक्षां कुर्वीरन् ॥ १८ ॥

सप्तदश वा* ॥ १९ ॥

स्पष्टार्थः ॥ १९ ॥

व्यत्यासं वा पूर्णा नानूनपूर्णा नावृत्ताच्छालङ्कायनिनः ॥ २० ॥

व्यत्यासं वा व्यत्यस्य त्रा पूर्णम् न ऊनं पूर्णमिति एवं पूर्वस्मिन् पक्षसि मासानां क्रिया मन्यन्ते एवम् ऊनं पूर्णम् ऊनं पूर्णमित्युत्तरस्मिन् पक्षसि शालङ्कायनिनो मन्यन्ते ॥ २० ॥

एकाष्टकादीक्षिणा उपसर्गिणस्ते तूष्णीमेकविंशमहरासीरन्† ॥ २१ ॥

उपसर्गविधानमुक्तम् अन्ये उपसर्गिणो भवन्ति ये उपसर्गिणः

---

* द्राह्यायणेऽप्येवम्।

† द्राह्यायणेनैतत् सूत्रद्वयं कृतम्।

एकाष्टकायान्दीक्षिते ते किं कुर्युरित्युच्यते एकाष्टकादीक्षिण उपसर्गिणः मासि मासि तूष्णीमेकत्रिंशमहरासीरन् ॥ २१ ॥

सवनविधेन वा पशुना यजेरन्* ॥ २२ ॥

तस्मिन् मासि मास्येकत्रिंशेऽहनि सवनविधेन वा पशुना यजेरन् सवनविधस्य पशोर्विधानमुक्तम् ॥ २२ ॥

अध्वर्युबह्वृचैः समयं कृत्वा दीक्षेरन्नेवमविलोपो भवतीति भवतीति* ॥ २३ ॥

अध्वर्युभिर्बह्वृचैश्च सह समयं कृत्वा विधिं प्रति ये विकल्पाः तेषाम् एककल्पं सर्वेऽङ्गीकृत्य दीक्षेरन् एवं क्रियमाणे न विवादो भवति कर्मणः हेतूपादानं किमर्थमिति चेत् उच्यते, एतत्प्रकरणविषयमेव केवलं विधानं माभूदिति कथं सर्वकर्मस्वध्वर्युबह्वृचैः सह समयं कृत्वा दीक्षेरन् अलोपहेतुत्वादिति ॥ २३ ॥

इति चतुर्थस्य अष्टमी कण्डिका ।

अथ नवमी कण्डिका ।

सर्वत्र ब्रह्मा दक्षिणत उदङ्मुखः कुर्याद्धोमेभ्योऽन्यत्† ॥१॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणे मानेन सूत्रद्वयं कृतम् ।

उक्तं गवामयनं सविकल्पं साम्प्रतं ब्रह्मत्वं विवक्षितं इन्द्रो ह वै विश्वामित्रायोक्थमुवाच वसिष्ठाय ब्रह्मवागुक्थमित्येवं विश्वामित्राय मनो ब्रह्म वसिष्ठाय तद्वा एतद्वासिष्ठं ब्रह्मापि हैवंविद् वा वासिष्ठं वा ब्राह्मणं कुर्वीतेति एवं ब्राह्मणपरामर्शः क्रियते उद्गावे तस्य ब्रह्मणः कर्मोच्यते तद्विवक्षुराह सर्वत्र ब्रह्मा दक्षिणतः उदङ्मुखः कुर्य्यादिति सर्वत्र सर्वकर्म्मस्वित्यर्थः सर्वशब्दो निरवशेषवाची ब्रह्मेति कर्त्ता निर्द्दिश्यते दक्षिणत इति दिक्परिग्रहः क्रियते कस्य दक्षिणतः उच्यते, कर्मणः क्रियमाणस्य दक्षिणे प्रदेशे स्यात् उक्तं तस्माद्ब्राह्मणं दक्षिणत आसयतीति उदङ्मुख इति कर्मसूदङ्मुखता निर्द्दिश्यते ब्राह्मणः कुर्य्यादिति क्रियोपदेशः सर्वेषां कर्म्मणां क्रियमाणानां दक्षिणतो ब्रह्मा स्यादिति एष सूत्रार्थः होमेभ्योऽन्यत्कर्म उदङ्मुखः कुर्य्यात् होमस्तु प्राङ्मुख एव प्राङ्मुखकरणस्थानादेश इति अत्रोच्यते, सर्वग्रहणन्तावन्न कर्त्तव्यं किं कारणम् अधिकृतत्वात् सर्वकर्मणां विध्यव्यपदेशे सर्वक्रत्वधिकार इति सोऽयं विधिरव्यपदेशे आदिश्यमानः सार्वक्रतुको भविष्यत्येव तस्मात् सर्वग्रहणं शक्यमवक्तुम्, अथ पुनः क्रियते कारणं वक्तव्यम् उच्यते, अत्र तावदयं सर्वशब्दोऽधिकारनिवृत्त्यर्थः सत्रेषु सर्वानध्वर्युर्दीक्षयेदित्येषोऽधिकारः प्रवृत्तः तस्मात् सर्वशब्दो युक्तो ब्रह्मणः कर्मादौ उच्यते, यद्येवं तथापि न कर्त्तव्यः सर्वशब्दः कस्मात् अर्थसमाप्तेः योऽसौ सत्राधिकारः प्रवृत्तः तस्यार्थः समाप्तः किञ्चान्यत् न प्रकृतमतिदेशा बाधन्तइति च न्यायोपदेशात् न ह्यातिदेशिको विधिः सामान्यस्याधिकारस्य प्रवृत्तस्य बाधको भवति तस्मात् सर्वशब्दस्तदवस्थ एव

उच्यते, एवं तावदयं सर्वशब्दः शेषविध्युपसंग्रहार्थोऽस्तु उद्गात्वं सोममधिकृत्योत्पन्नं सर्वक्रत्वधिकार इति सोऽयमाचार्य्यः सर्वशब्दं करोति कथं एतद्ब्रह्मत्वं पाकहविःसोमेषु सर्वेषु स्यादिति उच्यते, यद्येवमर्थं सर्वग्रहणं तथापि न कर्त्तव्यमेव अक्रियमाणेऽप्येतस्मिन् स गम्यत एवैतत् यथा सर्वत्रेति कथं पाकयज्ञादीन् वक्ष्यति एकाग्नौ यज्ञास्तेषां होष्यत्सु तूष्णीमुपविशेत् अग्न्याधेये दक्षिणया द्वारा प्रपद्य चातुष्प्राश्यन्निर्वप्स्यत्सु तूष्णीमुपविशेत् इष्ट्यादिषु सर्वेषु यजुषोपविशेत् मिथुनौ दक्षिणान्वारम्भणीयायामिष्टौ अमावास्यायान्दोहनपवित्रे मार्जयेरन्नापोहिष्ठीयाभिः चातुर्मास्येषु वरुणप्रघासानांस्तम्बयजुर्हरिष्यत्सु यजुषोपविशेत् पशूनां यूपाहुतिं होष्यत्सु तूष्णीमुपविशेत् सौत्रामण्यां सुराकर्मस्वाम्राजमाशोनेति एवमेकविंशतिसंस्यापि यज्ञे सिद्धे ब्रह्मत्वे सर्वग्रहणं न तदवश्यमेव तस्मान्न कर्त्तव्यमिति उच्यते, कर्त्तव्यमेव अक्रियमाणे एतस्मिन् ये सोमाङ्गभूताः पाकहविर्यज्ञास्तास्तेषु न प्रतीयेत यद्दार्षद्वतमधिकृत्य ब्रवीति नैतन्धवानामार्माः सरस्वत्यान्तेषामेकोऽध्वर्युस्तस्मिन् संवत्सरमग्निमिन्धीत तयैकाग्नेः परिचर्य्या तयेति संवत्सरादूर्द्ध्वं परिणमनस्यान्तो कुरुक्षेत्रे तस्यामग्निमाधाय यथाकालमन्वारम्भणीययेष्ट्वा प्रसज्येतेति तथा कौण्डपायिनो मासन्दीक्षिता भवन्ति ते मासि मासि सोमं क्रीणन्ति तेषां द्वादशोपसदमुपसद्भिश्चरित्वा सोममुपनह्य मासमग्निहोत्रं जुह्वति मासन्दर्शपूर्णमासाभ्यां यजते मासं वैश्वदेवेन मासम्वरुणप्रघासैः मासं साकमेधैर्मासं शुनासीर्य्येणेति एवमेते पाकहविर्यज्ञाः सोमाङ्गभूता दृष्टाः तदक्रियमाणे सर्वशब्दे एतेष्वेवैतद्ब्रह्मत्वं न प्रतीयेत

तन्माभूदित्यत आह सर्वत्रेति उच्यते, यद्येवमर्थं तथापि न कर्त्तव्यम् अस्मिन्नेव पाकहविर्यज्ञप्रकरणज्ञापकानि वक्ष्यन्ते यथा शूलगवे च बलीन् क्रियमाणाननुगच्छेत् इत्यादिषु सर्वेषु यजुषोपविशेत् एतत् सर्वेष्टीनां ब्रह्मत्वम् अङ्गभूतानां वेत्येतदुक्तं भवति पशूनां यूपाहुतिं होष्यत्सु यजुषोपविशेत् वपायां हुतायामिदमाप इति चात्वाले मार्जयित्वा सर्वपशूनां यथार्थं स्यात् अङ्गभूतानां चानङ्गभूतानाञ्चेति सिद्धे एकविंशतिसंस्थे यज्ञे ब्रह्मत्वे सर्वत्रग्रहणं तदवश्यमेव तस्माच्छक्यमकर्त्तुम् उच्यते, न कर्त्तव्यं कर्त्तव्यमेव अस्य तात्त्सर्वशब्दस्य ब्रह्मणैव समानाधिकरणमस्तु सर्वत्र ब्रह्मा सर्वं त्रायत इति सर्वत्रं सर्वत्र चासौ ब्रह्मा च सर्वत्र ब्रह्मा कथं सर्वं त्रायते एवंविदं ह वा एष ब्रह्माणमनुगाय्येत्येवमधिकृत्याह ब्राह्मे वैकार्त्विक् कुह्वतश्चाभिरक्षति एवंवित् ह वै ब्रह्मा यज्ञं यजमानं सर्वांश्चर्त्विजोऽभिरक्षति तस्मादेवंविदमेव ब्राह्मणं कुर्वीतेति सोऽयं सूत्रकारः एवंलक्षणं ब्रह्माणं दर्शयति सर्वत्र ब्रह्मेति किञ्चान्यत् यत्र च ब्रह्मणः कर्मास्ति सर्वेषां कर्मणां क्रियमाणानां सुब्रह्मण्यप्रभृतीनां ब्रह्मा हि दक्षिणतः स्यात् एवञ्च शाखान्तरेऽप्याह वाग्यतः कर्माणि स्मर्य्यमाण आसीत तस्याः तस्याः चेष्टाया दक्षिणत एव स्यात् दक्षिणायाश्च दिशो न व्यवेतेति तस्मात् सर्वत्र ब्रह्मा दक्षिणतः आवसथोऽपि ब्रह्मणो देवयजनस्य दक्षिणत एव स्यात् तस्मायुक्तं सर्वग्रहणम् ॥ १ ॥

पाकयज्ञा इत्याचक्षत एकाग्नौ यज्ञान्* ॥ २ ॥

---

* शाख्यायनोऽप्येवम् ।

पाकयज्ञा इत्येवमाचक्षते य एकाग्नौ यज्ञाः पाकयज्ञा इति संव्यवहारार्था संज्ञा वक्ष्यति तूष्णीं पाकयज्ञे दक्षिणामोमिति वा प्रतिगृह्णीयादिति अथ यज्ञग्रहणं किमर्थमिति चेत् उच्यते ये एवाग्नीभूताः पाकयज्ञास्तेषामेतद्विधानमुपदिश्यते अन्येषां गृह्योक्तमेव ॥२॥

तेषां होष्यन्स्तु तूष्णीमुपविशेद्धुते यथार्थं स्यात्* ॥ ३ ॥

तेषां पाकयज्ञानां होष्यन्स्तु होमकालात्पूर्वं तूष्णीमुपविशेत् हुते यथार्थं स्यात् यथार्थं स्यादित्यपवर्गं कर्मणो दर्शयति ॥ २ ॥

शूलगवे च बलीन् ह्रियमाणाननुगच्छेन्निधीयमानानां दक्षिणतः स्थित्वा निहितेष्वप उपस्पृश्यानपेक्षं प्रत्याव्रजेत्* ॥ ४ ॥

शूलगवानामपशूर्भवत्यध्वर्यूणामेकाग्नौ तत्र यथाविधानमासित्वा बलीनरण्यं ह्रियमाणाननुगच्छेत् तेषां बलीनां निधीयमानानां दक्षिणतः स्थित्वा निहितेषु तेषु बलिषु अप उपस्पृश्य अनपेक्ष्य प्रत्याव्रजेत् ननु दक्षिणतः स्थित्वा इति किमर्थम् उच्यते, आचार्यस्य प्रवृत्तिरियं यत्र यत्रानुगमनं तत्र तत्र वक्ष्यति । अथ शूलगवे चेति चशब्दः किमर्थं उच्यते, तत्र केचिद्बलीन् हरति केचिन्न तद्येषां ह्रियते तेषामनुगच्छेत् ॥ ४ ॥

तूष्णीं पाकयज्ञे दक्षिणामोमिति वा प्रतिगृह्णीयात् † ॥५॥

---

* द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

† द्राह्यायणेऽप्येवम् ।

पाकयज्ञे दक्षिणा दीयमानाः तूष्णीं प्रतिगृह्णीयात् ओमिति वा, शूलगवः प्रकृतः अतः पुनः पाकयज्ञग्रहणं करोति कथं, सर्वेषु पाकयज्ञेषु तूष्णीमोमिति वा प्रतिगृह्णीयादिति ॥ ५ ॥

पशुरेव पशोर्दक्षिणा पूर्णपात्रं स्थालीपाकस्य* ॥ ६ ॥

एकाग्नौ यः पशुः तस्य पशुरेव दक्षिणा, पूर्णपात्रं स्थालीपाकस्य दक्षिणा, पूर्णपात्रस्य लक्षणमुक्तं गृह्ये पशुरेवेत्येवशब्दः क्रियते दक्षिणात्वे अनादेशे पशुर्दृष्टः स एव स्यात् न यज्जातीय आलभ्यत इति ॥ ६ ॥

उभयोर्वा यथोत्साहम् † ॥ ७ ॥

उभयोर्वा पशुस्थालीपाकयोर्यथोत्साहं दक्षिणां दद्याद् यजमानः येषां होष्यत्सु तूष्णीमुपविशेत् हुते यथार्थं स्यात् तेषामेतद्विधानमुपदिश्यते अन्येषां गृह्योक्तमेव ॥ ७ ॥

कर्मादिषु सर्वेषु अध्वर्युसंप्रेषमागमयेत् † ॥ ८ ॥

कर्मणामादिषु सर्वेषु अध्वर्य्युसंप्रेषमागमयेत् कः कस्मिन् कर्म्मणि सम्प्रैष इति सर्वग्रहणम् इति पाकयज्ञाः प्रकृताः ॥ ८ ॥

पूर्वया च द्वारानादेशे प्रविशेत् † ॥ ९ ॥

---

* द्राह्यायणेनैतेन सूत्रद्वयं कृतम्।

† द्राह्यायणेऽप्येवम्।

आनादेशे पूर्वया द्वारा प्रविशेत् कर्म्मशालायां चशब्दः सर्वकर्मस्विति प्रकृतानुकर्षणार्थः अनादेश इति वक्ष्यत्यग्न्याधेये दक्षिणया द्वारा प्रतिपद्यते ॥ ९ ॥

अग्न्याधेये दक्षिणया द्वारा प्रपद्य चातुष्प्राश्यं निर्वप्स्यतस्तु तूष्णीमुपविशेत्* ॥ १० ॥

पाकयज्ञेषु ब्रह्मत्वमुक्तं साम्प्रतं हविर्यज्ञेषूच्यते, अग्न्याधेयन्नाम प्रथमं हविर्यज्ञिकं कर्म तस्मिन्नग्न्याधेये दक्षिणया द्वारा प्रपद्य कर्मशालाया चतुष्प्राश्यं नाम हविः चत्वारः प्राश्नन्ति तमिति चातुष्प्राश्यन्तदर्थं द्रव्यनिर्वपणं करिष्यतस्तु तूष्णीमुपविशेत् ॥ १० ॥

निरुप्ते यथार्थꣳ स्यात्* ॥ ११ ॥

निरुप्ते तस्मिंश्चातुष्प्राश्ये हविषि यथार्थं स्यात् यथार्थं स्यादिति गच्छेदित्येतदुक्तं भवति ॥ ११ ॥

तदुद्धरिष्यतस्त्वेवमेव* ॥ १२ ॥

तच्चातुष्प्राश्यं हविःशृतमुद्धरिष्यतस्तु एवमेव दक्षिणया द्वारा प्रपद्य तूष्णीमुपविशेदिति । उद्धरिष्यतस्त्वतन्त्रं सङ्गवचनम् ॥ १२ ॥

---

* द्राह्यायणेऽप्येवम्

तच्चेदृत्विग्भिः प्राशयेयुस्तन्दुलानादायापविध्येयुर्नैष्टाविद्धंकृतानीति* ॥ १३ ॥

तच्चातुष्प्राश्यं केचिदृत्विग्भिः प्राशयेयुः, केचिदन्यैर्ब्राह्मणैस्तस्यादि तदृत्विग्भिः प्राशयेयुः तत्तस्मात्तन्दुलानाहौला अपविध्येयुः नेष्टाविद्धंकृतानीत्यनेन मन्त्रेण अपवेधः अधःप्रक्षेपः, तन्दुलशब्दः खिन्नेषु च भूतपूर्व्वगत्या प्रवर्त्तते ॥ १२ ॥

अथान्यान् कृतास्वाश्वत्थीष्वनुदधीरन्* ॥ १४ ॥

अथान्यान् तन्दुलान् कृतास्वाश्वत्थीषु समित्सु प्राश्नीयुः अपरे ब्रुवते तस्मिन्नेवाग्नौ प्रक्षिपेयुरिति ॥ १४ ॥

आधास्यमानस्यारण्योः प्रकृतयो यथार्थं स्यात्* ॥ १५ ॥

योऽग्नीनाधाययिता स आधास्यमानः तस्याधास्यमानस्य अरण्योरर्पितयोर्यथार्थं स्यात् यो यस्यार्थः यथार्थः ॥ १५ ॥

पूर्वाह्णे दक्षिणेनाऽग्न्यायतनानि गत्वा यत्राग्निं मन्थिष्यन्तः स्युस्तद्दक्षिणतो निरस्तः प्रावसुरिति दक्षिणा तृणं निरस्येदावसोः सदने सीदामीत्युपविशेत् भूर्भुवःस्वर्बृहस्पतिर्ब्रह्माहं मानुषओमित्येतेनोपविशेत् यजुषेति यत्र स्यात् † ॥ १६ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

इदमपरेद्युः कर्मोपदिश्यते पूर्वार्द्धे अर्द्धः पूर्वो भागः पूर्वार्द्धः तस्मिन् पूर्वार्द्धे दक्षिणेनाग्न्यायतनानि गत्वा अग्नीनां स्थानानि अग्न्यायतनानि न तावदद्यापि अग्नयो भवन्ति स्थानानि तावत् कृतानि भवन्ति तान्यग्न्यायतनानि दक्षिणेन गत्वा यस्मिन् देशे अग्निमन्थनं करिष्यन्तः स्युः तस्य दक्षिणात्प्रदेशात्तृणं गृहीत्वा निरस्तः परावसुरित्यनेन दक्षिणतः तृणं निरस्यति निरसनं प्रक्षेपः आवसोः सदने सीदामीत्यनेनोपविशेत् यस्माद्देशात् तृणं गृहीत्वा निरस्तम् एतदुपवेशनस्थानं ततः भूर्भुवःस्वर्बृहस्पतिर्ब्रह्माहं मानुष इत्येवं जपेत् एतेनोपविशेद्यजुषेति यत्र स्यात् अयमुपवेशनं चतुष्प्रकारं वक्ष्यति एकत्र तावद्यजुषोपविशेदिति वक्ष्यति अन्यत्र उपविशेदिति वक्ष्यति अन्यत्र तूष्णीमुपविशेदिति वक्ष्यति आसीनेत्यन्यत्र यत्र तावद्यजुषेति ब्रूयात् तत्र कृत्स्नं स्यात् मन्त्रवत् तृणनिरसनम् उपवेशनं मन्त्रवदेव उपरिष्टाज्जप इति यत्रोपविशेदिति ब्रूयात् तत्र तृणनिरसनोपवेशने मन्त्राभ्यामेव उपरिष्टाज्जपो न स्यात् यत्र तूष्णीमुपविशेदिति ब्रूयात् तत्र तृणनिरसनं मन्त्रवत् तूष्णीमुपवेशनं न चोपरिष्टाज्जपः यत्रासीनेति ब्रूयात् तत्र तृणनिरसनादि सर्वमेव निवर्त्तेत केवलमासनमेव ॥ १६ ॥

अग्निं प्रणीयमानं यथेतमनुगच्छेत्* ॥ १७ ॥

मन्थनविधिमतिक्रम्य अग्निप्रणयनविधिस्तावदुच्यते अग्निं प्रणी-

---

* द्राह्यायणोऽप्येवम् ।

यमानं यथागतमनुगच्छेत् उत्तरेणाग्न्यायतनानामग्निं प्रणीयते अयन्तु दक्षिणेनाग्न्यायतनानाङ्कृतः तत्तेनैवानुगच्छेत् पश्चाद्गच्छेत्तमनुगच्छेत् ॥ १७ ॥

निधीयमानस्य दक्षिणतः स्थित्वा निहिते यजुषोपविशेत्* ॥ १८ ॥

निधीयमानस्याग्नेर्दक्षिणतः स्थित्वा निर्हिते यजुषोपविशेदिति उक्तं यजुषोपवेशनं नित्ये ॥ १८ ॥

अत्र प्रथममिति शाण्डिल्यः* ॥ १९ ॥

अस्मिन् देशे प्रथमं युजुषोपविशेदिति शाण्डिल्य आचार्य्यो मन्यते यत्तु पूर्वमुक्तं यजुषोपवेशनम् अग्निमन्थनप्रदेशे तच्छाण्डिल्यस्य नेष्टम् ॥ १९ ॥

द्वितीयमिति धानञ्जप्यः* ॥ २० ॥

द्वितीयमेतद् यजुषोपवेशनमित्येवं धानञ्जप्य आचार्य्यो मन्यते यच्च पूर्वोक्तं यथेदमुभे यजुषा स्यातामिति ॥ २० ॥

जाते रथन्तरं गायेद्वामदेव्यꣳ ह्रियमाणे बृहन्निहिते सर्वाणि तृचेषु मनसा † ॥ २१ ॥

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणे नैतेन सूत्रद्वयं कृतम् ।

जातेऽग्नौ रथन्तरं साम गायेत् वामदेव्यं क्रियमाणे प्रणीयमाणे बृहन्निहिते आहवनीये स्थापितेऽग्नौ बृहत्साम गायेत् सर्वाणि तृचेषु मनसा सर्वाण्येतानि तृचेषु गायेत् मनसा न वाचा सर्वग्रहणं किमर्थमिति चेत् उच्यते वक्ष्यति प्रथमोत्तमयोः स्थाने वारवन्तीययज्ञायज्ञीय इति अतः सर्वग्रहणं करोति कथं वामदेव्ये यज्ञायज्ञीये च क्रियमाणे तृचस्थे भवत इति ॥ २१ ॥

प्रथमोत्तमयोः स्थाने वारवन्तीययज्ञायज्ञीय इति शामकायनः* ॥ २२ ॥

प्रथमोत्तमयोः रथन्तरबृहतोः स्थाने वारवन्तीययज्ञायज्ञीये गायेदित्येवं शामकायन आचार्यो मन्यते अरण्ये गेयत्वात्पूर्वयोः ॥२२॥

पूर्वे कल्पे भूयाꣳसीति धानञ्जय्यः* ॥ २३ ॥

यानि भूयांसि वक्ष्यन्ते तानि पूर्वस्मिन् कल्पे स्युः रथन्तरबृहत्कल्पेनोत्तरस्मिन् वारवन्तीययज्ञायज्ञीयकल्पे ॥ २३ ॥

इति चतुर्थस्य नवमी कण्डिका ।

अथ दशमी कण्डिका ।

मन्थिष्यतस्त्वरणी आलभ्यारण्योरिति गायेत्* ॥ १ ॥

---

* द्राह्यायणोऽप्येवम् ।

उक्तं पूर्वे कल्पे भूयांसीति यत्र रथन्तरस्तुतः क्रिया तत्रैतानि भवन्ति अग्निमन्थिष्यत्सु अरणी आलभ्य स्पृष्ट्वा अरण्योरित्येतत् साम गायेत् ॥ १ ॥

मथ्यमानेऽग्निं नर इत्येतयोरन्यतरत्* ॥ २ ॥

मथ्यमान इति वर्त्तमानकालोपदेशः मथ्यमानेऽग्नौ अग्निन्नर इत्येतयोः साम्नोः अन्यतरत् एकं साम गायेत् ॥ २ ॥

धूम उदिते त्वेषस्ते धूम ऋण्वतीति* ॥ ३ ॥

मथ्यमानेऽग्नौ धूमे उत्थिते त्वेषस्ते धूमः ऋण्वतीति एतत् साम गायेत् ततः जाते रथन्तरं गायेदित्येतत् प्रागेवोक्तम् ॥ ३ ॥

प्रज्वलितेऽदर्शिगात्विति* ॥ ४ ॥

प्रज्वलितेऽग्नौ अदर्शिगातुवित्तम इत्येतत् साम गायेत् ॥ ४ ॥

निधीयमाने गवां व्रतं यदग्निमीड इति* ॥ ५ ॥

गार्हपत्ये निधीयमानेऽग्नौ गवां व्रतं साम गायेत्, यदग्निमीड इत्येतस्यामृच्युत्पन्नं ततः प्रणीयमाने वामदेव्यं गायेत्, तत्प्रागुक्तं वामदेव्यं क्रियमाण इति आहवनीये निहिते बृहद्गायेदित्येतदपि प्रागुक्तमेव ॥ ५ ॥

---

* द्राह्यायणोऽप्येवम् ।

यानि वैनमध्वर्युर्ब्रूयात् तानि गायेत्* ॥ ६ ॥

एतानि वा यथोक्तानि गायेत् यानि वा एनं ब्रह्माणं अध्वर्युः सम्प्रेष्यति तानि गायेत् ॥ ६ ॥

तान्युद्गातृकर्मैक उद्गाता सामवेदेनेति श्रुतेः † ॥ ७ ॥

तानि सामानि यथोद्दिष्टानि यानि वा अध्वर्युः सम्प्रेष्यति तान्येके आचार्य्या उद्गातृकर्म मन्यन्ते यस्मादियं श्रुतिः यानि सामवेदेन कर्माणि तान्युद्गाता करोति ऋग्वेदेन होता करोति यजुर्वेदेनाध्वर्युः उद्गाता सामवेदेनेति इयं श्रुतिस्तत्रैव स्यात् । ब्रह्मणः प्रकरणे श्रूयमाणानि कथमुद्गातुर्भवन्तीति चेत् तद्ब्रवीति ॥ ७ ॥

यथा विहव्यसजनीयकयाशुभीयानि होतुः* ॥ ८ ॥

यथा उद्गातृप्रकरणे श्रूयमाणानि विहव्यादीनि विहव्यं शस्त्रं सजनीयं शस्त्रं अगस्त्यस्य कयाशुभीयं शस्त्रमिति होतुरेव भवन्त्यसामर्थ्यादुद्गातुः एवमेतानि सामानि ब्रह्मत्वेऽपि श्रूयमाणानि उद्गातुरेव भवन्ति किञ्च ॥ ८ ॥

प्रस्तोतुश्च वैराजशाक्वरीप्रस्तावाः* ॥ ९ ॥

वैराजशाक्वरीषु चैवं श्रुतिः प्रस्तावं प्रस्तुत्य विष्टम्भान् विष्टभ्नातीति यः आभिः क्षिप्रं प्रस्तुत्य क्षिप्रमुद्गायति इति च समान-

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेनानेन सूत्रद्वयं कृतम् ।

कर्त्तृकेऽपि सति आदेशे प्रस्तावमात्रमेव भवति प्रस्तोतुः उद्गीथमुद्गातुरेव भवति। किञ्चान्यत्॥ ९॥

सर्वैश्चाविधानाद् ब्रह्मत्वकारिभिः* ॥ १० ॥

न च सर्वैर्ब्रह्मत्वकारिभिरग्न्याधेये सामगानं ब्रह्मणो विहित तस्मादुद्गातुरेव स्यात्॥ १०॥

कर्मयोगाच्चोद्गातुश्चत्वारो महर्त्विजः प्राश्नन्तीति ह चातुष्प्राश्यप्राशनम्* ॥ ११ ॥

यस्माच्चोद्गातुस्तेन कर्मणा सह संयोगः श्रूयते चत्वारो महर्त्विजः प्राश्नन्तीत्येषा श्रुतिः एभिः कारणैरुद्गातुरेव सामगानं स्यात्॥ ११॥

अधिकारात्तु ब्रह्मणः* ॥ १२ ॥

अत्र व्यावृत्तः पक्षः सर्वत्र ब्रह्मा दक्षिणतः उदङ्मुखः कुर्य्यादिति ब्रह्माधिकृतः तस्मात्तस्यैवेदं सामगानं स्यादधिकारात् ब्रह्मणो ह्यधिकारः सामवेदेन ऋग्वेदेन होता करोति यजुर्वेदेन चाध्वर्युरुद्गाता सामवेदेन अथ पुनर्ब्रह्मा † अनयैव त्रय्येति अतस्तस्यैवाधिकारः अधिकृतो ब्रह्मा भवति सामवेदेन तस्मादधिकाराद्ब्रह्मणः स्यात्॥ १२॥

---

* द्राह्यायणेऽप्येवम्।

† कथ केन ब्रह्मेति पुस्तकान्तरपाठः।

उद्गात्रे चाविधानात्* ॥ १३ ॥

किञ्चान्यत् यदि चेदमग्न्याधेये सामगानमुद्गातृकर्माभविष्यत् तदा उद्गातृप्रकरणे एवं विधास्यदाचार्य्यः सार्वक्रतुके तस्मादेतद्ब्रह्मण एव स्यात् ॥ १३ ॥

दृष्टश्चानेन सामगानं वाजपेयसौत्रामण्योः* ॥ १४ ॥

दृष्टश्चानेन ब्रह्मणः सामगानं वाजपेयसौत्रामण्योः येन दृष्टम् ऋषिणा ऋषिशब्देन ब्राह्मण उच्यते वाजिनां साम ब्रह्मा रथचक्रेऽभिगायतीति वाजपेये ऐन्द्रं साम बृहत्यां सामानि गायतीति सौत्रामण्याम् ॥ १४ ॥

उद्गातेति यथाभूयसो वादः* ॥ १५ ॥

यदुक्तं उद्गातृकर्म्मैक उद्गाता सामवेदेनेति श्रुतेरिति अत्र ब्रूमः यथा भूयसो वादः भूयस्त्वं गृहीत्वा प्रवृत्तः उद्गाता सामवेदेनेति ॥ १५ ॥

हौत्रे विधेर्विहव्यादीनि* ॥ १६ ॥

यदुक्तमुद्गातृप्रकरणे श्रूयमाणानि विहव्यादीनि होतुर्भवन्तीति अत्र ब्रूमः हौत्रे विधिरस्ति अतस्तानि होतुर्भवन्ति होतुरेव सामर्थ्यात्तत्र उद्गातुरसामर्थ्यादेव न भवन्ति ब्रह्मणस्तु पुनस्तत्र त्रयीकर्त्तृकत्वात्सामर्थ्यमस्ति सामगाने ॥ १६ ॥

---

* द्राह्यायणेऽप्येवम्।

स्तोत्रवत् प्रस्तावाः* ॥ १७ ॥

अथ यदुक्तं प्रस्तोतुश्च वैराजशक्वरीप्रस्तावा इत्यत्र ब्रूमः प्रस्तोतुर्यथैवान्येषु स्तोत्रेषु प्रस्तावा भवन्ति तथैवेहापि समाख्यानविनियुक्ता एव योऽपि समानकर्त्तृक आदेशः सोऽप्यन्यार्थः वादसम्बन्धेन प्रवृत्तः ॥ १७ ॥

विराट्सु स्तुवन्ति पुरीषेण स्तुवत इति बह्वश्रुतेः* ॥ १८ ॥

इत्यत्र तयोरेव स्तोत्रयोः श्रुतिः विराट्सु स्तुवन्ति वैराजाविष्टम्भाः शक्वरीभिः स्तुत्वा पुरीषेण स्तुवत इति च तयोस्तोत्रयोस्त्रिकर्त्तृकत्वमेवाभिवदति ॥ १८ ॥

अविधानं विधिद्वैधात् † ॥ १९ ॥

अथ यदुक्तं सर्वैश्चाविधानात् ब्रह्मत्वकारिभिरित्यत्र ब्रूमः अत्राविधानं विधिद्वैधात् केषाञ्चिदिष्टं केषाञ्चिन्नेष्टं सामगानं एभिरेतैर्विहितं येषामिष्टन्तैर्विहितम् ॥ १९ ॥

यावद्वचनं कर्मयोगः † ॥ २० ॥

अथ यदुक्तं कर्मयोगाच्चोद्गातुरित्यत्र ब्रूमः यावदेव कर्म श्रूयते

---

* द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

† द्राह्यायणेऽप्येवम् ।

तावदेवास्तु चातुष्प्राश्यप्राशनं श्रूयते न सामगानं तस्मात्तत्प्राश्यप्राशनमस्तु सामगानं माभूदश्रुतत्वादुद्गातुः अथ वा अत्र ब्राह्मणेनोद्गातुः कल्पितं सूत्रेण विचारितम् एकपक्षेण तस्माद्विकल्प एव स्यात् ॥ २० ॥

हुतायां पूर्णाहुतौ यथार्थꣳ स्यात्* ॥ २१ ॥

सामगानं विचारितं अतोऽनन्तरं ब्रह्मा पूर्णाहुतौ हुतायां यथार्थं स्यात् यथार्थमिति गतार्थम् ॥ २१ ॥

अक्षाꣳश्चेदभिजुहुयुस्तत्र गत्वा तूष्णीमुपविशेत्* २२ ॥

क्वचिदध्वर्यवः अक्षाभिर्होमं कुर्वन्ति अक्षानामविभीतकफलानि तद्यद्यक्षानभिजुहुयुः तत्र तस्मिन् गत्वा तूष्णीमुपविशेत् सिद्धमिदं सर्वत्र ब्रह्मेत्यत्र उपवेशनविधिविशेषणार्थमारभ्यते तूष्णीमिति तद्क्रम् ॥ २२ ॥

तैर्द्यूते यथार्थꣳ स्यात्* ॥ २३ ॥

तैरक्षाभिर्हुते द्यूते प्रवृत्ते यथार्थं स्यात् ॥ २३ ॥

इष्ट्यादिषु सर्वेषु यजुषोपविशेत्† ॥ २४ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेन सूत्रत्रयेणैकसूत्रं कृतम् ।

पूर्वोक्तस्यानन्तरमग्न्याधेयेष्टयो भवन्ति तास्विष्टिषु स्थानमुच्यते इष्टीनामादिषु सर्वेषु यजुषोपवेशयेत् स प्रकार उक्तः अथ सर्वग्रहणं किमर्थमिति चेत् बहुवचनसामर्थ्यात्सिद्धमिदं इष्टिष्विति उच्यते, अग्न्याधेयेष्टिष्वितीदं बहुवचनं कृतार्थम्. अग्न्याधेयेष्टिष्वत्र वर्त्तते सोऽयमाचार्य्यः सर्वग्रहणं करोति कथं सर्वेष्टिष्विदं स्यादिति ॥ २४ ॥

पूर्वो यजमानात् † ॥ २५ ॥

अथ कस्मिन् प्रदेशे इत्युच्यते यजमानासनस्य पूर्वे प्रदेशे ॥ २५ ॥

आहवनीयं प्रति † ॥ २६ ॥

आहवनीयस्याभिमुख्येन प्रतिशब्द आभिमुख्ये वर्त्तते ननु सिद्धमाभिमुख्यम् उदङ्मुखस्यावृत्तौ चेति उच्यते, विकल्पार्थमारभ्यते ॥ २६ ॥

परिध्योर्वा सन्धिं स्रुचां वाग्राण्युत्करं वा ‡ ॥ २७ ॥

परिध्योर्वा सन्धिं प्रत्याभिमुख्यं स्यात् स्रुचां वाग्राण्युत्करं वा प्रतिशब्दः प्रत्येकं परिसमाप्यते ॥ २७ ॥

तमन्तरेणाहवनीयञ्च यजमानञ्च सञ्चरो नान्येषाम् ¶ ॥ २८ ॥

---

† द्राह्यायणेन सूत्रद्वयमेकसूत्रं कृतम् ।

‡ द्राह्यायणेन एतेन सूत्रत्रयं कृतम् ।

¶ द्राह्यायणोऽप्येवम् ।

तं ब्रह्माणमन्तरेणाहवनीयस्य यजमानस्य सञ्चरः स्यात् नान्येषामिति नियमार्थम् अन्तरेण युक्त इति द्वितीया ॥ २८ ॥

तं यदाध्वर्य्युर्ब्रूयाद् ब्रह्मन्निदं करिष्यामीति सवितृप्रसूतोऽदः कुरु भूर्भुवःस्वर्बृहस्पतिर्ब्रह्माहं मानुष ओमित्येतेनानुमन्त्रयेत* ॥ २९ ॥

तं ब्रह्माणं यदा यस्मिन् कालेऽध्वर्युर्ब्रूयात् ब्रह्मन्निदं करिष्यामीति तस्मिन् काले ब्रह्मा ब्रूयात् सवितृप्रसूतोऽदः कुरु अद इति सर्वनामस्थाने यत्कर्म करिष्यन् भवति तस्य नाम गृहीत्वा यथा-ब्रह्मन्नपः प्रणेष्यामि सवितृप्रसूतोऽपः प्रणीय एष प्रकारः सर्वानुज्ञासु भूर्भुवःस्वर्बृहस्पतिर्ब्रह्माहं मानुष ओमित्येतेनानुमन्त्रयेतेति अनुज्ञानस्योपरिष्टादेतं मन्त्रं जपेत् ॥ २९ ॥

इति चतुर्थस्य दशमी कण्डिका।

अथ एकादशी कण्डिका।

प्रणीतासु प्रणीयमानासु वाचं यच्छेदातासां विमोचनात्* ॥ १ ॥

उक्तम् इष्ट्यादिषु सर्वेषु यजुषोपविशेदिति ततोपविष्टस्य ब्रह्मण इष्टिष्विदं प्रथमं कर्मोपदिश्यते प्रणीता इति संज्ञा वक्ष्यति विमु-

---

* द्राह्यायणेऽप्येवम्।

कासु प्रणीयमाणासु समिध आदध्यादिति पात्रस्था आपः प्रणीयन्ते अप्सु बहुवचनं प्रणीता इति न पात्रे प्रणीयमानास्विति वर्त्तमानकालनिर्द्देशः वाचं यच्छेत् आकुतः कालात् उच्यते आतासां विमोचनात् यावत्तासां विमोचनं कृतमिति सौमारौद्रार्थं तस्य हि घृतेनोदकार्थाः क्रियन्ते घृतं प्रणीतार्थेन प्रणीयते तत्राप्यातासां विमोचनात् ॥ १ ॥

तास्वेव प्रणीयमानास्वाहविष्कृतस्तम्बयजुषश्चाध्यासमिधः प्रस्थानीयाया इति वा* ॥ २ ॥

वाग्यमनस्य कालविकल्प आरभ्यते तास्वेव प्रणीतासु प्रणीयमानासु वाचं यच्छेत् आकुतः कालात् आहविष्कृतः यावद्धविष्कृदेहीत्येतद्यजुः प्रयुक्तमिति तत ऊर्द्ध्वं वाग्विसर्गः आकस्मात् कालात् आस्तम्बयजुर्हरणात् स्तम्बयजुर्हरणं यद्वेदि पांशूनुत्कीर्य्य उत्कर उत्किरति ततस्तम्बयजुषः अधि उपरिष्टात्तावद्वाग्यमनं यावत्समित्प्रस्थानीयेति समिधः प्रस्थानीयाया ऊर्द्ध्वं वाग्विसर्गः ॥ २ ॥

यत्र वाध्वर्य्युबह्वृचौ चेष्टेतां यत्र वा न चेष्टेतां वाग्यतः प्रायस्त्वेव स्यात् † ॥ ३ ॥

उक्तं यावद्वा ऋचा होता करोति होतृष्वेव तावद्यज्ञो यावद्यजुषाध्वर्युरध्वर्युष्वेव तावद्यावत्साम्नोद्गातोद्गातृष्वेव तावत् ब्रह्मण्येव ताव-

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

341

युक्तो यत्रोपरतस्तस्मात् तस्मिन्नन्तर्द्धौ ब्रह्मा वाचंयमो बभूवेति सोऽयमाचार्य्य आह यत्र वाध्वर्युबह्वृचौ कर्म कुर्य्यातां यत्र वा न कुर्य्यातां वाग्यतः प्रायस्त्वेव ब्रह्मा स्यादिति प्रायोवचनात् कुर्य्यादिति कदाचित् किञ्चिदिति ॥ ३ ॥

प्रायश्चित्तञ्चेत्कर्त्तव्यं स्याद् भूः स्वाहेति गार्हपत्ये जुहुयात् भुवः स्वाहेति दक्षिणाग्नावाग्नीध्रीये सुत्याचेत् स्वः स्वाहेत्याहवनीये भूर्भुवःस्वः स्वाहेति तत्रैव* ॥ ४ ॥

इह प्रायश्चित्तेषु ब्रह्माधिकृत अतस्तत्प्रकरण आह यज्ञोऽहमित्यस्य कर्मणोऽग्नीनादाय वृक्षमापुप्लुवे महारुणिराहुतिमुद्यत्योवाच पुनर्वैनान्निर्वपस्यस्यतो वावमथोवपस्याम इति स होवाच किं होष्यसीति प्रायश्चित्तमिति किं प्रायश्चित्तमिति सर्वप्रायश्चित्तमिति किं सर्वप्रायश्चित्तमिति महाव्याहृतीरेव समस्तानिति यदि प्रायश्चित्तं नाम कर्मदोषनिधानार्थं क्रियते दोषे उत्पन्ने प्रायश्चित्तं भवति तद्यदि प्रायश्चित्तं कर्त्तव्यं स्यात् भूः स्वाहेति गार्हपत्ये जुहुयात् भुवः स्वाहेति दक्षिणाग्नौ यदि सुत्या स्यादाग्नीध्रीये स्वः स्वाहेत्याहवनीये भूर्भुवःस्वः स्वाहेति तत्रैव तत्रैवेति प्रकृतावधारणं क्रियते। ननु यदि प्रकृतावधारणं भूर्भुवःस्वः स्वाहेत्येवमेव कर्त्तव्यं स्यात् अत्रोच्यते तत्केचिद्वर्णयन्ति एवं क्रियमाणे भूर्भुवःस्वः स्वाहेत्येतमेव केवलामाहुतिं स्यात् या अन्या व्याहृती

---

* द्राह्यायणोऽप्येवम्

गार्हपत्यादिषु दृष्टाः ता न स्युरिति एवञ्चाह यदाहुतिमनूचिषे तस्मादेतामेव जुहुयादिति च, ननु चेच्छब्देन यद्यर्थसिद्धेः कर्त्तव्यं स्यादितीदं किमर्थमुच्यते उच्यते, एष वै ब्रह्म चाप्नोति य एतदनोयुक्तं सुब्रह्मण्याय ददाति ब्रह्मणा चैवास्य श्रिया च यज्ञं समर्द्धयति य एवं वेदाथो खल्वाहुर्यश्चावगतं यश्चानवगतं सर्वस्यैषैव प्रायश्चित्तिरिति तद्यदि तावदनेनैव प्रायश्चित्तार्थं कृतं मन्येत नैव कुर्य्यात् अथ पुनः प्रायश्चित्तार्थमकृतं मन्येत ततः कर्त्तव्यमिदम् अथ स्याच्छब्दः किमर्थमिति चेत् उच्यते, नियमार्थं स्याच्छब्दः क्रियते अथ कृते चाकृते च प्रायश्चित्तार्थं स्यादेवेदम् सर्वत्रेति ॥ ४ ॥

हुत्वा ब्रूयाच्चेष्टताकार्ष्मप्रायश्चित्तमिति* ॥ ५ ॥

हुत्वा यद्येकामाहुतिं यदि बह्वीः ब्रूयात् चेष्टताकार्ष्मप्रायश्चित्तमित्येवं मन्त्रम् ॥ ५ ॥

अवेलायां चेद्व्याहरेदयज्ञियं वापद्येतैता एव व्याहृतीरनुप्रेक्षेतेदं विष्णुरिति वर्चम्† ॥ ६ ॥

उक्तं यस्मात् तस्मिन्नन्तर्द्धौ ब्रह्मा वाचंयमो बुभूषेदिति स यदि प्रयत्नो व्याहरेदेता व्याहृतीर्मनसानुद्रवेत् भूर्भुवःस्वरिति वैष्णवीं

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

वर्षमिदं विष्णुर्व्विचक्रमे इति वाग्यमनस्य कालः सूत्रकारेण नियमितः तद्यथवेलायां किञ्चिद्व्याहरेदयज्ञियं वा किञ्चित्कर्मापद्येत यज्ञमर्हति यज्ञियं न यज्ञियमयज्ञियन्तद्यदि बहिस्तान्त्रिक वाचं वदेत् अनैष्टिकमयज्ञियं वाङ्मनसा आपद्येत एता एव व्याहृतीरनुप्रेक्षेत याभिः प्रायश्चित्तं ऊतम् अनुप्रेक्षेत मनसानुद्रवेत् वैष्णवीं वा ऋचं मनसा ध्यायेत् विष्णुर्देवता अस्येति वैष्णवी उक्तमिदं विष्णुरिति ॥ ६ ॥

अमावास्यायां दोहनपवित्रे मार्जयेरन्नापोहिष्ठीयाभिः*।७

दर्शपौर्णमासिकं विधानं प्रवृत्तं तत्रामावास्यायां विशेष उच्यते, अमावास्यायामिति दर्शमपचरन्ति अमावास्यायामिष्टौ दोहनपवित्रेऽधिकरणे मार्जयेरन् आपोहिष्ठीयाभिर्ऋग्भिः अभ्युक्षेरन् मार्जनमभ्युक्षणम् ॥ ७ ॥

तदभावे दार्भं* ॥ ८ ॥

तस्याभावस्तदभावः तस्य दोहनपवित्रस्याभावे दार्भे दर्भमये पवित्रेऽधिकरणे मार्जयेरन् यस्य साम्नाय्यं न पवित्र† तस्य दोहनपवित्रं नास्ति ॥ ८ ॥

---

* द्राह्यायणोऽप्येवम् ।

† प्रवृत्तमिति पुस्तकान्तरे समीचीनः पाठः

सर्वेष्टिष्विति शाण्डिल्यायनः* ॥ ९ ॥

सर्वेष्टिष्वेव मार्जनं शाण्डिल्यायन आचार्यो मन्यते न केवलममावास्यायामिति ॥ ९ ॥

प्राशित्रमाह्रियमाणं प्रतिमन्त्रयेत मित्रस्य त्वा चक्षुषा प्रतिपश्यामीति* ॥ १० ॥

प्राश्नन्ति तदिति प्राशित्रं तत्प्राशित्रमाह्रियमाणं प्रतिमन्त्रयेत ब्रह्मा मित्रस्य चक्षुषा प्रतिपश्यामीत्यनेन यजुषा ॥ १० ॥

अप आचम्य प्रतिगृह्णीयाद्देवस्य त्वेति* ॥ ११ ॥

अप आचम्येति कृत्स्नमाचमनविधिं दर्शयति अप आचम्य तत् प्रतिगृह्णीयात् प्राशित्र देवस्य त्वेति प्रतिगृह्णन्मन्त्रं पुरस्ताज्जपेत् ॥ ११ ॥

व्यूह्य तृणानि पुरस्ताद्दण्डं सादयेत् पृथिव्यास्त्वा नाभौ सादयामीति* ॥ १२ ॥

बर्हिषस्तृतस्य इतश्चेतश्च व्यूह्य तृणानि पुरस्ताद्दण्डं सादयेत्

---

* द्राह्यायणेऽप्येवम्।

तत् प्राशित्रहरणं पात्रं भूमौ स्थापयेत् पृथिव्यास्त्वा नाभौ सादयामीत्यनेन मन्त्रेण ॥ १२ ॥

अङ्गुष्ठेनानामिकया चादायाग्नेष्ट्वास्येन प्राश्नामीति प्राश्नीयादसंखादन्निगिरेत्* ॥ १३ ॥

अङ्गुष्ठेन अनामिकया वाङ्गुल्या आदाय गृहीत्वा अग्नेष्ट्वास्येन प्राश्नामीत्यनेन मन्त्रेण प्राश्नीयात् असंखादन्दन्तैरभिमर्द्दन्निगिरेत् ॥ १३ ॥

अप आचम्योरसि पाणिं निदधीतेन्द्रस्य त्वा जठरे सादयामीति ॥ १४ ॥

अप आचम्योरसि पाणिं स्थापयेत् इन्द्रस्य त्वा जठरे सादयामीत्यनेन मन्त्रेण ॥ १४ ॥

प्रक्षाल्य प्राशित्रहरणं तत्र निदध्यात्† ॥ १५ ॥

प्रक्षाल्य प्राशित्रहरणं यस्मिन्नेव देशे प्रथमं प्रति व्यूह्य तृणानि स्थापितं तस्मिन्नेव देशे निदध्यात् स्थापयेत् ॥ १५ ॥

---

* द्राह्यायणेनैतेन सूत्रद्वयं कृतम्।

† द्राह्यायणोऽप्येवम्।

यथाहृतं वा प्रतिहारयेत्* ॥ १६ ॥

येनैव वा यथा वाहृतन्तेनैव पुनराहारयेत् ॥ १६ ॥

ब्रह्मभागमाहृतं तत्रोपनिदधीत* ॥ १७ ॥

यदि तस्मिन् देशे स्थापितं ततो ब्रह्मभागमाहृतं तत्रोपनिदधीत ॥ १७ ॥

तमिष्टौ सꣳस्थितायां प्राश्नीयात्* ॥ १८ ॥

तं ब्रह्मभागं इष्टौ संस्थितायां प्राश्नीयात् तमिष्टयजुष ऊर्द्ध्वम् ॥ १८ ॥

अन्वाहार्य्यमाहृतं तूष्णीमालभेत* ॥ १९ ॥

दर्शपौर्णमासवत् अन्वाहार्यं दक्षिणा तमाहृतं ब्रह्मा तूष्णीमालभेत ॥ १९ ॥

प्रजापतेर्भागोऽसीति वा* ॥ २० ॥

ब्रह्मा आलभेतेति प्रकृतम् ॥ २० ॥

अथापरं प्रजापतेर्भागोऽस्यूर्जस्वान्पयस्वानक्षितोऽस्यक्षित्यै

---

* द्राह्यायणोऽप्येवम् ।

त्वा प्राणापानौ मे पाहि समानव्यानौ मे पाह्युदानरूपे मे पाह्यूर्गस्यूर्जं मयि धेहीति* ॥ २१ ॥

अथापरमन्वारम्भणम् । इदमन्यदिदमपरं, प्रजापतेर्भागोऽसीत्येतदादिना यथासूत्रितेन मन्त्रेण एतेषां त्रयाणां विकल्पः ॥ २१ ॥

तत्रैव यजमानं वाचयेत् प्रजापतिं त्वया समक्षादध्यासमागम्या अन्वाहार्य्यं ददानि ब्रह्मन् ब्रह्मासि ब्रह्मणे त्वा ऋतादध्या मा मा हिꣳसीरऋतो मह्यꣳ शिवा भवेति* ।२२।

तस्मिन्नन्वाहार्य्येऽधिकरणे यजमानं वाचयेत् प्रजापतिं त्वया समक्षादध्यासमित्येतदादि मन्त्रम् ॥ २२ ॥

इति चतुर्थस्यैकादशी कण्डिका ।

अथ द्वादशी कण्डिका ।

समिधं प्रस्थानीयामनुमन्त्रयेत देव सवितरेतत्ते यज्ञं प्राहुर्बृहस्पतये ब्रह्मणे तेन यज्ञमव तेन यज्ञपतिं तेन मामव मनो जूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमिमं तनोत्वरिष्टं

---

* द्राह्यायणेऽप्येवम्

यज्ञꣳ समिमं दधातु विश्वे देवा स इह मादयन्तामित्युपाꣳशु प्रतिष्ठेत्युच्चैः* ॥१॥

प्रतिष्ठन्त्यनयेति प्रस्थानीया ब्रह्मन् प्रस्थास्यामीति तां समिधं प्रस्थानीयामनुमन्त्रयेत देव सवितरित्येतदादिना यथासूत्रितेन मन्त्रेण उपांशु प्रतिष्ठेत्युच्चैर्ब्रूयात् भूर्भुवःस्वर्बृहस्पतिर्ब्रह्माहं मानुष इत्युपांश्वोमित्युच्चैः भूर्भुवःस्वरित्येतदादि यजुरुपांशूद्गातुमित्युच्चैः ब्रूयात् एष उपरिष्टाज्जपः ॥ १ ॥

सर्वानुमन्त्रणेन वा* ॥ २ ॥

समिधं प्रस्थानीयामनुमन्त्रयेत तत्सर्वेषां कर्मणामनुमन्त्रणं सवितृप्रसूतः प्रतिष्ठ भूर्भुवःस्वरित्येतदादिना उपरिष्टाज्जपः ॥ २ ॥

विमुक्तासु प्रणीतासु समिध आदध्यात् यथावभृथादुदेत्य* ॥ ३ ॥

प्रणीताविमोचने कृते आहवनीये तिस्रः समिध आदध्यात् यथावभृथादुदेत्य समिदाधानमुक्तम् एधोस्येऽधिषीमहीत्यत आरभ्य यावदाहवनीयोपस्थानमिति ॥ ३ ॥

एतत्सर्वेष्टीनां ब्रह्मत्वम्* ॥ ४ ॥

---

* द्राह्यायणोऽप्येवम् ।

यदेतदुक्तमिष्ट्यादिषु सर्वेषु यजुषोपविशेदित्यत आरभ्य दर्शपौर्णमासिकविधानम् एतत्सर्वेष्टीनां ब्रह्मत्वं यथेष्टीनामिति बहुवचनात् सिद्धेः सर्वेष्टिषु किमर्थं सर्व्वेष्टीनामिति सर्वग्रहणम् उच्यते हविर्यज्ञाधिकारः प्रवृत्तः सोऽयमाचार्य्यः सर्वशब्दं करोति कथं सोमाङ्गभूतानामपीष्टीनामेतदेव ब्रह्मत्वं स्यादिति ॥ ४ ॥

समानाह्न्येकासने न पुनर्यजुषोपविशेदिति शाण्डिल्यः* ॥ ५ ॥

एकस्मिन्नहनि यद्येकहविष्का बह्व्य इष्टयो भवन्ति तस्मिन्नेकासने न पुनर्यजुषोपविशेत् एवं शाण्डिल्य आचार्य्यो मन्यते एकासनमिति यत्प्रथमायामिष्टौ आसनं कल्पितं तदेवोत्तरासु भवति पृथगेकासनम् अथ पुनः पृथगिष्टिष्वासनं कल्प्यते न तदेकासनम् ॥ ५ ॥

अग्न्याधेयेष्विष्टिषु प्रथमायां यजुषोपविशेत उत्तमायाꣳ समिध आदध्यादिति गौतमः* ॥ ६ ॥

एवं गौतम आचार्य्यो मन्यते ॥ ६ ॥

पृथगिष्टिष्विति धानञ्जप्यः* ॥ ७ ॥

पृथगेकस्यामेकस्यां यजुषोपविशेत् समिधश्चादध्यात् एवं धानञ्जप्य आचार्य्य आह ॥ ७ ॥

---

* शाण्डायनोऽप्येवम् ।

चातुष्प्राश्यञ्च प्राश्नत्सु धेनुं दद्याद् ब्रह्मणेऽध्वर्यवे चाग्निपदं धेनूर्होत्रे वत्सतरी ब्रह्मणेऽनडुहोऽध्वर्यवे तथोद्गात्रे सर्वे त्रिवर्गाः पष्ठौहीमग्नीध्राय सर्वेभ्योऽश्वरथं कुण्डले चेति* ॥ ८ ॥

चातुष्प्राश्यञ्च प्राश्नत्सु धेनुं दद्याद्ब्रह्मणे चशब्दो धानञ्जय्यमतानुकर्षणार्थः अध्वर्यवे चाग्निपदं दद्यात् अग्निपदोऽश्वः धेनूर्होत्रे दद्याद्वत्सतरी ब्रह्मणे दद्यात् अनडुहोऽध्वर्यवे दद्यात् तथोद्गात्रे अनडुहो दद्यात् सर्वे त्रिवर्गाः यदेतद्धेनूर्होत्रे दद्यात् इत्यत आरभ्य बहुवचनम् तस्मिन् परिमाणं सर्वे त्रिवर्गा इति सर्वग्रहणं किमर्थमिति चेत् अत्रोच्यते अन्यत्राप्येवंप्रकारस्त्रिवर्गा इति यथा विश्वजिच्छिल्पे वक्ष्यति धेनूरिति पष्ठौहीमाग्नीध्राय दद्यात् पष्ठौहीशब्दो वयोम सर्वेभ्योऽश्वरथं कुण्डले च दद्यात् यजमानः कर्णयोराभरणं लोकप्रसिद्धः ॥ ८ ॥

एवमेव धेनुमग्निपदञ्चेति शाण्डिल्यः † ॥ ९ ॥

यदुक्तं धेनुं दद्याद्ब्रह्मणेऽध्वर्यवे चाग्निपदमिति एतद्धेनुमग्निपदं वा ‡

---

* द्राह्यायणेनैतेन पञ्च सूत्राणि कृतानि ।

† द्राह्यायणोऽप्येवम् ।

‡ यदुक्तं सर्वेभ्योऽश्वरथं कुण्डले चेति एवं धेनुमग्निपदञ्च सर्वेभ्यो दद्यात् इति पुस्तकान्तरपाठः ।

सर्वेभ्य एव दद्यात् तयोर्दक्षिणान्तरविधानात् एवं शाण्डिल्य आचार्य्यो मन्यते ॥ ९ ॥

धेनुमनड्वाहं वत्सतरीं वत्सतरमजं पूर्णपात्रं तत्प्रथमायामिष्टौ दद्यात्* ॥ १० ॥

यदेतद्धेन्वाद्युक्तं एतत्प्रथमायामिष्टौ दद्यात् ॥ १० ॥

तथोत्तरयोरन्यत्राजपूर्णपात्राभ्यामिति* ॥ ११ ॥

तथोत्तरयोरिष्ट्योः प्रथमायामिष्टौ यदुक्तं दक्षिणाजाति उत्तरयोरपीष्ट्योः एवंप्रकारमेव दद्यात् अन्यत्राजपूर्णपात्राभ्यामिति ॥ ११ ॥

वरः सप्तमो दक्षिणानां त्रयोदशो वा पञ्चविंशो वैतद्वाजसनेयकम* ॥ १२ ॥

षड्गावो दक्षिणाः तासां सप्तमो वरः स्यात् त्रयोदशो वा अथवा द्वादश गावः त्रयोदशो वरः स्यात् पञ्चविंशो वा अथवा चतुर्विंश गावः वरः पञ्चविंशः एतद्वाजसनेयकं विधानमग्न्याधेये दक्षिणानां वरः प्रख्यातः ॥ १२ ॥

अग्न्याधेयान्तान् कुर्वते पूर्णाहुतिमन्त्राभिहोममिष्टीरिति* ॥ १३ ॥

---

* द्राह्यायणेऽप्येवम्।

अग्न्याधेयस्य अन्तान् कुर्वते अध्वर्यवे पूर्णाहुत्यादि केषाञ्चित् पूर्णाहुत्यन्तं केषाञ्चिदग्निहोमान्तं केषाञ्चिदिष्ट्यन्तम् ॥ १३ ॥

मिथुनौ दक्षिणान्वारम्भणीयायामिष्टौ* ॥ १४ ॥

मिथुनौ गावौ दक्षिणा स्त्रीपुमांसौ गौरेव ॥ १४ ॥

वाजिनाश्विनघर्माणामृत्विगुपहवमिष्ट्वा प्राणभक्षं भक्षयेत् प्रत्यक्षभक्षꣳ स्वे यज्ञे† ॥ १५ ॥

अग्न्याधेये दर्शपूर्णमासयोश्च ब्रह्मत्वमुक्तं साम्प्रतं चातुर्मास्येषु विवक्षितं तद्विवक्षुरिदं सूत्रमारभते वाजिनाश्विनघर्माणामिति वाजिनस्य आश्विनस्य घर्मस्य वाजिनाश्विनघर्माः तेषां वाजिनाश्विनघर्माणां ऋत्विगुपहवमिष्ट्वा प्राणभक्षं भक्षयेत् प्रत्यक्षभक्षं भक्षयेत् मुखेन स्वे तु यज्ञे प्रत्यक्षभक्षं भक्षयेत् स्वे यज्ञे इति सत्रे वाजिनश्चातुर्मास्येषु आश्विनः सौत्रामण्यां घर्मः सोमे अत्र तु लाघवार्थमाचार्य्यो वाजिनप्रकरणे सामान्यविधानमारभते सर्वेषां किं पुनः सामान्यम् ऋत्विगूपहवमिष्ट्वा प्राणभक्षं भक्षयेत् प्रत्यक्षभक्षं स्वे यज्ञे इति तत्रैवाश्विनघर्मयोः स्वस्मिन् प्रकरणे भक्षणमन्त्रौ वक्ष्यति साम्प्रतं वाजिनस्यैवोच्यते ॥ १५ ॥

यन्मे रेतः प्रसिच्यते यद्वामेऽपि गच्छति यद्वा जायते

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

पुनस्तेन माग्निवमाविश तेन मा वाजिनं कुरु तस्य ते वाजपीतस्योपहूत उपहूतस्य भक्षयामीति वाजिनस्य* ॥ १६ ॥

यन्मे रेतः प्रमिच्यत इत्येतदादिना मन्त्रेण यथापठितेन वाजिनस्य भक्षणं कार्य्यम् ॥ १६ ॥

ऋतूनान्त्वा वाक्षिना वाजिनं भक्षयामीति वा* ॥ १७ ॥

अनेन वा मन्त्रेण भक्षयेत् ॥ १७ ॥

उभाभ्यां वोभाभ्यां वा* ॥ १८ ॥

उभाभ्यां वा मन्त्राभ्यां भक्षयेदिति शेषः ॥ १८ ॥

---

* द्राह्यायणोऽप्येवम् ।

इति चतुर्थस्य द्वादशी कण्डिका ।

इति चतुर्थः प्रपाठकः समाप्तः ।

पञ्चमः प्रपाठकः ।

अथ प्रथमा कण्डिका ।

चातुर्मास्येषु वरुणप्रघासानाꣳ स्तम्बयजुर्हरिष्यत्सु यजुषोपविशेत्* ॥ १ ॥

चातुर्मास्यान्यधिकृतानि वाजिनाधिकारात् चातुर्मासिके प्रथमे पर्वणि वाजिनं भवति तस्य भक्षणविधानमुक्तम् अन्यदैष्टिकं सामान्य विधानं सिद्धं वैश्वदेवे साम्प्रतं वरुणप्रघासिकं ब्रह्मत्वमुच्यते चातुर्मास्येष्वित्येवमादि चतुर्षु चतुर्षु मासेषु पर्वाणि क्रियन्त इति चातुर्मास्यानि चातुर्मास्येष्वित्यधिकारसप्तमी वरुणप्रघासानां वरुणप्रघासा इति पर्व्वण संज्ञा सांव्यवहारिकी वक्ष्यति वरुणप्रघासैर्व्याख्यातं ब्रह्मत्वं हविर्यज्ञेष्विति वरुणप्रसाघानामिति सम्बन्धलक्षणा षष्ठी स्तम्बयजुर्हरिष्यत्सु स्तम्बयजुरिति कर्मणः संज्ञा तदुक्तं दर्शपूर्णमास प्रकरणएव वेदेः पांशूनुत्कीर्य्य उत्करमुत्किरतीति यजुषोपविशेदिति प्रागुक्तमेव, ननु चातुर्मास्यग्रहणं किमर्थं क्रियते वैश्वदेविकं विधानमुक्तं वाजिनस्य भक्षयेदिति. ननु चातुर्मास्येभ्योऽन्यच वरुणप्रघासानां प्रयोगोऽस्ति तदेवं सिद्धेः चातुर्मास्यत्वे किं पुनश्चातुर्मास्यग्रहणम् क्रियते इति उच्यते, संवत्सरप्रभृतीनि चातुर्मास्यानि

---

* शाट्यायनोऽप्येवम् ।

चतुर्षु चतुर्षु मासेषु पर्वाणि क्रियन्त इत्युक्तं तेषाञ्च बहवो विकल्पा दृष्टाः सद्य आदि पञ्चाहःकृतानि पञ्च पञ्च सांवत्सरिकाणीति सोऽयमाचार्य्यः चातुर्मास्यशब्दं करोति चातुर्मास्येष्वप्येतेष्वेषविधिः स्यादिति ॥ १ ॥

विलिखिते चात्वालेऽध्वर्युणा सह प्रत्याव्रज्याहवनीय उपविशेत्* ॥ २ ॥

दक्षिणे प्रदेशे वेदेराहवनीयमुखमभिमुखम् उपविशेत् योऽध्वर्य्योः स एव सञ्चरः एतदौपवसथिकं कर्म ॥ २ ॥

अग्नौ प्रणीयमाणौ यथेतमनुगच्छेत्* ॥ ३ ॥

अपरेद्युरग्निप्रणयनं तत्र द्वावग्नी अति प्रणयन्ति तावग्नी प्रणीयमानौ यथागतमनुगच्छेत् अनुगच्छेदिति प्रणयनमार्गेणैवानुगमनं प्राप्तं तन्माभूदित्यत आह यथेतमिति दक्षिणेनैव देशेन वेद्यारमगच्छेत् ॥ ३ ॥

अध्वर्युश्चेद् ब्रूयाद् ब्रह्मन्नेकस्फ्ययोपसम्भिन्धीति स्फ्येनाहवनीयात् पांशूननुपहत्योत्तरस्या वेदेर्द्दक्षिणादन्तात् कर्षन्नियादावेदि* ॥ ४ ॥

यद्येतस्मिन् काले अध्वर्युः ब्रूयाद् ब्रह्मन्नेकस्फ्ययापसम्भिन्धीति

---

* द्राह्यायणेऽप्येवम् ।

स्फ्येनाहवनीयात्पांशून् प्रक्षिप्य योत्तरा वेदिः तस्या दक्षिणादन्तात्कर्षन्नियादावेदि यावदैष्टिकी वेदिरिति एवमसम्भेदनं कृतं भवतीति कृष विलेखने ॥ ४ ॥

मध्यादेका चेत्* ॥ ५ ॥

यद्येका वेदिर्भवति तस्या मध्यात्कर्षन्नियात् यावदैष्टिकी वेदिरिति ॥ ५ ॥

प्रोक्ष्य स्फ्यं पश्चिमेन वेदी गत्वा निधीयमानयोरग्न्योस्तूष्णीमुपविशेत् † ॥ ६ ॥

प्रोक्ष्य स्फ्यं यस्माद्देशात् गृहीतः तस्मिन्नेव स्थापयित्वा पश्चिमेन वेद्योर्गत्वा एनया द्वितीयया अग्न्योर्निधीयमानयोर्निधानकालमेव तूष्णीमुपविशेत् तूष्णीमित्यस्य प्रकारउक्तः ॥ ६ ॥

एतत् कर्माग्निप्रणयनेषु सर्वेषु † ॥ ७ ॥

यदेतद्कर्माग्निप्रणयनं कर्म्म एतत्सर्वेष्वग्निप्रणयन एष स्यात् न केवलं वरुणप्रघासेषु ननु सर्वग्रहणं किमर्थमग्निप्रणयनेष्विति बहुवचनात् सिद्धमेतदुच्यते हविर्यज्ञाधिकारो वर्त्तते अतः सर्वग्रहणं कृतं कथं अन्येष्वप्यग्निप्रणयनेषु सोमाङ्गभूतेषु एतत्कर्म्म स्यादिति ॥ ७ ॥

---

* द्राह्यायणे वेदविषये विशेषोऽस्ति ।

† द्राह्यायणेऽप्येवम्

अवभृथन्यङ्गं गच्छत्सु पूर्वेणाग्नी चात्वालञ्च गच्छेत् पश्चिमेन वेदी चालात्वञ्च स्वे यज्ञे हविर्यज्ञेष्वेष सञ्चर उत्तरेण विहारं कर्मभ्यः* ॥ ८ ॥

अवभृथन्यङ्गं गच्छत्सु अवभृथएवावभृथन्यङ्गः अथवा अवभृथैकदेशः अन्तस्थोऽवभृथः तत्र तमवभृथन्यङ्गं गच्छत्सु सहकर्तृषु पूर्वेणाग्नी चात्वालञ्च गच्छेत् अग्न्योश्चात्वालस्य च पूर्वेण प्रदेशेन गच्छेत् पश्चिमेन वेद्योश्चात्वालस्य च गच्छेत् स्वे यज्ञे कौण्डपायिने विषयः हविर्यज्ञेष्वेष सञ्चरः उत्तरे प्रदेशे विहारस्य यानि कर्माणि यथा इडाप्राशनमुत्तरेण दक्षिणा प्रतिग्रहः केषाञ्चित्, अथ हविर्यज्ञग्रहणं किमर्थं सिद्धम् एष सञ्चर उत्तरेण विहारं कर्मभ्य इति यावता वक्ष्यति वरुणप्रघासैर्व्याख्यातं ब्रह्मत्वं हविर्यज्ञेष्विति उच्यते एते हविर्यज्ञाः कौण्डपायिनेऽपि भवन्ति सोऽयमाचार्यो हविर्यज्ञेष्वित्याह कथं कौण्डपायिने दीक्षितसञ्चर एवेति ॥ ८ ॥

यथा चात्वाले तथा यूपे शामित्रे च पशौ† ॥ ९ ॥

एतानि चातुर्मास्यपर्वाणि पशुमन्त्यपि भवन्ति तद्यदा वरुणप्रघासेषु पशुः स्यात् तदा यथा चात्वालस्य पूर्वेण सञ्चरः तथा यूपस्य च शामित्रस्य च स्यात् अथ पशुग्रहणं किमर्थमिति चेत्

---

* द्राह्यायणेनैतेन सूत्रत्रयं कृतम्।

† द्राह्यायणोऽप्येवम्।

नश्यते पशोर्यूपशामित्रौ भवतः तस्मात्पशुग्रहणमतिरिच्यते उच्यते पशुग्रहणमेतदर्थं न केवलं वरुणप्रघासेषु सर्वेषु पर्वस्विति ॥ ९ ॥

अवभृथन्यङ्गं प्राप्याभ्युक्षणप्रभृति सौत्यं कर्म समापयेयः * ॥ १० ॥

उक्तमवभृथन्यङ्गं गच्छन्तु, साम्प्रतं तस्मिन्नवभृथन्यङ्गे कर्मोच्यते अवभृथन्यङ्गं प्राप्याध्वर्यवे कर्मणि समाप्ते सौत्यादभ्युक्षणादारभ्य समिदाधानाहवनीयोपस्थानान्तं कर्म सर्वं कुर्युः अथ किं कर्मग्रहणम् अभ्युक्षणप्रभृति सौत्यं कर्म समापयेयुरिति सिद्धेः उच्यते, कर्मग्रहणं नियमार्थं वक्ष्यत्यग्निहोत्रोपस्थानं विष्णुक्रमाः समिष्टयजूंषीति न क्रियेरन्नवभृथन्यङ्गश्चेति शाण्डिल्य इति एतद्दर्शयति सूत्रकारो धानञ्जप्यपक्षोऽत्रेष्ट इति सर्वं क्रियतेति धानञ्जप्य इति ॥ १० ॥

साकमेधेषु क्षीरौदनस्य यथार्थं प्राश्नीयात् * ॥ ११ ॥

उक्तं वरुणप्रघासेषु ब्रह्मत्वं साम्प्रतं साकमेधेषूच्यते साकमेधा नाम तृतीयं पर्व साकमेधेष्वित्यधिकरणलक्षणा सप्तमी क्षीरेण संस्कृत ओदनः क्षीरौदनः तस्य यथार्थं प्राश्नीयात् यावतार्थी स्यात् तावत्प्राश्नीयात् परिमाणे अनियमः यदि सौहित्येच्छुः सौहित्यं कुर्यात् एतद्गृहमेधीये कर्मणि भवति पूर्वेद्युः ॥ २१ ॥

---

* द्राह्यायणेऽप्येवम् ।

यजमानं ब्रूयात् प्रभूतमन्नं कारय सुहिता अलङ्कृता भवतेत्यमात्यान् ब्रूहि वत्सांश्च मातृभिः सह वासयेत* ॥ १२ ॥

यजमानं ब्रूयाद्ब्रह्मा प्रभूतमन्नं कारय प्रभूतं बहु सुहिताश्चालङ्कृताश्च भवतेति अमात्यान् ब्रूहि सुहितास्तृप्ता आश्रिता भवत अलङ्कृताश्च गन्धमाल्यादिभिरलङ्कारैर्भूषयध्वमात्मानम् अमात्याः पुत्रपौत्रादयः भृत्याश्च वत्सांश्च मातृभिः सह वासयेतेत्येव यजमानो वक्तव्यो ब्रह्मणा ॥ १२ ॥

पूर्वाह्णेऽध्वर्युः क्षीरौदनमृषभस्य रवथे जुहोति ब्रह्माणमुपवेश्य* ॥ १३ ॥

अस्मिन्नहनि पूर्वाह्णेऽध्वर्युः क्षीरौदनमृषभस्य रवथे जुहोति रवथशब्दो रभसि वर्त्तते क्षीरौदनमग्नौ जुहोति ब्रह्माणं तस्याग्नेः समीपे उपवेश्य ननु उक्तं सर्वत्र ब्रह्मेति अधिकृत एव ब्रह्मा तत् किमिदमुच्यते ब्रह्माणमुपवेश्य जुहोतीति उच्यते अरुवत्यृषभे ब्रह्मैव ऋषभतां कुर्य्यात् अतः पुनर्ग्रहणम् ॥ १३ ॥

ऋषभेऽरुवति ब्रह्मैव ब्रूयाज्जुहुधीति* ॥ १४ ॥

अरुवति च रुवति च ब्रह्मा ब्रूयाज्जुहुधीति ॥ १४ ॥

---

* द्राह्यायणेऽप्येवम् ।

तूष्णीं पैतृयज्ञिकायाᳫं सर्वं कुर्य्यादोमित्येवानुमन्त्रयेत्* ॥ १५ ॥

पैतृयज्ञिकायामिष्टौ तूष्णीं सर्वं ब्रह्मा कुर्य्यात् ओमित्येवानुमन्त्रयेत् ओमिति प्रणवमात्रं स्यात् अनुमन्त्रणम् ॥ १५ ॥

इति पञ्चमस्य प्रथमा कण्डिका ।

अथ द्वितीया कण्डिका ।

यज्ञोपवीतप्राचीनावीतयोरध्वर्य्युमनु विदधीत † ॥ १ ॥

पैतृयज्ञिकायामिष्टौ कानिचित्कर्माण्यध्वर्य्युर्यज्ञोपवीती करोति कानिचित्प्राचीनावीती तद्यत्राध्वर्य्युर्यज्ञोपवीती स्यात् तत्र ब्रह्मापि यज्ञोपवीती भवेत् यत्र प्राचीनावीती स्याद् ब्रह्मापि तथैव स्यात् यज्ञोपवीतप्राचीनावीतयोरध्वर्य्युप्रत्ययः ॥ १ ॥

तस्या हवीᳫंषि निर्वप्स्यत्सु दक्षिणया द्वारा प्रपद्य पश्चात् प्राङ्मुख उपविशेत् † ॥ २ ॥

तस्या पैतृयज्ञिकायाः हविषान्निर्वपनं करिष्यत्सु वेदेः पश्चिमे प्रदेशे प्राङ्मुख उपविशेत् निर्वप्स्यत्स्वित्यतन्त्रं बहुवचनम् ॥ २ ॥

---

* द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

† द्राह्यायणोऽप्येवम् ।

एवमेव वेदिं गत्वा स्तम्बयजुर्हरिष्यतस्तु* ॥ ३ ॥

एवमेव यथा निर्वप्स्यतस्तु उपविष्टः तथा वेदिं गत्वा पैतृयज्ञिकार्यं स्तम्बयजुः तत् हरिष्यतस्तु तस्याः पश्चिमे प्रदेशे प्राङ्मुख उपविशेदित्येतदुक्तं भवति ॥ ३ ॥

आज्यभागयोर्हुतयोर्दक्षिणेनाग्निं गत्वा पुरस्तात् प्रत्यङ्मुख उपविशेद्यजमानश्च* ॥४ ॥

आज्यभागयोर्हुतयोरग्नेर्दक्षिणेन प्रदेशेन गत्वा वेदेः पूर्वप्रदेशे प्रत्यङ्मुख उपविशेत् यजमानश्च प्रत्यङ्मुख एव उपविशेत् ॥ ४ ॥

हुते स्विष्टकृते यथेतं प्रत्याव्रज्योपविशेताम्* ॥ ५ ॥

हुते स्विष्टकृते यथागतं प्रत्याव्रज्य तस्मिन्नेव वेदेः पश्चिमे प्रदेशे उभौ ब्रह्मयजमानौ उपविशेताम् ॥ ५ ॥

प्राशित्रमाहृतमुपघ्रायापविध्येत्* ॥ ६ ॥

प्राशित्रमाहृतमुपघ्रायापविध्येत् स्थापयेत् ततः प्राश्नीयात् ॥ ६ ॥

आज्यञ्चेत् प्राशित्रभागादवद्येयुस्तदुपघ्रायाप उपस्पृशेत्* ॥ ७ ॥

---

* द्राह्यायणेऽप्येवम् ।

यद्याज्यं प्राशित्रं प्रतिनिधिमवद्येयुः तदाज्यमुपघ्रायाप उपस्पृशेत् ॥ ७ ॥

इडाञ्च प्रतिगृह्य प्रतिप्रयच्छेत* ॥ ८ ॥

इडान्दीयमानां प्रतिगृह्य प्रति प्रयच्छेत् तस्मा एव ॥ ८ ॥

परिषिक्तेऽध्वर्युणाहवनीयमुपतिष्ठेरन् दक्षिणेनाग्निं गत्वोऽत्तरेण दक्षिणाग्निँ स्वे यज्ञे † ॥ ९ ॥

अध्वर्युणा परिषेचने कृते आहवनीयमुपतिष्ठेरन् सर्वे यस्मिन्नग्नौ कर्म प्रवृत्तं तस्य दक्षिणेन गत्वा दक्षिणाग्नेरुत्तरेण गत्वा स्वे यज्ञे कौण्डपायिने ॥ ९ ॥

अक्षन्नमीमदन्त हीति प्रथमासु सदृशं त्वा वयं मघवन्मन्दिषीमहि प्रनूनं पूर्णवन्धुरः स्तुतो यासि वशाँ अनु योजान्विन्द्र ते हरी इति द्वितीयोपोषु शृणुहीगिर इति तृतीया* ॥ १० ॥

एताभिर्यथोद्दिष्टाभिर्ऋग्भिः आहवनीयमुपतिष्ठेरन् उक्तं ऋचस्वादिग्रहणेनेति ॥ १० ॥

तत एवेक्षमाणा गार्हपत्यं मनोन्वाह्वामहे नाराशँ-

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणे विशेषोऽस्ति ।

सेन सोमेन पितॄणाञ्च मन्मभिः पुनर्नः पितरो मनो ददातु दैवो जनो जीवं व्रातꣳ सचेमह्या न एतु मनः पुनः क्रत्वे दक्षाय जीवसे ज्योक्च सूर्यं दृशे यमिति* ॥ ११ ॥

तस्मिन्नेव देशेऽवस्थिता गार्हपत्यमीक्षमाणा उपतिष्ठेरन् मनोन्वाह्वामह इत्येतदादिभिर्ऋग्भिर्यथासूचिताभिः ॥ ११ ॥

कयानश्चित्र आभुवदित्येकया दक्षिणाग्निम्* ॥ १२ ॥

कयानश्चित्र आभुवदित्येकयर्चा दक्षिणाग्निमुपतिष्ठेरन् तत एवेक्षमाणा इति प्रकृतं नन्वेकयेति किमर्थम् एकैवादिष्टा उच्यते, तिसृभिस्तिसृभिराहवनीयगार्हपत्ययोरुपस्थानं कृतं तदिहापि वचनेनावगम्यते प्रवृत्तत्वात् तथा माभूदित्याहैकयेति ॥ १२ ॥

इति पञ्चमस्य द्वितीया कण्डिका।

अथ तृतीया कण्डिका।

त्रैयम्बका नामापूपा भवन्त्येककपालाः † ॥ १ ॥

त्र्यम्बको देवता येषान्ते इमे त्रैयम्बका नामापूपा भवन्ति अपूपा इति द्रव्यसंज्ञा एकस्मिन् कपाले संस्कृता एककपालाः ॥ १ ॥

---

* शाङ्खायनोऽप्येवम्।

† शाङ्खायनेन सूत्रद्वयमेकसूत्रं कृतम्।

तेषां यमध्वर्युराखूत्कर उपोपेत् तत्राप उपस्पृशेयुः शिवा नः शन्त मा भव सुमृडीका सरस्वति मा ते व्योम सन्दृश इति* ॥ २ ॥

तेषामपूपानां यमध्वर्युराखूत्कर उपोपेत् आखुर्मूषिकः उत्कीर्य्यत इत्युत्करः उद्वापः मूषिकोद्वापे उपवपेत् तस्मिंस्तस्य पांशुभिरवच्छादयेत् तस्मिन्नधिकरणे अप उपस्पृशेयुः शिवा नः शन्त मा भवेत्येतदादिना मन्त्रेण ॥ २ ॥

आसीतेतरेषाꣳ हूयमान इति धानञ्जप्यः† ॥ ३ ॥

इतरेषामपूपानामवयवेषु हूयमानेषु आसीतेत्येवं धानञ्जप्य आचार्य्यो मन्यते ॥ ३ ॥

तिष्ठेदिति शाण्डिल्यः† ॥ ४ ॥

तिष्ठेदिति स्थानं विधीयते नोर्द्धताम् ॥ ४ ॥

हुते तिष्ठन्तो जपेयुरवाम्बरुद्रमयक्ष्मह्यवदेवं त्र्यम्बक यथा नः श्रेयसस्करद्यथा नो वसीयसस्करद्यथा नः पशुमतस्करद्यथा नो व्यवसाययाद्भेषजमसि भेषजङ्गवेऽश्वाय पुरुषाय भेषजꣳ सुगं मेषाय मेष्यै सु भेषजं यथा सदिति† ॥ ५ ॥

---

* द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

† द्राह्यायणेऽप्येवम् ।

हुते तेषामपूपानां सर्वे तिष्ठन्तो जपेयुः अवां वरुद्रमित्येतदादि मन्त्रं यथापठितम् ॥ ५ ॥

यजमानस्यामात्या एकैकमपूपमादाय त्रिः प्रदक्षिणमग्निं परियुः* ॥ ६ ॥

यजमानस्य ये अमात्याः पुत्रपौत्रादयो भृत्याः एकैकमपूपं गृहीत्वा त्रिरग्निं परियुः प्रदक्षिणम् ॥ ६ ॥

तत्र ब्रह्मा परियञ्जपेदिति धानञ्जप्यस्तिष्ठन्निति शाण्डिल्यस्त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्द्धनमुर्वारुकमिव बन्धनान् मृत्योर्मुक्षीयमामृतादिति † ॥ ७ ॥

तत्र तस्मिन् कर्म्मणि ब्रह्मा परियञ्जपेदिति धानञ्जप्य आचार्य्यो मन्यते तिष्ठन्निति शाण्डिल्यः अमात्या अधिकृताः अतो ब्रह्माग्रहणं करोति त्र्यम्बकं यजामहे इत्येतदादि मन्त्रं जपेत् ब्रह्मा परियन् तिष्ठन्वा ॥ ७ ॥

एवं परीत्योदस्येयुः* ॥ ८ ॥

एवमनेन प्रकारेण परीत्य सर्वे येऽपूपा गृहीतास्तानुदस्येयुः ऊर्द्ध्वं क्षिपेयुः ॥ ८ ॥

---

*द्राह्यायणेऽप्येवम्।

† द्राह्यायणेनैतेन सूत्रत्रयं कृतम्।

तेषां ब्रह्मैकं लिप्सित्वा यस्य स स्यात्तस्मै प्रयच्छेत्* ॥ ९ ॥

तेषामपूपानां ब्रह्मा लिप्सित्वा लब्धुमिच्छा लिप्सा यस्य सकाशा लब्धः स्यात् तस्मा एव पुनर्दद्यात् ॥ ९ ॥

तस्य वैव सन्तं पाणावालभेत* ॥ १० ॥

तस्यैव वा पाणौ अवस्थितं तमपूपमालभेत ॥ १० ॥

तथैव प्रतिपरीयुः* ॥ ११ ॥

यथैव प्रदक्षिणं परिगमनं कृतं तथैव प्रसव्यं परीयुः तथैवेति त्रिरित्युक्तं भवति ॥ ११ ॥

यत्रैनानध्वर्युरासजेत्तत्रोपतिष्ठेरन्नेष ते रुद्र भागस्तेनावसेन परोमूजवतोतीहि कृत्तिवासाः पिनाकहस्तोऽवततधन्वोमित्यातमितोरुपेयुः† ॥ १२ ॥

यत्र यस्मिन् देशे एनानपूपान् कलापीकृत्वा वृक्षे वा स्थाणौ वाध्वर्य्युरासजेत् आबध्नीयात् तत्रोपस्थानं कुर्युः एष ते रुद्र भाग इत्येतदादिना मन्त्रेण यथासूचितेन मन्त्रान्ते यः ओङ्कारः तम् आतमितोरुपेयुः तावद्ब्रूयुर्यावन्नातमितः ॥ १२ ॥

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

शन्नो देवीरित्यप उपस्पृश्यानपेक्षं प्रत्याव्रजेयुः* ॥ १३ ॥

शन्नो देवीरित्येतयर्चा अपउपस्पृष्ट्वा येन पथा गताः तं पन्थानमनपेक्षं प्रत्याव्रजेयुः ॥ १२ ॥

वरुणप्रघासैर्व्याख्यातं ब्रह्मत्वं हविर्यज्ञेषु* ॥ १४ ॥

वरुणप्रघासैर्व्याख्यातम् उक्तं ब्रह्मत्वं हविर्यज्ञेषु यद्ब्रह्मत्वं हविर्यज्ञे कस्मिंश्चिन्नोच्यते तत् सर्वं वरुणप्रघासेषु सिद्धं द्रष्टव्यम् ॥१४ ॥

पशूनां यूपाहुतिं होष्यत्सु तूष्णीमुपविशेत्* ॥ १५ ॥

चातुर्मास्यानि समाप्तानि साम्प्रतं पाशुकं ब्रह्मत्वमुच्यते तत्र सर्वं वरुणप्रघासैः सिद्धं विशेष उच्यते, यूपाहुतिं होष्यत्सु होतुमिच्छत्सु तूष्णीमुपविशेत् ॥ १५ ॥

हुतायां यथार्थꣳ स्यात्* ॥ १६ ॥

हुतायां यूपाहुतौ यथार्थं स्यात् स्यादिति कर्मणः समाप्तिं दर्शयति ॥ १६ ॥

वपायाꣳ हुतायामिदमाप इति चात्वाले मार्जयित्वा सर्वपशूनां यथार्थꣳ स्यात्* ॥ १७ ॥

पशोर्वपायां हुतायामिदमाप इत्यनेन मन्त्रेण चात्वाले मार्ज-

---

* द्राह्यायणेऽप्येवम् ।

यित्वा सर्वपशूनां यथार्थं स्यात् सर्वग्रहणं क्रियते न केवलं पशौ सौत्रामण्यामपि तथा चातुर्मास्येषु सर्वेषु ॥ १७ ॥

इति पञ्चमस्य तृतीया कण्डिका ।

अथ चतुर्थी कण्डिका ।

पुरोडाशेन चरिष्यन्तस्तु तूष्णीमुपविशेत्* ॥ १ ॥

अनन्तरं पशुपुरोडाशः, पुरोडाशेनेति करणे तृतीया चरिष्यत्स्विति पुरोडाशेन कर्म चरिष्यत्सु तूष्णीमुपविशेत् ॥ १ ॥

आहृतं पुरोडाशमालभ्य ब्रूयात् प्राश्नन्तु ये प्राशिष्यन्त इति* ॥ २ ॥

यदि पुरोडाशमाहरेयुः प्राशनकाले तमालभ्य ब्रूयात् प्राश्नन्तु ये प्राशिष्यन्त इति येषां प्राशनं विहितं ते प्राश्नन्तु यथा होताध्वर्युर्ब्रह्माग्निः स्वामी चेति प्रकृतौ विहितमेतेषां प्राशनम् ॥ २ ॥

अनुव्रजेत् सर्वपशूनां पत्नीसंयाजानिति धानञ्जप्यः* ॥ ३ ॥

अनुव्रजेद् यस्मिन् देशे पत्नीसंयाजा हूयन्ते तं देशं व्रजन् सर्वपशूनां पत्नीसंयाजेषु ॥ ३ ॥

---

* द्राह्यायणोऽप्येवम् ।

सवनीयस्यैवेति गौतमः* ॥ ४ ॥

सवनीयस्यैव वशोर्व्रजेत् नान्येषां पशूनामित्येवं गौतम आचार्य्यो मन्यते ॥ ४ ॥

न सवनीयस्य च नेति शाण्डिल्यः* ॥ ५ ॥

सवनीयस्यापि नानुव्रजेदित्येवं शाण्डिल्य आचार्य्यो मन्यते न नान्यत्र प्रतिषेधः ॥ ५ ॥

हृदयशूलोऽत्रावभृथन्यङ्गस्थाने भवति तस्मिन्नप उपस्पृशेयुर्द्धाम्नो धाम्नो राजꣳस्ततो वरुण नोमुञ्च यदापो अघ्न्या वरुणोऽतिषयामहे ततो वरुण नोमुञ्च सुमित्रियान आप उषधयः सन्तु दुर्मित्रियास्तस्मै सन्तु योऽस्मान् द्वेष्टि यञ्च वयन्द्विष्म इति* ॥ ६ ॥

अस्मिन् हविर्यज्ञिके पशौ अवभृथन्यङ्गस्थाने हृदयशूलो भवति यस्मिन् शूले हृदयं प्रोत्य पच्यते स हृदयशूलः सोऽस्मिन्नधिकरणभूतः तस्मिन्नप उपस्पृशेयुः धाम्नो धाम्न इत्येतदादिना यथाम्नातेन मन्त्रेण ॥ ६ ॥

अभ्युक्षणप्रभृत्यत ऊर्द्धम्* ॥ ७ ॥

---

* शाट्यायनेऽप्येवम् ।

अभ्युक्षणादारभ्य अत ऊर्द्ध्वं सौत्यं कर्म्म स्यात् यावदाहवनीयोपस्थानमिति एवं सर्वस्मिन् प्रसक्त आह ॥ ७ ॥

नादित्यमुपतिष्ठेरन्* ॥ ८ ॥

ऋज्वर्थम् ॥ ८ ॥

पूर्णाहुतौ हूयमानायामासित्वा हुतायां यथार्थꣳ स्यात्* ॥ ९ ॥

समाप्ते पशौ पूर्णाहुतिं जुह्वत्यध्वर्यवः तस्यां हूयमानायामासित्वा हुतायां यथार्थं स्यादित्युक्तार्थम् ॥ ९ ॥

सक्तुहोमाꣳश्चेज्जुहुयुरासीना तेषाꣳ होमात्* ॥ १० ॥

यदि सक्तुहोमान् जुहुयुरध्वर्यवस्ततस्तत्रासीत आ तेषां होमात् ॥ १० ॥

सौत्रामण्याꣳ सुराकर्मस्वाव्राजमासीन्* ॥ ११ ॥

पशौ अह्नत्वमुक्तं साम्प्रतं सौत्रामण्यामुच्यते सौत्रामणीति हविर्यज्ञेषु षष्ठी संस्था तस्यां सौत्रामण्यां सुराकर्म्मसु क्रियमाणेषु आव्राजमासीत् आव्रज्याव्रज्य सुराकर्म्माणि अभिषवः ॥ ११ ॥

---

* द्राह्यायणेऽप्येवम्

तत्र द्वावग्नी अतिप्रणयन्ति ॥ १२ ॥

तस्यां सौत्रामण्यां द्वावग्नी अतिप्रणयन्ति* ॥ १२ ॥

तयोर्द्दक्षिणत आसीत्* ॥ १३ ॥

तयोरग्न्योर्द्दक्षिणे प्रदेशे आसीत् वरुणप्रघासेषु सिद्धमग्निप्रणयनं तत्किमिदं पुनरारभ्यत इति चेत् उच्यते तत्र युगपद्वयोरग्न्योः प्रणयनम् इह पुनरेकः प्रथमः प्रणीयते अपरः अन्यस्मिन् काले अतो वैलक्षण्यात् पुनरारभ्यते ॥ १३ ॥

दक्षिणमध्यधिकुम्भ्यामासक्तायाꣳ सुराशेषेष्वासिच्यमानेषूपतिष्ठेरन्यत्ते पवित्रमर्चिष्यग्ने विततमन्तरं ब्रह्म तेन पुनीहि मेति* ॥ १४ ॥

अतिप्रणीतयोरग्न्योर्यो दक्षिणः तस्योपरिष्टात् समीपे शतछिद्रायां कुम्भ्यामासक्तायां सुराशेषेष्वासिच्यमानेषु सुरायां हुतायां ये शेषाः तेष्वासिच्यमानेषु उपतिष्ठेरन् यत्ते पवित्रमर्चिषीत्येतदादिना मन्त्रेण यथासूचितेन उपर्य्यधस्ताच्च समीपे द्वे कुम्भ्यौ भवतः ॥ १४ ॥

अश्विनोर्यश्चस्य भक्षयेद्यमश्विना नमुचेरासुरादधि सरस्वत्यसुनोदिन्द्रियेणेमन्तꣳ शुक्रं मधुमन्तमिन्द्रꣳ सोमꣳ राजानमिह भक्षयामीति भक्षयेत्* ॥ १५ ॥

---

* द्राह्यायणेऽप्येवम्।

उक्तं वाजिनप्रकरणे ऋत्विक्षूपहवमिष्ट्वा प्राणभक्षं भक्षयेदिति तस्याश्विनग्रहणस्य भक्षयेत् यमश्विनेत्येतदादिना यथासूचितेन मन्त्रेण ॥ १५ ॥

यजमानञ्चेद्वसातिशेषेणाभिषिञ्चेयुरुपोत्थायान्तरेणाग्नी गत्वाध्वर्युणोक्तः संश्रानानि गायेत् पदाय पदाय स्तोभेत्* ॥ १६ ॥

यदि यजमानं वसातिशेषेणाभिषिञ्चेयुरुपोत्थाय अतिप्रणीतावग्नी अन्तरेण गत्वा अध्वर्युणा उक्तः सम्प्रेषितः संश्रानानि सामानि गायेत् पदाय पदाय स्तोभेत् तादर्थ्ये चतुर्थी अथ सिद्धे स्तोभानुसंहारेऽर्थयोगे किमिदं पुनरारभ्यते पदाय पदाय स्तोभेदिति उच्यते, एतानि चत्वारि सामान्याम्नातानि तेषां त्रीणि स्तौभिकान्येकमेकस्यामृचि गीतं सोऽयमाचार्य्य आरभते पदाय पदाय स्तोभेदिति कथमेषां प्रयोगे सर्वेषामृचि गानं स्यादिति ॥ १६ ॥

निधनान्युपयन्तो यजमानस्य मूर्द्धानमालभेरन्† ॥१७॥

सर्वे ऋत्विजो निधनान्युपयन्तः संश्रानानां यजमानस्य मूर्द्धानमालभेरन् निधनोपेतैश्च सर्वेषाञ्चोद्यते यजमानस्य च मूर्द्धालम्भनम् ॥ १७ ॥

---

* द्राह्यायणेनैतेन सूत्रद्वयं कृतम्।

† द्राह्यायणेऽप्येवम्।

**सन्त्वाहिन्वन्तीत्येतेषां पूर्वः पूर्वः स्तोभ उत्तरन्निधनम्*
॥ १८ ॥**

उक्तं पदाय पदाय स्तोभेदिति इह च यानि स्तौभिकानि तेषां सोपायः स्तोभः पठितः ततस्तस्योत्तरं निधनं तत्किमनुसंह्रियमाणेषु स्तोभेषु सोपायोऽनुह्रियतां अथान्य इति अत्राह सन्त्वाहिन्वन्तीत्येतेषां पूर्वः पूर्वः स्तोभो लुप्त आम्नाये सोऽनुसंहर्त्तव्यः अथ य उत्तरस्तमुक्त्वा निधनं ब्रूयात् तस्योत्तरं निधनमाम्नातन्न पादः सन्त्वाहिन्वन्तीत्येवमाद्येकेषामेतदादीनि स्तौभिकानि अपरेषां सन्त्वाहिन्वन्तीतीतत् इति गीतम् अन्यान्युत्तराणि स्तौभिकानि यथाराणायनीयानां सन्त्वाहिन्वन्तीत्येतस्यामृचि पदेणाम्नातमेवम् ॥ १८ ॥

अवसः स्थाने सञ्जित्यै विजित्यै सत्यजित्यै जित्या इति क्षत्रियस्य सम्पुष्ट्यै विपुष्ट्यै सत्यपुष्ट्यै पुष्ट्या इति वैश्यस्य* ॥ १९ ॥

ब्राह्मणस्य तावद्यथापठित एव निधनोपायः कर्त्तव्यो मूर्द्धाल्क्ष्मने क्षत्रियस्य सञ्जित्यै इत्येतदादीनि यथोद्दिष्टानि वैश्यस्य सम्पुष्ट्या इत्येतदादीनि यथोद्दिष्टानि ॥ १९ ॥

द्वे सौत्रामण्यौ कौकिली चरकसौत्रामणी च* ॥ २० ॥

द्वे इति संख्या कौकिली चरकसौत्रामणी चेति संज्ञा अथ द्वय

---

* द्राह्यायणोऽप्येवम् ।

षणां किमर्थं निर्देशतः सिद्धेः उच्यते द्वे एवैते कर्मणी द्रष्टव्ये नैतयोरग्निहोत्रवद्दर्शपूर्णमासवत् क्रिया द्रष्टव्या यथाग्निहोत्रे उभे सायम्प्रातराहुती एकं कर्म तथा दर्शपूर्णमासयोरुभे इष्टी एकं कर्म न तथेह ॥ २० ॥

कौकिल्याꣳ सामगानं नेतरस्याम्* ॥ २१ ॥

कौकिल्यां सौत्रामण्यां सामगानं इतरस्याञ्चरकसौत्रामण्याम् अथेतरस्यामिति किं उच्यते, यदेतत्संशानानामाज्ञानमेतदेतस्यां प्रतिषिध्यते यदैष्टिके विहितमौद्गात्रन्तदप्रतिषिद्धम् ॥ २१ ॥

सप्त हविर्यज्ञसꣳस्थाः सप्त सोमसꣳस्थाः † ॥ २२ ॥

एतासां कर्मक्रम उच्यते ॥ २२ ॥

तासाꣳ हविर्यज्ञसꣳस्थानामग्न्याधेयमग्निहोत्रं दर्शपूर्णमासौ चातुर्मास्यानि पशुबन्धः सौत्रामणी पाकयज्ञ इति ‡ ॥ २३ ॥

तासामिति निर्देशः क्रियते तासां हविर्यज्ञसंस्थानामयं क्रमो यथासूचितः पाकयज्ञग्रहणं संस्थाग्रहणञ्च अग्निहोत्रं दर्शपूर्णमासौ च एकमेव कर्माभिप्रेत्य ब्रवीति अनेन क्रमेण चैतेषां क्रिया ॥ २३ ॥

---

* संशानानि गायेदिति द्राह्यायणीये विशेषोऽस्ति ।

† द्राह्यायणेऽप्येवम् ।

‡ द्राह्यायणीये विशेषोऽस्ति ।

अथ सोमसंस्था अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडश्यतिरात्रो वाजपेयोऽप्तोर्यामः इत्यप्तोर्याम इति* ॥ २४ ॥

अथशब्द आनन्तर्ये उक्ता हविर्यज्ञसंस्थाः अथानन्तरं सोमसंस्थाः ता निर्द्दिष्टाः तासामपि निर्द्दिष्टेनैव क्रमेण क्रिया स्यात् ॥ २४ ॥

इति पञ्चमस्य चतुर्थी कण्डिका ।

अथ पञ्चमी कण्डिका ।

सुत्यायां ब्रह्मणः प्राक्सुब्रह्मण्याया उद्गात्रेण समानं कर्म्म* ॥ १ ॥

उक्तं हविर्यज्ञेषु ब्रह्मत्वं साम्प्रतं सोमसंस्थासु उच्यते, सुत्यायामित्यधिकरणलक्षणा सप्तमी यदितः कर्म वक्ष्यते तत् सुत्यायां प्रत्येतव्यं सुत्याशब्देन सोममुपचरन्ति ब्रह्मण इति सम्बन्धलक्षणा षष्ठी केन सम्बन्धः कर्मणा प्राक् सुब्रह्मण्यायाः यदौद्गात्रन्तेन समानं तुल्यं कर्म ब्रह्मणः अथाधिकृतस्य ब्रह्मणः किं पुनर्ग्रहणं ब्रह्मण इति उच्यते, उक्तमौद्गात्रेण समानं कर्म्मेति तत्र चोक्तं प्रहिणुयात् प्रस्तोतृसुब्रह्मण्यौ पुरस्तात् कर्मभ्य इति तदिहौद्गातृकर्मोपदेशादुद्गातृवत्

---

* शाङ्खायनेऽप्येवम्

पुनः सम्प्रेषणं प्राप्तं ब्रह्मणः सोऽयमाचार्य्यो नियमार्थं ब्रह्मणो ग्रहणं करोति कथं ब्रह्मणः कर्मैव केवलं विवक्षितमिति ॥ १ ॥

ईक्षणाक्रमणे वेदेः सञ्चरधिष्ण्योपस्थानदक्षिणाप्रतिग्रहभक्षाः स्तोमविमोचनाच्चोर्द्ध्वमन्यत् सामगानात्* ॥ २ ॥

उक्त प्राक् सुब्रह्मण्याया इति साम्प्रतं यदन्यदूर्द्ध्वं सुब्रह्मण्याया औद्गात्रेण समानं कर्म तदुच्यते ईक्षणञ्चाक्रमणञ्च वेदेः उत्तरं वेद्यन्तमाक्रम्य दक्षिणमीक्षमाणः पितरो भूरिति एते ईक्षणाक्रमणे कदाचिदूर्द्ध्वं कदाचित् प्राक् अत इदमारभते उक्तं स्वयं व्रजेत् क्रय उपवसथ्येवेति वेदेः सञ्चरः सञ्चरन्ति तेनेति सञ्चरः धिष्ण्यानामुपस्थानं दक्षिणानां प्रतिग्रहः सोमभक्षाः स्तोमविमोचनाच्च यदूर्द्ध्वं यन्निःसर्पणादि तत् सर्वं अन्यत् सामगानात् उक्तम् अयं सहोक्ता इति त्रिरुद्गाता गायेदित्येतत् सामगानं स्तोमविमोचनादूर्द्ध्वम् ॥ २ ॥

अनु स्यात्तु दीक्षणीयायाम् † ॥ ३ ॥

उक्तं प्राक् सुब्रह्मण्याया औद्गात्रेण समानं कर्मेति न च दीक्षणीयायामुद्गातुः कर्म विद्यते तस्मादादिश्यते अनु स्यात्तु दीक्षणीयायामिति ॥ ३ ॥

---

* द्राह्यायणेनैतेन सूत्रत्रयं कृतम् ।

† द्राह्यायणोऽप्येवम् ।

तस्याꣳ सꣳस्थितायामासीतादीक्षणाद्यजमानस्य* ॥ ४ ॥

तस्यां दीक्षणीयायामिष्टौ समाप्तायान्तावदासीत यावद्यजमानो दीक्षित इति मेखलाबन्धनादि कर्म कृतं सर्वमिति ॥ ४ ॥

तं यदाध्वर्युर्वाचं यमयेदथ यथार्थꣳ स्यात्* ॥ ५ ॥

तं यजमानं दीक्षितं यस्मिन् कालेऽध्वर्युर्वाचं यमयेदथ यथार्थं स्यात् यदन्यदुत्तरं कर्म तत् कुर्य्यात् ॥ ५ ॥

महावीरान् सम्भरिष्यन्स्तूष्णीमुपविशेत् सम्भृतेषु यथार्थꣳ स्यात् † ॥ ६ ॥

स्पष्टार्थम् ॥ ६ ॥

प्रायणीयायाꣳ सꣳस्थितायां यथेतन्निष्क्रम्य पूर्वेण पत्नीशालां तिष्ठेदाभिहोमात् पदस्य राजक्रयण्याः* ॥ ७ ॥

प्रायणीयायामिष्टौ प्रयन्त्यनयेति प्रायणीया तस्यां प्रायणीयायां समाप्तायां यथेतं यथागतं निष्क्रम्य उक्तं पूर्वया च द्वारानादेश इति तेनैव यथागतं निष्क्रम्य पत्नीशालायाः पूर्वे प्रदेशे तिष्ठेत्

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

आस्तुतः कालात् यावत् सोमक्रयण्याः गोपदादिभिर्होमः कृत इति ॥ ७ ॥

अभिहुत उत्तरेण सोमवहनं गत्वा प्राग्वा पदाभिहोमाद्दक्षिणेन यत्र राजानं क्रेष्यन्तः स्युस्तत्र गत्वा तूष्णीमुपविशेत्* ॥ ८ ॥

अभिहुते तस्मिन् पदे राजक्रयण्याः सोमवहनस्यानसः उत्तरेण सोमवहनं गत्वा अथवा प्राक् पदाभिहोमात् दक्षिणेन गत्वा यस्मिन् देशे सोमं राजानं क्रेष्यन्तः स्युस्तत्र गत्वा तूष्णीमुपविशेत् क्रेष्यन्त इति भविष्यत्कालोपदेशः ॥ ८ ॥

क्रीते प्राङुत्क्रामेत् पश्चिमेनैनꣳ हृत्वा राजानमादध्युराहितं पूर्वेण परीत्योह्यमानमनुगच्छेद्दक्षिणेन चेद्गतः स्यात्* ॥ ९ ॥

क्रीते सोमे तस्माद्देशात् प्राङुत्क्रामेत् पश्चिमेन एनं ब्रह्माणं हृत्वा सोमं सोमवहने अनसि आदध्युरध्वर्यवः आहितं पूर्वेण प्रदेशेन सोमवहनस्य प्रक्रम्य ऊह्यमानस्य पश्चाद्गच्छेत् दक्षिणां दिशं प्रति द्वौ गतिकल्पावुक्तौ अभिहुते पदे उत्तरेण प्राक्पदाभिहोमाद्दक्षिणेन गतः स्यात् तत एष क्रमो विधिर्य उक्तः यथोत्तरेण गतः स्याद्यदि दक्षिणेन यो विधिः स उच्यते ॥ ९ ॥

---

* द्राह्यायणोऽप्येवम्।

उत्तरेण चेत्क्रीते प्रत्यङुत्क्रामेत्* ॥ १० ॥

यद्युत्तरेण सोमवहनस्य गतः स्यात् ततः क्रीते सोमे तस्माद्देशात् प्रत्यङुत्क्रामेत् ॥ १० ॥

पूर्वेणैनꣳ हृत्वा राजानमादध्युः* ॥ ११ ॥

क्रीतं सोमं ब्राह्मणः पूर्वेण प्रदेशेन हृत्वा सोमवहने आदध्युः ॥११॥

आहितं पश्चिमेन परीत्योह्यमानमनुगच्छेत्* ॥ १२ ॥

आहितम् आरोपितं सोमवहनं पश्चिमेन प्रदेशेन परिगम्य ऊह्यमानस्य पश्चाद्गच्छेत् ॥ १२ ॥

तामेवात्रेषामन्वावर्त्तेत सा ह्यस्य प्राचि वर्त्तमानस्य दक्षिणा भवतीति† ॥ १३ ॥

यामेव एषाम् अनु प्राचि वर्त्तमानस्य गतः आवर्त्तमानस्यापि तामेवान्वावर्त्तेत तत्किङ्कारणं साह्यस्य सोमवहनस्य प्राङ्मुखं गतस्य दक्षिणा भवतीति ॥ १३ ॥

---

* द्राह्यायणेन सूत्रत्रयेणैकसूत्रं कृतम्।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम्।

विमुक्ते चान्तरेण सोमवहनं पत्नीशालाञ्च दक्षिणात्क्रम्य तिष्ठेद्दीक्षितश्चेत्* ॥ १४ ॥

विमुक्ते तस्मिन् सोमवहने अन्तरेण सोमवहनस्य पत्नीशालायाश्च उत्क्रम्य दक्षिणार्द्धे तिष्ठेत् यदि दीक्षितः स्यात् अथ दीक्षितः तस्य कर्म तत् कुर्यात् आकुतः कालात्तिष्ठेत् ॥ १४ ॥

आ राज्ञोऽवहरणात्* ॥ १५ ॥

यावत्सोमोऽवतारित इति चशब्दः किमर्थमिति चेत् विमुक्ते चेति उच्यते, द्वाविमौ गतिकल्पावुक्तौ तत्रोत्तरोऽधिकृतः तत्राधिकृतत्वात् तस्मिन्नेव काले माभूदिति अतश्चशब्दं करोति कथम् उभयोरपि गतिकल्पयोरेष विधिः स्यादिति ॥ १५ ॥

इति पञ्चमस्य पञ्चमी कण्डिका ।

अथ षष्ठी कण्डिका ।

प्रवेश्यमानꣳ राजानमनुप्रविशेदव्यवयन्नग्निना † ॥ १ ॥

---

* शाङ्खायनेन सूत्रद्वयेनैकसूत्रं कृतम् ।

† शाङ्खायनेऽप्येवम् ।

क्रीतं सन्तं सोमं सोमवहनादवतार्य्य पत्नीशालायां प्रवेश्यमानं अनुप्रविशेत् पश्चात्प्रविशेत्तस्य अव्यवयन्नग्निना सोमस्याग्नेश्चान्तरेण न गच्छेत् ॥ १ ॥

सम्बाधश्चेत् स्याद्दक्षिणयापि द्वारा प्रविशेत्* ॥ २ ॥

यदि सम्बाधं भवेत् अपि दक्षिणया द्वारा प्रविशेत् न च व्यवायं कुर्य्यात् ॥ २ ॥

उत्तरेणाहवनीयं पश्चिमेन वेदिꣳ सञ्चरेत् दीक्षितश्चेत्* ॥ ३ ॥

आहवनीयस्योत्तरेण गत्वा पश्चिमेन वेदेः गार्हपत्यस्य पूर्वेण दक्षिणाग्नेराहवनीयस्य चान्तरेण गत्वा तस्मिन्नासनउपविशेत् एष ब्रह्मणो दीक्षितस्य सञ्चरः ॥ ३ ॥

आतिथ्यामिष्टिं निर्वपन्ते* ॥ ४ ॥

अनन्तरमातिथ्यामिष्टिमारभन्ते, आतिथ्यमनया क्रियतइत्यातिथ्या इष्टिग्रहणमकृतत्वेयमिष्टिः तस्यामकृतत्वायामपि कथमैष्टिको धर्मः स्यादिति ॥ ४ ॥

ताश्चेदनवहृते राजनि निर्वपेरन् ब्राह्मणꣳ राजनि समादिश्य तत्रासीत* ॥ ५ ॥

---

* शाट्यायनेऽप्येवम् ।

यदि तामातिथ्यामिष्टिमनवताविते सोमे आरभेरन् ततो ब्राह्मणं तत्र तस्मिन् सोमे समादिश्य तस्यामातिथ्यायां क्रियमाणायामासीत ॥ ५ ॥

तस्याꣳ सꣳस्थितायां तानूनप्त्रमाज्यमवमृश्य जपेयुर्हविरसि वैश्वानरमनाधृष्टमनाधृष्यं देवानामोजोऽनभिशस्त्यभिशस्तिपा अनभिशस्तेन्यमञ्जसा सत्यमुपगेषꣳस्वितेमाधा इति* ॥ ६ ॥

तस्यामिष्टौ समाप्तायां यद्यवहृते राजन्यारब्धा यद्यनवहृते तस्यां संस्थितायां तानूनप्त्रमाज्यमवमृश्य तानूनप्त्रा देवता अस्येति तानूनप्त्रं किं पुनस्तानूनप्त्रमिति उच्यते आज्यन्तदवमृश्य अथ जपेयुः अत्र ब्रह्मत्वसूत्रेषु बहुवचनमुद्गातॄणामपि प्राप्त्यर्थं हविरसि वैश्वानर इत्येतदादि मन्त्रं यथासूचितम् ॥ ६ ॥

अप उपस्पृश्याध्वर्युणोक्तो राजानं विस्रम्भयेत्* ॥ ७ ॥

अपः स्पृष्ट्वा यदाध्वर्युणोच्यते राजानं विस्रम्भयेति ततस्तं सोमं वसनेनोपनद्धं विस्रम्भयेत् मुञ्चेत् ॥ ७ ॥

तꣳ हिरण्येनान्तर्द्धायाभिमृशेयुरꣳशुरꣳशुष्टे देव सोमाप्यायतामिन्द्रायैकधनविद आ तुभ्यमिन्द्रः प्यायता-

---

* द्राह्यायणोऽप्येवम् ।

मास्वमिन्द्राय प्यायस्वाप्यायगास्मात्सखोऽ सन्यामेधया स्वस्ति ते देव सोम सुत्यामुदृचमशीयेति* ॥ ८ ॥

तं विस्रंसितं सोमं यदि ब्रह्मणा यद्यन्येन हिर[illegible]दाय हिरण्यमन्तर्द्धानं कृत्वा अभिमृशेयुः न साक्षात् स्पृशेयुः [illegible] त्येतदादिना यथासूचितेन मन्त्रेण ॥ ८ ॥

काशमये प्रस्तरे निह्नुवीरन्दक्षिणानुत्तानान् पाणीन् कृत्वा सव्यान्नीच एष्टा रा[illegible] एष्टा वामानिप्रेषे भगायर्त्तमृतवादिभ्यो नमोदिवे नमः पृथिव्या इति* ॥ ९ ॥

काशमये प्रस्तरे काशो नाम तृणजातिः तन्मयः काशमयः प्रस्तरो मुष्टिः तस्मिन् प्रस्तरे निह्नुवीरन् निह्नवनं नाम कर्म तदुच्यते एवं दक्षिणान् पाणीनुत्तानान् कृत्वा तस्मिन् प्रस्तरे सव्यान् पाणीन्नीचान् कृत्वा एष्टा राय इत्येतदादि मन्त्रं जपेयुः एतन्निह्नवनम् ॥ ९ ॥

उपसदिष्टिरत ऊर्द्ध्वं तस्यां तथैवाभिमर्शननिह्नवने सव्या अपराह्ण उत्तानाः स्युर्द्दक्षिणान् प्रह्वः† ॥ १० ॥

अस्मात्कर्मण ऊर्द्धमुपसदिष्टिर्भवति, उपसदिति संज्ञा इष्टिग्रहणस्य प्रयोजनमुक्तम् आतिथ्यप्रकरण एव तस्यामुपसदिष्टौ यथैवा-

---

* द्राह्यायणोऽप्येवम्

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

तिष्यान्ते सोमाभिमर्शनमिक्षवने उक्ते तथैव एत[illegible] भवतः या तु आपराह्णिकी तस्यान्ते सव्याः पाणयः उत्ता[illegible]: स्युर्दाक्षिणान् पश्चः ॥१[illegible]॥

[illegible]पसद्धोमे कृते विद्यात्संस्थितेति* ॥ ११ ॥

अकृत[illegible]यमि[illegible] अतस्तस्याः संस्थानं ज्ञाप्यते यदाध्वर्युणा स्रुवेणोपसद्धोमो कृतः स्यात् तदा जानीयात् संस्थितेति ॥ ११ ॥

तस्या घर्मः प्रवर्ग्यवति पूर्वः † ॥ १२ ॥

तस्या उपसदिष्टेः प्रवर्ग्यवति यज्ञे घर्मस्तावत् पूर्वो भवति प्रवर्ग्योऽस्मिन्नस्तीति प्रवर्ग्यवान् तस्मिन् प्रवर्ग्यवति प्रवर्ग्यस्यानित्यतां दर्शयति ॥ १२ ॥

इति पञ्चमस्य षष्ठी कण्डिका ।

अथ सप्तमी कण्डिका ।

तमभीन्धिष्यत्सु गार्हपत्यं गत्वा यजुषोपविशेद्दक्षिणेन दक्षिणाग्निमुत्तरेण बर्हिषेन् † ॥ १ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणीये छेदविषये विशेषोऽस्ति ।

383

तद्घर्मरोचनार्थं अभीन्धिष्यत्सु गार्हपत्यमग्निं गत्वा तस्य दक्षिणे प्रदेशे यजुषोपविशेत् यदि बहिः प्रवर्ग्यः स्यात् उत्तरेणाग्नीध्रीयस्य गच्छेत् तत्र दक्षिणाग्निकर्माणि क्रियन्ते प्रस्तुते ॥ १ ॥

रुचितो घर्म इत्युक्तेऽनुवाकेन तिष्ठन्तोऽवेक्षेरन् यमध्वर्युर्ब्रूयात्* ॥ २ ॥

रुचितो घर्म इत्युक्ते तस्मिन् काले घर्मं सर्वेऽनुवाकेन गर्भो देवानामित्यादिनावेक्षेरन् यमध्वर्युर्ब्रूयात्, अनूच्यत इत्यनुवाकः ॥ २ ॥

तꣳ ह्रियमाणं यथेतमनुव्रजन् जपेद्विश्वा आशा दक्षिणधक्सर्वान् देवानयाडिहस्वाहा कृतस्य घर्मस्य मधोः पिबतमश्विनेति* ॥ ३ ॥

तं घर्मं ह्रियमाणमाहवनीये यथागतमनुगच्छन् जपेद्विश्वा आशा इत्येतदादि मन्त्रं यथासूचितम् ॥ ३ ॥

आश्राविते उपविश्य जपेदश्विना घर्मं पातमह्र्व्यानमहर्दिवाभिरूतिभिस्तन्त्रायणेन मोघा वा पृथिवीद्यामिति* ॥ ४ ॥

आश्राविते घर्मे उपविश्य जपेत् अश्विना घर्ममित्येतदादि मन्त्रम् ॥ ४ ॥

---

* द्राह्यायणेऽप्येवम् ।

हुते यजमानं वाचयेदपातामश्विना घर्ममनु द्यावापृथिवी अमꣳसातामिहैव रातयः सन्त्विति* ॥ ५ ॥

हुते तस्मिन् घर्मे यजमानं वाचयेत् अपातामश्विना घर्ममित्येतदादि मन्त्रं यथोद्दिष्टम् ॥ ५ ॥

घर्मशेषस्य भक्षयेन्मधुहुतमिन्द्रतमेऽग्नावश्यामते देव घर्म नमस्तेऽस्तु मा मा हिꣳसीरिति* ॥ ६ ॥

उक्तं वाजिनाश्विनघर्माणामृत्विक्तूपहवमिष्ट्वा प्राणभक्षं भक्षयेदिति सामान्यम् अतः तस्य घर्मस्य हुतस्य यः शेषः स्यात् तस्य भक्षयेत् मधुहुतमिन्द्रतम इत्येतदादिना मन्त्रेण ॥ ६ ॥

सत्रञ्चेत्स्याद्यजमाना उपह्वयध्वमित्येवोपह्वानम्* ॥७॥

यदि सत्रं स्यात्ततः घर्मस्य भक्षणकाले यजमाना उपह्वयध्वम् उपसम्पादयध्वम् इत्येतदुपह्वानं स्यात् अथैवशब्दः किमर्थमिति चेत् उच्यते न केवलमस्मिन् काले सर्वेषूपह्वानेष्वेवं स्यात् ॥ ७ ॥

एवꣳ सदा प्रवर्ग्योपसदः कुर्य्यात्* ॥ ८ ॥

एवमेतेन प्रकारेण सर्वस्मिन् काले प्रवर्ग्योपसदः कुर्य्यात् इदं कर्मातिथ्यानन्तरमुक्तं अतो ब्रवीति एवं सदा प्रवर्ग्योपसदः कुर्य्यादिति अथ सदाग्रहणं किमर्थमिति चेत् उच्यते सदा सायञ्च प्रातश्च ॥ ८ ॥

---

* द्राह्यायणेऽप्येवम् ।

महावेदेः स्तम्बयजुर्हरिष्यत्सु यजुषोपविशेत्* ॥ ९ ॥

महावेदेरित्यपादानलक्षणा पञ्चमी स्तम्बयजुरुक्तलक्षणं तत् हरिष्यत्सु बहिर्वेदि यजुषोपविशेत् ॥ ९ ॥

विलिखिते चात्वाले यथार्थं स्यात्* ॥ १० ॥

हृते स्तम्बयजुषि तावत्तस्मिन्नेव देशे आसीत यावत् चात्वालविलेखनं कृतमिति ततो यथार्थं स्यादित्युक्तार्थम् ॥ १० ॥

उत्तरवेदिन्निर्वप्स्यत्सु तूष्णीमुपविशेत् न्युप्तायां यथार्थं स्यात्* ॥ ११ ॥

उत्तरवेदिश्चात्वाले पांशुभिः क्रियते तस्मिन् मृन्निर्वपने करिष्यमाणे तूष्णीमुपविशेद्ब्रह्मा स्थाने कृते मृन्निर्वपने यथार्थं स्यात् ॥११॥

अग्निचित्यायां प्रागदीक्षणीयायाः सावित्रान् होमान् ; यजुषोपविशेत्* ॥ १२ ॥

अग्निचित्यायां विशेष उच्यते, अग्निचित्या अनित्या तस्यामग्निचित्यायां पूर्वं दीक्षणीयायाः सावित्रान् होमान् जुह्वति सवितृदेवताकान् तान् होष्यत्सु, यजुषोपविशेत् ॥ १२ ॥

तेषु हुतेषूख्यां मृत्तिकामाह्रियमाणामनुगच्छेत्* ॥ १३ ॥

तेषु सावित्रेषु होमेषु हुतेषु उख्यां मृत्तिकामाह्रियमाणाम्

---

* द्राह्यायणेऽप्येवम् ।

अनुगच्छेत् उखाप्रयोजना उख्याः उखा नाम मृण्मयं पात्रं क्रियते तस्मिन्नग्निः संह्रियते ॥ १३ ॥

तस्याᳫं सम्भ्रियमाणायामासित्वा सम्भृतायां यथार्थᳫं स्यात्* ॥ १४ ॥

तस्यां मृत्तिकायां संभ्रियमाणायां तत्रासीत् सम्भृतायां यथार्थं स्यात् ॥ १४ ॥

इति पञ्चमस्य सप्तमी कण्डिका ।

अथ अष्टमी कण्डिका ।

आह्वनीयञ्चेष्यत्स्तु यजुषोपविशेत्* ॥ १ ॥

योऽसौ पत्नीशालायामाह्वनीयः स इष्टकाभिश्चीयते त यजुषोपविशेत् ॥ १ ॥

तस्मिन् सञ्चित उख्यामासन्दीं नैर्ऋतीश्चेष्टका अरण्यᳫं ह्रियमाणा अनुगच्छेत्* ॥ २ ॥

तस्मिन्नाह्वनीये सञ्चिते समस्तचिते यस्यामासन्द्यामुखा स्थापिता आसीत तामासन्दीं नैर्ऋती इष्टकाः निर्ऋतिर्देवता यासां ता

---

* द्राह्यायणेऽप्येवम् ।

नैर्ऋत्यः ता अरण्यं ह्रियमाणा अनुगच्छेत् न तु तस्मिन्निति किमर्थं उच्यते, केषाञ्चिदाहवनीयस्यैका चितिर्भवति केषाञ्चित् पञ्च यद्येका यदि वा पञ्च तस्मिन् सञ्चिते ॥ २ ॥

निधीयमानानां दक्षिणतः स्थित्वा निहितास्वपउपस्पृश्यानपेक्षं प्रत्याव्रजेत्* ॥ ३ ॥

निधीयमानानाम् इष्टकानां आसन्नासु दक्षिणे प्रदेशे स्थित्वा निहितासु स्थापितासु अप उपस्पृश्यानपेक्षं प्रत्याव्रजेत् ॥ ३ ॥

अग्निं विकृष्यतस्तु सर्वौषधञ्च वप्स्यतस्तु तूष्णीमुपविशेत्* ॥ ४ ॥

अग्निं क्षेत्रं लाङ्गलेन कृष्यते तमग्निं क्षेत्रं विकृष्यतस्तु तूष्णीमुपविशेत् तस्मिन्नेव च सर्वौषधम् उप्यते, तच्च वप्स्यतस्तु तूष्णीमुपविशेत् ॥ ४ ॥

तैः सार्द्धं प्रत्याव्रज्य चितीः प्रणीयमाना अनुगच्छेत्* ॥५॥

तैः कर्तृभिः सह प्रत्याव्रज्य चितीः चयनार्थं प्रणीयमाना अनुगच्छेत् याभिरिष्टकाभिरग्निश्चीयते ताश्चित्य इत्येवमुपचरन्ति ॥ ५ ॥

निधीयमानानां दक्षिणतः स्थित्वा निहितासु दक्षिणस्य पक्षस्यासन्नो यजुषोपविशेत्* ॥ ६ ॥

---

* आश्वलायनेऽप्येवम् ।

पचस्येति तत्संभृत्या ब्रवीति तेनाग्निचेत्त्वं लक्षितं भवति ॥६॥

लोकं पृणासूपधीयमानासु ब्राह्मणं तत्र समादिश्य यथार्थꣳ स्यादिति शाण्डिल्यः* ॥ ७ ॥

लोकं पृणा नामेष्टकाः अपरा यजुष्मत्यः तासां यजुष्मतीनां उपधाने कृते ततो लोकं पृणा उपधीयन्ते तासु लोकं पृणासूपधीयमानासु ब्राह्मणं तस्मिन् देशे समादिश्य यथार्थं स्यादिति शाण्डिल्य आचार्य्यो मन्यते ॥ ७ ॥

आसीतैवेति धानञ्जप्यः* ॥ ८ ॥

धानञ्जप्य आचार्य्यो मन्यते आसीतेव ॥ ८ ॥

एवꣳ सदा चितिषु कुर्य्यात्* ॥ ९ ॥

योऽयमिष्टकाप्रणयनादिविधिरुक्तः एष सर्वासु चितिषु कुर्य्यात्॥९॥

सञ्चितकर्माणि करिष्यन्नाव्राजमासीत्* ॥ १० ॥

सञ्चितेऽग्नौ यानि कर्माणि तानि करिष्यन् आव्राजमासीत यावदाव्रज्याव्रज्य क्रियन्ते तावदासीतेत्यर्थः ॥ १० ॥

सम्राड़ासन्दीꣳ ह्रियमाणामनुगच्छेत्* ॥ ११ ॥

यस्यामासन्द्यां घर्मपात्राणि स्थाप्यन्ते सा संम्राड़ासन्दी तां घर्मोत्सादने ह्रियमाणामनुगच्छेत् ॥ ११ ॥

---

* द्राह्यायणेऽप्येवम् ।

परिषिच्यमानेऽप उपस्पृश्य तैः सार्द्धं प्रत्याव्रज्याग्निं प्रणीयमानमनुगच्छेदप्रतिरथं जपंस्तूष्णीमनग्निचित्या चेत्* ॥ १२ ॥

घर्मपात्राणामुदकेन परिषेचने क्रियमाणे अप उपस्पृश्य तैरेव कर्तृभिः सह प्रत्याव्रज्याग्निं प्रणीयमानमनुगच्छेत् अप्रतिरथञ्जपन् आशुः शिशान इत्येतमध्यायञ्जपन् यद्यनग्निचित्या स्यात् तूष्णीमनुगच्छेत् ननूक्तं एतत्कर्माग्निप्रणयनेषु सर्वेषु इति अथानुगच्छेदिति किं पुनरारभ्यते उच्यते विशेषणार्थं पुनरारभ्यते कथम् अप्रतिरथञ्जपन्निति अन्येष्वग्निप्रणयनेषु दक्षिणेन वेदेर्गतः इह पुनर्येन पथाग्निः प्रणीयते तेनैवानुगच्छेत् ॥ १२ ॥

निधीयमानस्य दक्षिणतः स्थित्वा निहिते दक्षिणा बहिर्वेदि यजुषोपविशेत्† ॥ १३ ॥

आहवनीयायतने निधीयमानस्याग्नेर्दक्षिणे प्रदेशे स्थित्वा निहितेऽग्नौ बहिर्वेदि दक्षिणार्द्धे यजुषोपविशेत् ॥ १३ ॥

हविर्द्धाने प्रवर्त्त्यमाने अनुगच्छेत्† ॥ १४ ॥

हविर्द्धानसंज्ञके अनसी प्रवर्त्यमाने अनुगच्छेत् ॥ १४ ॥

---

* द्राह्यायणेनैतेन सूत्रद्वयं कृतम्।

† द्राह्यायणेऽप्येवम्।

परिवार्यमाणयोस्तत्रैव गत्वासीत* ॥ १५ ॥

परिवार्य्यमाणयोर्हविर्द्धानयोस्तस्मिन्नेव देशे गत्वा दक्षिणार्द्धे वेदेर्बहिरासीत ॥ १५ ॥

उच्छ्रितायामौदुम्बर्यां यथार्थꣳ स्यात् यथार्थꣳ स्यात्* ॥ १६ ॥

तस्मिन् देशे तावदासीत यावदौदुम्बर्य्युच्छ्रयणं कृतमिति तत उच्छ्रितायामौदुम्बर्य्यां यथार्थं स्यात् इत्युक्तार्थम्॥ १६ ॥

इति पञ्चमस्य अष्टमी कण्डिका ।

अथ नवमी कण्डिका ।

अग्नीषोमौ प्रणेष्यत्सु वेदिमाक्रामेन्मन्त्रेण † ॥ १ ॥

उक्तमुच्छ्रितायामौदुम्बर्य्यां यथार्थं स्यादिति साम्प्रतमग्नीषोमयोः प्रणयणं तत्र ब्रह्मत्वमुच्यते अग्निश्च सोमश्चाग्नीषोमौ प्रणेष्यत्सु प्रणेष्यत्स्विति भविष्यत्काल आसन्नो निर्द्दिश्यते तस्मिन् भविष्यत्काले वेदिमाक्रामेत् मन्त्रेण ब्रह्मा आग्नानेन तीर्थेन गत्वा प्रविश्य मृदाभिधिरेत्यनेन मन्त्रेण वेदिमाक्रामेत् ॥ १ ॥

---

* द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

† द्राह्यायणोऽप्येवम् ।

पश्चिमेनोत्तरवेदिमुदङ्ङतिक्रम्याक्रमणयजुर्जपेच्चात्वालसमीपे दीक्षितश्चेत्* ॥ २ ॥

यदि दीक्षितः स्यात् ब्रह्मा ततः अग्नीषोमप्रणयनकाले स्वस्मादासनादुत्थाय हविर्द्धानस्योत्तरवेदेश्चान्तरेणोदङ्मुखः गत्वा चात्वालस्य समीपे एतदाक्रमणयजुर्जपेत् ॥ २ ॥

तूष्णीमत ऊर्द्ध्वं वेदेराक्रमणम्* ॥ ३ ॥

ततः अग्नीषोमप्रणयनकालाक्रमणादूर्द्ध्वं यान्यन्यानि वेद्याक्रमणानि ब्रह्मणः तानि सर्वाणि तूष्णीं भवन्ति अनेनोक्तं सुत्यायां ब्रह्मणः प्राक् सुब्रह्मण्याया उद्गात्रेण समानं कर्मेति ईक्षणाक्रमणे वेदेरित्येतदादि च उद्गातुः सवनमुखेषु यजुपाक्रमणं विहितं यावदाक्रामेयुरित्येक इति तदेतद्ब्रह्मणः प्राप्नोत्युद्गातृसामान्यात् तदेतत् सूत्रकारो निवर्त्तयति तूष्णीमत ऊर्द्ध्वं वेदेराक्रमणमिति ॥ ३ ॥

क्रीत्वा राजा येनातिहृतः स्यात्तेन गत्वा तूष्णीमुपविशेत्* ॥ ४ ॥

क्रीत्वा सोमो राजा सोमवहनादवतार्य्य पत्नीशालायां प्रवेश्य येन पथा संस्थानमानीतः स्यात् तेन गत्वा ब्रह्मा तूष्णीमुपविशेत् तस्मिन्नासने ॥ ४ ॥

---

* द्राह्यायणेऽप्येवम् ।

राजानꣳ हरेत्युक्तः पूर्वेणाग्निमेकस्मा अतिप्रदाय तान् प्रसव्यं परीत्यादायानुगच्छेद्दक्षिणेन चेद्गतः स्यात्* ॥ ५ ॥

राजानं हरेत्युक्तो ब्रह्मा पूर्वेणाग्निमेकस्मै ऋत्विजे अतिप्रदाय अर्पयित्वा तानृत्विजः प्रसव्यं परीत्य आदाय गृहीत्वा सोममनुगच्छेत् यदि दक्षिणेन गतः स्यात् ॥ ५ ॥

उत्तरेण चेद्यथेतमग्निं परीत्यादायानुगच्छेत्* ॥ ६ ॥

यद्युत्तरेण गतः स्याद्ब्रह्मा यथागतमग्निं परीत्य गृहीत्वा सोममनुगच्छेत् ॥ ६ ॥

अन्येन चेद्ब्रह्मा व्रजितः स्यादन्येन राजा तेनैनं प्रगृह्णीयात्* ॥ ७ ॥

यद्यन्येन पथा ब्रह्मा गतः स्यात् अन्येन सोमो नीतः येन सोमो नीतः स्यात् तेन एनं सोमं प्रगृह्णीयात् नयेत् ननूक्तं क्रीत्वा राजा येनातिहृतः स्यात्तेन गत्वा तूष्णीमुपविशेदिति य एव राज्ञः सञ्चरः स एव सञ्चरो ब्रह्मणः तात्कालिक उपदिष्टः तत्किमिदमारभ्यते अन्येन चेद्ब्रह्मा व्रजितः स्यादन्येन राजेति उच्यते ब्रह्मणो दीक्षितस्य सञ्चरन्नियमयति यदा ब्रह्मा दीक्षितः स्यात् तदा स्वेनैव सञ्चरेण यायात् यद्यनेन राजा नीतः स्यात् न तेन यायात् ॥ ७ ॥

एतौ त्वेव ब्रह्मणो गतिकल्पावह्वरतोऽपि* ॥ ८ ॥

---

* द्राह्यायणोऽप्येवम् ।

यद्यपि ब्रह्मा सोमं न हरेत् अध्वर्युर्यजमानो वा अन्यो वा हरेत् एतौ एव ब्रह्मणो गतिकल्पौ स्यातां यो हरत उक्तौ तुशब्दोऽवधारणार्थः ॥ ८ ॥

आसीताग्नीध्रीय आहुत्योर्हूयमानयोरिति धानञ्जप्यः* ॥ ९ ॥

आग्नीध्रीये आहुत्योर्हूयमायोरासीतेत्येवं धानञ्जप्य आचार्यो मन्यते ॥ ९ ॥

तिष्ठेदिति शाण्डिल्यः* ॥ १० ॥

तिष्ठेदित्येवं शाण्डिल्य आचार्यो मन्यते आसीतेति सिद्धे सति स्थानविकल्पनार्थमारम्भः ॥ १० ॥

उत्तरेणाग्नीध्रीयꣳ राजानमाज्यानि च ह्रियमाणान्यनुगच्छेत्* ॥ ११ ॥

आग्नीध्रीयस्योत्तरेण प्रदेशेन सोमं राजानमाज्यानि च नीयमानान्यनुगच्छेत् ॥ ११ ॥

प्रवेशितेषु हविर्द्धानं पश्चिमेन गत्वासीतेति गौतमः* ॥१२॥

प्रवेशितेषु आज्येषु सोमे च हविर्द्धानं तस्य हविर्द्धानस्य पश्चिमेन गत्वासीतेत्येवं गौतम आचार्यो मन्यते देशउपयोगस्य वक्ष्यते ॥ १२ ॥

---

* द्राह्यायणेऽप्येवम् ।

पूर्वेणेति शाण्डिल्यायनो दक्षिणस्य द्वारबाहोः पुरस्ताद्यजुषेति* ॥ १३ ॥

प्रवेशितेषु आज्येषु सोमे च तस्यैव हविर्द्धानस्य पूर्वेण गत्वा दक्षिणस्य द्वारबाहोः पूर्वे प्रदेशे यजुषोपविशेदित्येवं शाण्डिल्यायन आचार्यो मन्यते एतत् स्थानमुपवेशनस्य एतयोर्गतिकल्पयोः ॥१३॥

अग्नीषोमीयवपायाꣳ हुतायां यथेतमुदङ्ङतिक्रम्य चात्वाले मार्जयेत* ॥ १४ ॥

अग्नीषोमीयस्य पशोर्वपायां हुतायां यथेतं यथागतं यदि पूर्वेण गतः स्यात् यदि पश्चिमेन उदङ्गत्वा चात्वाले मार्जनं कुर्य्यात् तन्मार्जनमुक्तम् ॥ १४ ॥

एवमेवापररात्र आज्येषु प्रविष्टेषूपवेशनं मार्जनञ्च सवनीयवपायाꣳ हुतायाम् † ॥ १५ ॥

यथाग्नीषोमीयवपायां हुतायां एवमेव अनेनैव प्रकारेण अपररात्रे सौत्येष्वाज्येषु प्रविष्टेषु उपवेशनं ब्रह्मणः मार्जनञ्च सवनीयस्य पशोर्वपायां हुतायाम् ॥ १५ ॥

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रत्रयं कृतम् ।

इति पञ्चमस्य नवमी कण्डिका ।

अथ दशमी कण्डिका।

पुरोडाशेन चरिष्यत्सु तूष्णीमुपविशेत्* ॥ १ ॥

प्रसङ्गेन सामान्यं कर्मोक्तं साम्प्रतमनन्तरकर्मप्रतिपत्तिः अग्नीषोमीयं पशुपुरोडाशं प्रति तदारप्स्यत्सु तूष्णीमुपविशेत् ॥ १ ॥

दीक्षितश्चेत् सर्वा इडा अन्वारभेत* ॥ २ ॥

यदि दीक्षितः स्याद्ब्रह्मा ततः सर्वा इडा अन्वारभेत दीक्षणीयाया आरभ्य ॥ २ ॥

वसतीवरीषु परिह्रियमाणासु दक्षिणात्क्रम्य तिष्ठेददीक्षितश्चेदा तासां परिहरणात्* ॥ ३ ॥

वसतीवरीषु परिहरणेषु क्रियमाणेषु तस्माद्देशादुत्क्रम्य दक्षिणार्द्धे वेदेर्बहिस्तिष्ठेत् यद्यदीक्षितः स्यात् यदि दीक्षितः तत्रैवासीत बहिर्वेदि कियन्तं कालं तिष्ठेत् आ तासां परिहरणात् यावद्वसतीवरीपरिहरणं कृतमिति ॥ ३ ॥

आग्नीध्रीयꣳ राजानꣳ ह्रियमाणमनुगच्छेत्* ॥ ४ ॥

केषाञ्चिदध्वर्यूणां राजा हविर्द्धान एव वसति केषाञ्चिदाग्नीध्रीये तद्ये राजानमाग्नीध्रीयं हरन्ति ह्रियमाणमनुगच्छेत् ॥ ४ ॥

---

* माध्यायकोऽप्येवम्।

निधीयमानस्य दक्षिणतः स्थित्वा निहिते यथार्थं स्यात्* ॥ ५ ॥

निधीयमानस्य सोमस्य आग्नीध्रीये दक्षिणे प्रदेशे स्थित्वा निहिते स्थापिते यथार्थं स्यात् गतार्थमेतत् ॥ ५ ॥

दीक्षितश्चेत्तत्रैव संविशेत्* ॥ ६ ॥

यदि दीक्षितः स्याद्ब्रह्मा ततस्तस्मिन्नेवाग्नीध्रीये संविशेत् ॥ ६ ॥

अपररात्र आज्यानि ग्रहीष्यतः पूर्वेण गत्वाग्निञ्च पश्चिमेन वा यजुषोपविशेत्* ॥ ७ ॥

रात्रेरपरः कालः अपररात्रः तस्मिन्नपररात्रे आज्यानि गृह्णन्ति तानि ग्रहीष्यतः आज्यग्रणकाले तेषां पूर्वेण प्रदेशेन गत्वाग्नेश्च पश्चिमेन वा गत्वा तान् सर्वानग्निञ्च यजुषोपविशेत् ॥ ७ ॥

आत्तेषु प्राङुत्क्रम्य प्रसव्यं परीत्यानुगच्छेत् पूर्वेण चेद्गतः स्यात्* ॥ ८ ॥

आत्तेषु गृहीतेष्वाज्येषु प्राङुत्क्रम्य तस्मिन्नेव देशे तान् सर्वानग्नीनाज्यानि ऋत्विजश्च अप्रदक्षिणं परीत्य अनुगच्छेत् यदि पूर्वेणाग्निं गतः स्यात् ॥ ८ ॥

पश्चिमेन चेद्यथेतमग्निं परीत्यानुगच्छेत्* ॥ ९ ॥

---

* द्राह्यायणोऽप्येवम् ।

यदि पश्चिमेन गतः स्यात् यथागतमग्निं परीत्यानुगच्छेत् ॥ ९ ॥

प्रवेशितेषूपविशेत्* ॥ १० ॥

प्रवेशितेष्वाज्येषु हविर्द्धानमुपविशेत् तदुक्तम् एवमेवापररात्र आज्येषु प्रविष्टेषूपवेशनं मार्जनञ्चेति सिद्धमुपवेशनं विकल्पार्थमारभ्यते ॥ १० ॥

आज्येष्वेव ग्रहीष्यमाणेष्वत्रोपविशेदिति शाण्डिल्यः* ॥ ११ ॥

आज्येष्वेव ग्रहीष्यमाणेषु अस्मिन् देशे उपविशेदिति शाण्डिल्य आचार्यो मन्यते नैवाग्नीध्रीयसमीपे उपविशेदिति ॥ ११ ॥

अध्वर्युणोक्तो वाचं यच्छेदातृतीयं प्रातरनुवाकस्य प्रथमायाः* ॥ १२ ॥

अध्वर्युणोक्तः स ब्रह्मा वाचं यच्छेत् वाग्यमनं कुर्य्यात् आ कस्मात् कालात् यावत् प्रातरनुवाकस्य प्रथमाया ऋचस्त्रिर्वचनं कृतमिति ॥ १२ ॥

आ वा परिधानीयायाः* ॥ १३ ॥

यावद्वा परिधानीयाया ऋचस्त्रिर्वचनं कृतमिति ॥ १३ ॥

आ वोपांश्वन्तर्यामयोर्होमात्* ॥ १४ ॥

---

* शाट्यायनकेऽप्येवम्।

आ वा उपांश्वन्तर्यामयोर्ग्रहयोर्होमात् यावदुपांश्वन्तर्यामौ हुताविति ॥ १४ ॥

आ वा बहिष्पवमानात्* ॥ १५ ॥

यावद्वा बहिष्पवमानं समाप्तमिति एते वाग्यमनस्य कालविकल्पाः ॥ १५ ॥

हविर्द्धानश्चेत पूर्वेण गतः स्यादुपांश्वन्तर्यामौ होष्यतस्तूदङ्ङतिक्रम्य तिष्ठेददीक्षितश्चेत् † ॥ १६ ॥

यदि हविर्द्धानस्य पूर्वेण प्रदेशेन गतः स्यात् गच्छा तत उपांश्वन्तर्यामौ ग्रहौ होष्यतस्तु उत्तरेण गत्वा तिष्ठेत् अव्यवायार्थं यद्य दीक्षितः स्यात् अथ दीक्षितस्त्वेवासीत नैव तस्य व्यवायोऽस्ति आ कुतः कालं तिष्ठेत् ॥ १६ ॥

आ तयोर्होमात् † ॥ १७ ॥

तिष्ठेदिति शेषः ॥ १७ ॥

निःसर्पत्स्वन्वारभेत* ॥ १८ ॥

अभिषवं कृत्वा निःसर्पत्सु अन्वारभेत प्रतिहर्त्तारम् अविच्छेदार्थं वाससि गृह्णीयात् ॥ १८ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणीये छेदविषये विशेषोऽस्ति ।

तस्य प्रस्तोत्रा समानं कर्म प्रागुपवेशनात्* ॥ १९ ॥

तस्य ब्रह्मणः प्रस्तोत्रा सह तुल्यं कर्म आकुतः प्रागुपवेशनात् उपवेशनन्त्वाह ॥ १९ ॥

आस्तावं प्राप्यानासन्नो यजुषोपविशेत् प्रस्तोतारं प्रति* ॥ २० ॥

आस्तावदेशं प्राप्य असन्निकृष्टस्तस्यास्तावस्य यजुषोपविशेत् प्रस्तोतारं प्रति यथोदङ्मुखोपविष्टस्य प्रस्तोतुरासनमाभिमुख्येन भवति ॥२०।

इति पञ्चमस्य दशमी कण्डिका ।

अथ एकादशी कण्डिका ।

रश्मिरसीत्येतावनुवाकौ स्तोमभागाः* ॥ १ ॥

साम्प्रतं स्तोत्रानुमन्त्रणमुच्यते, रश्मिरसि तन्तुरसीत्येतौ द्वावनुवाकौ एकस्मिन्ननुवाके द्वादशमन्त्राः पठिताः अपरस्मिन्नेकविंशतिः तेषु मन्त्रेषु बहुवचनं स्तोमभागा इति ॥ १ ॥

तैः पृथगनुपूर्वꣳस्तोत्राण्यनुमन्त्रयेत ब्रह्मन् स्तोष्यामः प्रशास्तरित्युक्ते* ॥ २ ॥

किमेषां स्तोमभागत्वं स्तोमान् भजन्त इति स्तोमभागाः तैश्च य-

---

* द्राह्यायणेऽप्येवम् ।

त्रिंशता स्तोमभागैः मन्त्रैः पृथगेकैकमनुपूर्वम् एकैकं स्तोत्रमनुमन्त्रयेत ब्रह्मा ब्रह्मन् स्तोष्यामः प्रशास्तरित्युक्ते प्रस्तोत्रा षोडशिमत्यतिरात्रे एकोनत्रिंशस्तोत्राणि अप्तोर्यामे चत्वार्यतिरिक्तस्तोत्राणि एवमेते मन्त्राः एतेषां स्तोत्राणां प्रतिमन्त्रणे एष समुदितानां त्रयस्त्रिंशतां स्तोत्राणां प्रतिमन्त्रणविधिरुक्तः । इदानीं मन्त्रविवेकार्थमाह ॥ २ ॥

ऊर्द्ध्वं प्रथमाद्रात्रिपर्य्यायाद्यत्र स्यादमुष्मै त्वेति तं जित्वेति तत्र ब्रूयात्* ॥ ३ ॥

विंशतिभ्य ऊर्द्ध्वं स्तोमभागेभ्यः अकृत्स्ना मन्त्राः पठिताः द्वितीयतृतीययोः पर्य्याययोः पठित्वा ततः मन्त्रो कृत्स्नः पठितः ततः पुनरतिरिक्तस्तोत्रेषु तथैवाकृत्स्नः तथैव किन्तु प्रयोक्तव्या अथान्यथा प्रयोग इति अत्राह ऊर्द्ध्वं प्रथमाद्रात्रिपर्य्यायादिति अमुष्मा इति सर्वनाम्नि त्रिवृदसि त्रिवृते त्वा त्रिवृतं जिन्व सर्वं चैवं प्रकारो द्वादशस्वपि ॥ ३ ॥

सवितृप्रसूता बृहस्पतये स्तुतेत्येकैकस्यान्तः* ॥ ४ ॥

एकैकस्य मन्त्रस्य सवितृप्रसूता बृहस्पतये स्तुतेत्येषान्तः स्यात् त्रिवृदसि त्रिवृते त्वा त्रिवृतं जिन्व सवितृप्रसूता बृहस्पतये स्तुतेति उत्तरेषामप्येवमेव प्रकार एवं जातीयानाम् ॥ ४ ॥

पूर्वेषाञ्च* ॥ ५ ॥

---

* द्राह्यायणेऽप्येवम् ।

पूर्व्वेषाञ्च रश्मिरसीत्येतदादीनां सवितृप्रसूता वृहस्पतये स्तुतेत्येकैकस्य मन्त्रान्तः स्यात् ननु आम्नायसिद्धमेकैकस्मिन् किं पुनरारभ्यते पूर्व्वेषाञ्चेति उच्यते विशेषविवक्षुरारभते विशेषो वक्ष्यते स पूर्व्वेषाञ्चैतेषाञ्च स्यादिति ॥ ५ ॥

भूर्भुवःस्वर्बृहतिर्ब्रह्माहं मानुष ओमित्येतद्वाधिकं कुर्य्यादोङ्कारं वा* ॥ ६ ॥

एतद्वा यथोद्दिष्टं यजुरधिकं कुर्य्यादोङ्कारं वेति विकल्पः पूर्व्वेषाञ्चेत्युक्तम् ॥ ६ ॥

यथाम्नायꣳ सन्धेरनुमन्त्रयेत* ॥ ७ ॥

यथाम्नायपरिपठितेन यजुषा सन्धेः स्तोत्रमनुमन्त्रयेत वसुकोऽसि वस्यष्टिरसि वेषश्रीरसि सवितृप्रसूता वृहस्पतये स्तुतेत्येवम् ॥ ७॥

त्रैधं विभजेदिति धानञ्जय्यो वसुकोऽसि वस्यष्टिरसि वेषश्रीरसि वसुकाय त्वा वस्यष्टये त्वा वेषश्रिये त्वा वसुकं जिन्व वस्यष्टिं जिन्व वेषश्रियं जिन्व सवितृप्रसूता वृहस्पतये स्तुतेति* ॥ ८ ॥

एतदेव यजुस्त्रैधं विभजते नानुमन्त्रयेतेत्येवं धानञ्जय्य आचार्य्यो मन्यते स त्रिविधविभागप्रकारस्तेनैवाचार्य्येणोक्तः ॥ ८ ॥

---

* भाष्यायवोऽप्येवम ।

स्तुतदेवेन सवित्रा प्रसूता इत्यनुमन्त्रयेत मानसं वाजपेये च बृहत्* ॥ ९ ॥

स्तुतदेवेन सवित्रेत्येतदादिना मन्त्रेण मानसं स्तोत्रमनुमन्त्रयेत दशमेऽहनि वाजपेये च बृहत् तेनैव ॥ ९ ॥

आनन्तर्य्येणेतराणि* ॥ १० ॥

यथोक्तमेवानुमन्त्रयेतानन्तर्य्येण तत् किमिदमारभ्यते आनन्तर्य्येणेतराणीति उच्यते इदं हि मानसमग्निष्टोमसाम्न ऊर्द्धम् आम्नातं यथा षोड़शिसाम्न ऊर्द्धं वाजपेयसाम तत्रायं न्यायः प्राप्तः पूर्वस्य स्तोत्रस्य यदनुमन्त्रणं तेनैवानुमन्त्रणं प्राप्तम् उत्तरस्य वा यत् यत् सूत्रकारेण कल्पितं तद्वाधिकं स्याद्विकल्पो वैतयोर्मानसवाजपेयसाम्नोः एतस्मिन् संशये आचार्य्यो मुक्तसंशयं सूत्रमारभते यदेतदानन्तर्य्यमुक्तं पूर्वेषामेव यथोक्तानां स्तोत्राणां स्यात् ॥ १० ॥

इद्धात् स्तोत्राणि पूर्वेण तद्विवृद्धेः* ॥ ११ ॥

इद्धादित्ययं निपातः असंकल्पितस्तोत्राणि नैमित्तिकान्यापद्येरन् यथा सोमातिरेके तानि तत्पूर्वस्य स्तोत्रस्यानुमन्त्रणं तेनानुमन्त्रयेत किं कारणं तद्विवृद्धेः तस्माद्धि स्तोत्रात् सोमोऽतिरिक्तः ॥ ११ ॥

परेण वा तन्निकामनात्* ॥ १२ ॥

---

* द्राह्यायणेऽप्येवम् ।

परस्य वा यत् स्तोत्रस्यानुमन्त्रणं तेनानुमन्त्रयेत तस्मान्निकामयमानोऽभ्यतिरिच्यत इत्युक्तम् ॥ १२

मानसवद्वातिरिक्तसामान्यात्* ॥ १३ ॥

यथा वा मानसे तथा वानुमन्त्रणं कस्मादतिरिक्तसामान्यात् ॥ १३ ॥

सर्वानुमन्त्रणेन वानुक्तत्वात्* ॥ १४ ॥

यद्वा सर्वेषां स्तोत्राणामनुमन्त्रणं तेन वा स्यात् कस्मादनुक्तत्वात् यस्माद्यत्र नोच्यते तत्र यत् सामान्यं तद्भवति सवितृप्रसूतः स्तुते भूर्भुवःस्वर्बृहस्पतिर्ब्रह्माहं मानुष इत्येतत् ॥ १४ ॥

यद्यत् स्तोत्रं लुप्येत सहैव स्तोमभागेन* ॥ १५ ॥

समुदितानामनुमन्त्रणमुक्तं साम्प्रतं यद् यत् स्तोत्रं लुप्येत तस्य यदनुमन्त्रणं तदपि लुप्येत कोऽस्य विषयः षोडशी वीप्सा किमर्थं यद्यदिति उच्यते षोडशिप्रकरणे पठति अथाग्निष्टोमे गृह्णीयादिति यदाग्निष्टोमे गृह्यते तदा तस्य पूर्वाणि त्रीणि स्तोत्राणि लुप्यन्ते उक्थान्येवमियं वीप्सार्थवती भवति ॥ १५ ॥

स्तुते बहिष्पवमानेन तत्रैव गत्वासीत† ॥ १६ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

इदं सर्वं प्रसङ्गादुक्तं साम्प्रतमनन्तरप्राप्तिः तदुच्यते स्तुते बहिष्पवमानेन स्तोत्रेण तस्मिन्नेव देशे गत्वासीत यत आगतः ॥ १६ ॥

वपायाꣳ हुतायां मार्जयित्वा धिष्ण्यानुपस्थायोक्तꣳ सदस्युपवेशनम्* ॥ १७ ॥

सवनीयपशोर्वपायां] हुतायां मार्जनं कृत्वा धिष्ण्यानुपतिष्ठेरन् ततो धिष्ण्यानुपस्थाय सदः प्रविशेत् तस्मिन्युक्तमुपवेशनं याजमानब्रह्मत्वे चेदुद्गाता कुर्य्यादित्येतस्मिन् प्रकरणे ॥ १७ ॥

इति पञ्चमस्य एकादशी कण्डिका ।

अथ द्वादशी कण्डिका ।

स्तुतशस्त्रयोर्वाचं यच्छेत् † ॥ १ ॥

स्तोत्रे स्तूयमाने शस्त्रे च शस्यमाने वाग्यमनं कुर्य्यात् सर्वत्र ब्रह्मा ॥ १ ॥

अनूच्यमाने च सर्वत्र † ॥ २ ॥

अनुवचने च क्रियमाणे अमुष्मा अनुब्रूहीत्यत आरभ्य वाग्यमनं कुर्य्यात् सर्वत्र अथ सर्वग्रहणं किमर्थमित्युच्यते न केवलं स्तुतशस्त्रयोः अन्यस्मिन्नप्यनूच्यमाने ॥ २ ॥

---

* द्राह्यायणेन सूत्रद्वयमेकसूत्रं कृतम् ।

† द्राह्यायणेऽप्येवम् ।

वषट्कृते विसृजेत* ॥ ३ ॥

कियन्तं कालं वाग्यमनम् उच्यते वषट्कृते विसृजेत ॥ ३ ॥

अवभृथादुदेत्यानुख्याद्यज्ञशेषम्* ॥ ४ ॥

उक्तं ब्रह्मण उद्गात्रेण समानं कर्मेति तत्र अवभृथादूर्द्ध्वं उद्गातुः कर्म नास्ति तत्र ब्रह्मणः कर्मशेष उच्यते अवभृथादुदेत्य अनुख्यात् अनुभवेद् यज्ञशेषं यो यज्ञशेषः तत्र सर्वत्र ब्रह्मत्वं कुर्य्यात् ॥ ४ ॥

अहर्गणेष्वेनꣳ सदातिप्रैषेण प्रशास्ता वाचं यमयनि राजानꣳ रक्षेति चाह तदुभयं कुर्यादावसतीवरीणां परिहरणात्* ॥ ५ ॥

अहर्गणेषु द्विरात्रप्रभृतिषु एनं ब्रह्माणं सदा अहन्यहनि प्रैषेण प्रशास्ता मैत्रावरुणः वाचं यमयति राजानं रक्षेत्येवमाह अतिक्रम्य तार्तीयसवनिकं स्वरम् अतिप्रैषः तद्वाग्यमनञ्च राज्ञश्च रक्षणमुभयं कुर्य्यात् यावद्वसतीवरीपरिहरणं कृतमिति ॥ ५ ॥

तत्सत्रे पर्यायेण कुर्युः† ॥ ६ ॥

तद्वाग्यमनं राज्ञश्च रक्षणं सत्रे सर्वे सत्रिणः क्रमेण पर्य्यायं कुर्य्युः अवसरेण ॥ ६ ॥

अहीने तु ब्रह्मैव† ॥ ७ ॥

---

* द्राह्यायणोऽप्येवम्।

† द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम्।

अहीने ब्रह्मैव कुर्य्यादेतत् कर्म कुतः संशय इति चेत् उच्यते अहीनभूते द्वादशाहे यद्यपि सत्रवत् सर्वं क्रियते तस्मात् सर्वहीने सत्रवदिति तथाप्येतत् कर्म ब्रह्मैव कुर्य्यात् ॥ ७ ॥

वाजपेये पृष्ठस्य स्तोत्रमनुमन्त्र्य सदस्यं ब्रह्मासन उपवेश्य निष्क्रामेत्* ॥ ८ ॥

वाजपेये क्रतौ पृष्ठस्तोत्रानुमन्त्रणं कृत्वा ब्रह्मासने सदस्यमुपवेश्य विसंस्थितसञ्चरेण निष्क्रामेत् ॥ ८ ॥

पूर्वेणाग्नीध्रीयꣳ स्थूणा निखाता स्यात्* ॥ ९ ॥

आग्नीध्रीयस्य पूर्वे प्रदेशे श्वभ्रे स्थूणा निखाता स्यात् ॥ ९ ॥

दक्षिणेन मार्जालीयमन्तर्वेदीति शाण्डिल्यः* ॥ १० ॥

मार्जालीयस्य दक्षिणे प्रदेशे अन्तर्वेदीति श्वभ्रे स्थूणा निखाता स्यादिति एवं शाण्डिल्य आचार्य्यो मन्यते ॥ १० ॥

तस्यामौदुम्बरꣳ सप्तदशारꣳ रथचक्रं प्रतिमुक्तꣳ स्यात्* ॥ ११ ॥

यद्याग्नीध्रीयस्य पूर्वे प्रदेशे यदि मार्जालीयस्य दक्षिणे स्थूणा निखाता स्यात् तस्याम् औदुम्बरं सप्तदशारं रथचक्रं प्रतिमुक्तं स्यात् प्रोतं स्यात् उदुम्बरस्य विकारम् औदुम्बरं सप्तदश अरा अस्मिन्निति सप्तदशारं रथस्य चक्रं रथचक्रम् ॥ ११ ॥

---

* द्राह्यायणेऽप्येवम् ।

तदभावे यत् किञ्च रथचक्रम्* ॥ १२ ॥

एतल्लक्षणस्य चक्रस्याभावे यत् किञ्च रथचक्रं स्यात् ॥ १२ ॥

तस्मिन् बाहू आदध्याद्देवस्याहꣳ सवितुः प्रसवे सत्यसवसो बृहस्पतेर्वाजितो वाजजितो वर्षिष्ठमधिनाकꣳ रुहेयमिति* ॥ १३ ॥

तस्मिन् रथचक्रे बाहू स्थापयेत् देवस्याहं सवितुः प्रसवे इत्येतदादिना यथासूचितेन मन्त्रेण ॥ १३ ॥

रथेष्वाजिन्धावत्स्वाविर्मर्या इति गायेदाकारमुद्गीथादौ लुप्त्वा † ॥ १४ ॥

रथेषु आजिन्धावत्सु जयार्थं वेगेन धावत्सु आविर्मर्या इत्येतत् साम गायेत् उद्गीथादौ य आकारस्तस्य लोपं कृत्वा ॥ १४ ॥

तस्य स्थाने प्रत्याहृत्य द्व्यक्षरमग्मन्निति गतेषु † ॥ १५ ॥

योऽसावुद्गीथादावाकारो लुप्तस्तस्य स्थाने अग्मन्निति एतत् द्व्यक्षरमाहृत्य तस्मात् स्थानादुद्गतेषु रथेषु गायेत् ॥ १५ ॥

यथाधीतमाधावत्स्वागतेषु वा ‡ ॥ १६ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

‡ द्राह्यायणीये एतदारभ्य कण्डिकाशेषपर्य्यन्तानि सूत्राणि न सन्ति ।

पुनरागच्छत्सु आगतेषु वा यथाधीतं गायेत् अविकृतमित्यर्थः ॥ १६ ॥

सर्वत्र वा यथाधीतम् ॥ १७ ॥

सर्वेषु वा गानकालेषु धावितेषु गतेषु आगच्छत्सु आगतेषु वा यथाधीतमेव गायेत् ॥ १७ ॥

परिवर्त्तयन् गायेत् परिवर्त्त्य गायेद्गीत्वा वा परिवर्त्तयेद्गायतोवान्यः परिवर्त्तयेत् ॥ १८ ॥

परिवर्त्तयेत् परिवर्त्तयन् गायेदित्येतदादयो विकल्पा भवन्ति ॥ १८ ॥

उदङ्ङवरोहं मन्येत विष्णोः क्रमोऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसीति ॥ १९ ॥

उदङ् उत्तरतो अवरोहामीत्येवं मन्येत विष्णोः क्रमोऽसीत्येतदादिना मन्त्रेण ॥ १९ ॥

अभि दक्षिणमावृत्य सदः प्रविशेत् ॥ २० ॥

दक्षिणं बाहुमन्वावृत्य सदसि प्रविशेत् ॥ २० ॥

तत्रासीनो हिरण्यं मधु च नाना प्रतिगृह्णीयात् ॥ २१ ॥

तत्रासीनस्तस्मिन् सदस्यासीनः हिरण्यं मधु च नाना प्रतिगृह्णीयात् नाना पृथगित्यर्थः वक्ष्यति हिरण्यस्यार्धं मधुनः पूर्णं ब्रह्मणे दद्यादिति तत् नाना प्रतिगृह्णीयात् ॥ २१ ॥

ऋतपेये च दक्षिणाश्चमसम् ॥ २२ ॥

ऋतपेये च एतस्मिन्नेव काले एतस्मिन्नेव स्थाने सोमचमसो दक्षिणा तं प्रतिगृह्णीयात् उक्तं सोमचमसो दक्षिणा सगोत्राय ब्राह्मणे देया इति ॥ २२ ॥

ब्राह्मणाय मधु दद्यान्निदधीत हिरण्यम् ॥ २३ ॥

अन्यस्मै ब्राह्मणाय मधु दद्यात् निदधीत हिरण्यं स्वयं प्रतिगृह्णीयात् ॥ २३ ॥

त्रिष्टुप्छन्दसा सर्वभक्षश्चमसं भक्षयेत् ॥ २४ ॥

योऽसौ सोमचमसो दक्षिणा ऋतपेये तं त्रिष्टुप्छन्दसा सर्वभक्षं भक्षयेन्निःशेषम् ॥ २४ ॥

तं प्रतिगृह्णीयादिति स्थविरो गौतमः कस्त्वा ददाति सत्वा ददाति कस्मै त्वा ददाति तस्मै त्वा ददाति कस्त्वाकं भक्षयामीति भक्षयेद्वाग्देवो सोमस्य तृप्यत्विति वा तृप्यत्विति वा ॥ २५ ॥

तं सोमचमसं कस्त्वा ददाति इत्येवमादिना मन्त्रेण प्रतिगृह्णीयादित्येवं स्थविरो गौतम आचार्य्यो मन्यते कस्त्वाकं भक्षयामीति च भक्षयेत् वाग्देवी सोमस्य तृप्यत्विति वा न त्रिष्टुप्छन्दसेति ॥२५॥

इति पञ्चमस्य द्वादशी कण्डिका ।

इति पञ्चमः प्रपाठकः समाप्तः ।

षष्ठः प्रपाठकः ।

अथ प्रथमा कण्डिका ।

सन्तनि चोद्यमानमेकैकस्याꣳ सर्वं स्तोमसम्भवात्* ॥१॥

उक्तं ब्रह्मत्वं साम्प्रतं सन्तनिनो विधानमुच्यते कः पुनर्ब्रह्मत्वानन्तरं सन्तनिनोऽवसर इति उच्यते उद्गात्रं प्रकृतं तत्र ब्रह्मत्वं प्रासङ्गिकमुक्तं साम्प्रतमयमाचार्य्यः सामविधानं वक्ष्यति तृचैकर्चऋभिश्च तत्र तस्मिन् सन्तनिनि तृचैकर्चक्रियां प्रति संशयः तत्परीक्षार्थं सन्तनिन एव तावद्विधानमारभते एतत् सन्तन्याम्नाये तृचे गीतं तत्प्रयोगकाले तृच एव मन्यते तदेतच्चिन्त्यते किमेतदाम्नायगानं प्रत्यृचं सर्वं क्रियतां अथ यथाम्नायमेवेति कुतः संशयः उच्यते प्रगीतेषु दर्शितं सन्तनिनस्त्रयः प्रस्तावाः प्रदर्श्यन्ते यद्येकस्यामृचि सर्वं गीयते ततस्तत्प्रस्तावना सम्भवति अथ पुनर्यथाम्नायं ततोऽस्य वाक्यस्यानर्थक्यं भवति त्रयः प्रस्तावसदृशा इति अत आरभ्यते सन्तनि चोद्यमानमेकैकस्यां सर्वं स्तोमसम्भवादिति सन्तनीति साम्नः संज्ञा चोद्यमानं आदिश्यमानम् एकैकस्यामृचि सर्वं कर्त्तव्यं यदेतत् द्विपदोत्तरे तयोरेव एतद्गानमेकैकस्यामृचि सर्वं कर्त्तव्यं किं कारणं स्तोमसम्भवादेव एवं हि कृते स्तोमः सम्भवति पञ्चभक्तियुक्तेन साम्ना स्तोमः संख्यायते उक्तञ्च

---

* आम्नायस्थेमैतेन सूत्रद्वयं कृतम् ।

स्तावोद्गीथप्रतिहारोपद्रवनिधनानि इति तदेता भक्तयः क्रियन्ते
तत: स्तोमः सम्भवति अथ पुनर्न क्रियन्ते तत उत्सृष्टैकदेशं साम कृतं
भवति नचायं न्यायः सामैकदेशैः स्तोमसंख्यानमिति तस्मादेकैकः
स्यामृचि सर्वं कर्त्तव्यं भवति ॥ १

तथा चान्यानि स्वविच्छन्दःसु* ॥ २ ॥

तथा चान्यानि सामानि स्वच्छन्दःसु विच्छन्दःसु च भवन्ति
था तेन प्रकारेणेत्यर्थः वारवन्तीययज्ञायज्ञीयवामदेव्यपञ्चनिधनवा-
मदेव्यवत् यथा वारवन्तीयमेकस्मिन् पादे कृत्स्नं पठितं तथा यज्ञा-
ज्ञीयं जगतीषु गायत्रीषु च तथा वामदेव्यं गायत्रीषु त्रिष्टुप्सु च
ीतं तथा पञ्चनिधनं वामदेव्यम् अतिच्छन्दःसु च गीतं तथा कवतीषु
ीतं रथन्तरम् एवमेतद्गानमुत्तराभ्यां लुप्तभक्तिकं दृष्टम् ॥ २ ॥

सन्तनीति यद्वाहिष्ठीयवत्* ॥ ३ ॥

ननु यद्येतत्प्रत्यृचं सर्वं गीयते ततः सन्तनित्वं नोपपद्यते यदि
त्यपायः क्रियते ततः सन्तनित्वं भवति अन्यथा सन्तनित्वं भ-
वति अत्रोच्यते सन्तनीति यद्वाहिष्ठीयवत् यथा यद्वाहिष्ठीयं
तेऽपि यद्वाहिष्ठशब्दात् यद्वाहिष्ठीयत्वं नैव जहाति एवमेतत्सन्तनि
तेऽपि भक्तिलोपात् सन्तनित्वं न जहाति ॥ ३ ॥

त्रिषु वा तृचेष्वेकर्चवत्तृचे दर्शनात्* ॥ ४ ॥

---

* द्राह्यायणेऽप्येवम् ।

त्रिषु वा तृचेष्वेतत्सन्तनि क्रियताम् एकर्च्चवत्तृचे दर्शनात् यथाम्नाय एकर्च्चे दृष्टानि प्रयोगे तृचे क्रियन्ते एवमिदमपि सन्तनितृचे दृष्टं प्रयोगे त्रिषु तृचेषु क्रियते एवं पर्वणां नायं कार्त्स्न्यं कृतमिति ॥ ४ ॥

साम्ना च स्तोमसंख्यानात्*॥ ५ ॥

कृत्स्नेन च साम्ना स्तोमः संख्यायते नाङ्गहीनेन ॥ ५ ॥

तिसृष्वाचार्याः स्मृतेः† ॥ ६ ॥

तिसृषु खलु आचार्य्या गानं मन्यन्ते प्रयोगे कस्मात् स्मृतेः एवं हि आचार्य्यैः गीतं स्मृतिः ऊहगीतिः स्मृतितस्तुः परं प्रमाणं यद्येवमाचार्य्या मन्यन्ते अथ पूर्वविधानं कस्य उच्यते स्थविरस्य गौतमस्येदं मतं सन्तनिचोद्यमानमेकैकस्यां सर्वमित्येवं स्थविरो गौतमो मन्यत इति एवमेव यज्ञादीनाञ्चोद्यमानग्रहणात् ॥ ६ ॥

यथान्यानि सामानि† ॥ ७ ॥

त्रिषु भवन्ति स्मृतेरेव यथान्यानि सामानीति भूयस्त्वं गृहीत्वा ब्रवीति भूयस्त्वमिति नियामकं विधिर्भवति उभयोरपि लोकवेदयोः भूयस्त्वं प्रमाणीभवति यथा लोके मतद्वैधे तयोर्बहुत्वं ततो गृह्यते तथामशकः भूमास्य बृहद्रथन्तरपृष्ठान्यहानि भवन्ति प्रथमस्य त्र्यह उत्तरश्चतुरहोभूम्नोवशन्नेष्यामइत्येतस्माद्धेतोरिति ॥ ७ ॥

---

* द्राह्यायणेऽप्येवम् ।

† द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम् ।

सन्तानाच्च सन्तनि* ॥ ८ ॥

यदुक्तं सन्तनीति यद्वाहिष्ठीयवदिति तन्न सन्तानादेव सन्तनि यद्युत्तरे स्तोत्रीये लुप्तविभक्तिके क्रियते ततः सन्तनित्वमुपपद्यते ॥८॥

सन्ततं गायतीति चाह* ॥ ९ ॥

एवञ्च ब्राह्मणमाह सन्ततं गायतीति यज्ञस्य सन्तत्या इति ॥९॥

एकर्च्चेषु चोद्धृतं कल्पे* ॥ १० ॥

एकर्च्चेषु क्रियमाणेषु पवमाने मशकेनोद्धृतं यत एकस्यामृचि न सम्भवति यदि ह्यभविष्यत् मशकोऽपि नोद्धरिष्यत् पवमानात् व्यूढेष्वग्निष्टोमेषु पवमानादुद्धृत्य सामकृतम् ॥ १० ॥

प्रमाणार्थन्तृचे दर्शनꣳ स्तोत्रीयायाꣳसामसमाप्तिः† ॥११॥

अथ यदुक्तं त्रिषु वा तृचेष्वेकर्च्चवत्तृचे दर्शनादिति तदत्र ब्रूमः प्रमाणार्थन्तृचे दर्शनम् एवं कुर्य्यात् तृचेषु गानं स्यादिति स्तोत्रीयायामेव सन्तनि समाप्तम् ॥ ११ ॥

तासु सर्वासु प्रस्तावाः स्युर्न्यायप्रगाथधर्माभ्याम्* ॥ १२ ॥

यदेतदुक्तं तिसृष्वाचार्य्याः स्तुतेरिति एतस्मिन् कल्पे तासु सर्वासु स्तोत्रीयासु प्रस्तावाः स्युः ये उत्तरे स्तोत्रीये लुप्तप्रस्तावे आम्नायेते तयोरपि प्रस्तावः कर्त्तव्यः कस्मात् न्यायात् एष स्तोत्रीयाणां

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

धर्मः पञ्चभक्तित्वं यानि च प्रगाथेषु गीतानि तेषामेषधर्म उत्तमपादाभ्यासेन क्रिया ॥ १२ ॥

नोत्तरयोराचार्य्याः स्मृतेः* ॥ १३ ॥

उत्तरयोः स्तोत्रीययोराचार्य्याः प्रस्तावं नेच्छन्ति कस्मात् स्मृतेः एवं हि स्मर्य्यते सन्तान्यृग्गीतौ ॥ १३ ॥

सन्ततं गायतीति च भक्तिलोपदर्शनात्* ॥ १४ ॥

किञ्च सन्ततं गायतीति च यदेतद्ब्राह्मणं एतद्भक्तिलोपमेवं दृष्टवत् ॥ १४ ॥

तस्य स्तोत्रादावावर्त्तिषु प्रस्तावः पर्य्यायादिषु वा* ॥ १५ ॥

तस्य सन्ततिनः आवर्त्तिगतस्य विधानमुच्यते स्तोत्रस्यादौ प्रस्तावः स्यात् इतराः सर्वा लुप्तप्रस्तावाः एवं सन्ततित्वं सुतरामुपपद्यते अथवा पर्य्यायस्य पर्य्यायस्यादौ प्रस्तावः स्यात् ॥ १५ ॥

सर्वत्र प्रथमायामिति धानञ्जप्यः* ॥ १६ ॥

यावत्कालः प्रथमा प्रयुज्यते तावत्कालः प्रस्तावः स्यादिति एवं धानञ्जप्य आचार्य्यो मन्यते ॥ १६ ॥

निधनभूताः प्रतिहारवत्योऽप्रस्ताव्याः* ॥ १७ ॥

उक्तं स्तोत्रादावावर्त्तिषु प्रस्ताव्याः प्रस्तावः पर्य्यायादिषु चेति

---

* द्राह्यायणोऽप्येवम् ।

तद्यासां प्रस्तावो नास्ति तासां कः प्रयोगधर्म इति उच्यते निधनभूताः स्युः उत्तरा निधनतुल्या इत्यर्थः यथा पितृभूतो मातृभूत इति अथ किं निधनमिव बहुवचनं सर्वासामेव निधनभूता इत्युक्ते प्रतिहारस्याप्राप्तिः अत आह प्रतिहारवत्य इति प्रतिहारं प्रतिहर्त्ता ब्रूयात् अप्रस्ताव्यानामेष धर्मः ॥ १७ ॥

धानञ्जप्येन प्रथमायाꣳशाण्डिल्य उत्तरे तु स्तोत्रीये विष्टावमुखेष्वेवाप्रस्ताव्ये विष्टावेषु चैकिषु त्रिवृत्स्तोमे च परिवर्त्तिनो विधानम्* ॥ १८ ॥

धानञ्जप्येन मतेन प्रथमायां सर्वत्र प्रस्तावो भवति इत्येतस्मिन्नेवं शाण्डिल्य आह एवमस्तु सर्वत्र प्रथमायां प्रस्तावोऽस्तु उत्तरयोः स्तोत्रीययोर्विष्टावमुखेष्वेव प्रस्तावो माभूत् अन्यत्र भवत्विति विष्टावेषु च एकिषु अप्रस्ताव्ये स्यातां त्रिवृत्स्तोमे तु यत् परिवर्त्तिन्याविधानं तत् स्यात् ॥ १८ ॥

उत्तरयोः स्तोत्रीययोश्छन्दस्तो विप्रतिपत्तिः† ॥ १९ ॥

उत्तरयोः स्तोत्रीययोः सन्तनिनः छन्दसि विप्रतिपत्तिः ऊहगीतौ अनेकधा प्रतिपत्तिः विप्रतिपत्तिः बृहत्याकारेणापि गीतं ककुबुत्तराकारेणापि गीतम् द्विपदोत्तराकारेणापि गीतम् अथात्र संशयः किं विकल्पेन क्रियताम् अथ विनिवेशेनेति उच्यते ॥ १९ ॥

---

* शाट्यायनमतेन सूत्रद्वयं कृतम् ।

† शाट्यायनीये विशेषोऽस्ति ।

द्विपदे स्यातामप्रस्ताव्ये ककुभौ प्रस्ताव्ये* ॥ २० ॥

यत्रोत्तरयोः प्रस्तावो लुप्यते तस्मिन् द्विपदे स्यातामुत्तरे स्तोत्रीये नोत्तरयोराचार्य्याः स्मृतेरित्येतस्मिन् प्रस्ताव्ये कल्पे ककुभावुत्तरे स्तोत्रीये स्यातां तासु सर्वासु प्रस्तावाः स्युरित्येतस्मिन् कल्पे ॥ २० ॥

बृहत्यौ शाण्डिल्यः ककुभावप्रस्ताव्ये † ॥ २१ ॥

बृहत्यौ शाण्डिल्य उत्तरे स्तोत्रीये मन्यतेऽप्रस्ताव्ये कल्पे ककुभावुत्तरे स्तोत्रीये मन्यते ॥ २१ ॥

तथा सत्युभे ककुभौ स्थविरो गौतमः † ॥ २२ ॥

तथा सति शाण्डिल्यकल्पे क्रियमाणे बृहत्यौ शाण्डिल्यः ककुभावप्रस्ताव्ये इत्येतस्मिन् ये च प्रस्तावयितव्ये स्तोत्रीये ये च न प्रस्तावयितव्ये उभौ ककुभौ स्यातामित्येवं स्थविरो गौतम आचार्य्यो मन्यते ॥ २२ ॥

बृहत्यौ धानञ्जय्यः* ॥ २३ ॥

उत्तरे स्तोत्रीये बृहत्यौ धानञ्जय्य आचार्य्यो मन्यते शाण्डिल्यकल्पे ॥ २३ ॥

---

* द्राह्यायणोऽप्येवम्।

† द्राह्यायणीयेऽप्येवं किन्तु छेदविषये विशेषोऽस्ति।

इति षष्ठस्य प्रथमा कण्डिका।

अथ द्वितीया कण्डिका ।

प्रथमाभिर्विष्टुतिभिः स्तोमविधानमनादेशे* ॥ १ ॥

इह त्रिवृदादिषु स्तोमेषु एकैकस्मिन् बह्व्यो विष्टुतयः पठिताः तत्प्रयोगे तासां विष्टुतीनां विकल्पो भवतु अथ नियम इति एतस्मिन् संशये आचार्य्यः सूत्रमारभते प्रथमाभिर्विष्टुतिभिः स्तोमविधानमनादेश इति प्रथमाभिः आद्याभिर्विष्टुतिभिः विष्टुतय उक्ता ब्राह्मणेन उद्यती त्रिवृतोर्विष्टुतिः इत्यत आरभ्य स्तोमविधानं स्तोमानां क्लृप्तिः प्रयोग इत्यर्थः अनादेशे आदेशादन्यत्र आदेशः यथा उद्यत्यो विष्टुतयः अभिचरणीया विष्टुतयः निर्मथ्या सप्तदशस्य विष्टुतिरूर्ध्वं होतुः पृष्ठात् ॥ १ ॥

ताः पथ्याः सर्वाभिप्रायाश्च † ॥ २ ॥

यास्ताः प्रथमा विष्टुतयः ताः पथ्या इति संज्ञा वक्ष्यति पथ्याभिर्होतृषामाणि विदध्यादपथ्याभिरितराणीति सर्वाभिप्रायाश्च ताः सर्वाभिप्रायसम्पादिका इत्येतदुक्तं भवति ॥ २ ॥

यथाशिषं वा विदध्यात्* ॥ ३ ॥

अथवा यथाशिषं यत्कामः क्रतुः स्यात् तज्जातीयां विष्टुतिं प्रयुञ्जीत ॥ ३ ॥

---

* लाट्यायनेऽप्येवम् ।

† लाट्यायनेनैतेन सूत्रद्वयं कृतम् ।

द्वितीयां त्रिवृतः पथ्यामेकेऽविष्टावा ह्याद्याः* ॥ ४ ॥

एके आचार्य्याः त्रिवृत्स्तोमस्य द्वितीयां विष्टुतिं पथ्यां मन्यन्ते हिशब्दः कारणोपदेशार्थः यस्मादविष्टावा आद्या तृचभागावापस्थानं परिचरा तृचभागावापस्थानं आवापस्थानं परिचरात्तृचभागेत्येते विष्टावा अस्यां न विद्यन्ते ॥ ४ ॥

सꣳहारशिरःसन्धिसन्तनिषु चानुपपन्ना † ॥ ५ ॥

किञ्चान्यत् संहारादिषु अनुपपन्ना सा यदा स्तोमकृतौ पर्य्यायाः संह्रियन्ते तदासौ नोपपद्यतेऽविष्टावत्वात् तथा शिरसि नोपपद्यते सहिङ्कृतेन शिरसा पराचा स्तुवत इति नहि तस्याः पराक्त्वमस्ति तथा सन्धौ नोपपद्यते पराचा हि सन्धौ स्तोमः क्रियते एतस्यान्तु क्रियमाणायां अयथास्थानं स्तोमानां प्रयोगः स्यात् तथा सन्तनिन्येवमेवानुपपन्ना उक्तञ्च त्रिवृत्स्तोमेच परिवर्त्तिनी विधानमिति ॥ ५ ॥

अवर्षुकस्त्विति चास्याम् † ॥ ६ ॥

तथा अपवादोऽपि श्रूयते अवर्षुकस्तु पर्ज्जन्यो भवतीति ॥ ६ ॥

इषोर्व्यत्यासमिषुभ्याम् † ॥ ७ ॥

इषुसंज्ञे द्वे विष्टुत्यौ पठिते ताभ्यां व्यत्यासेन इषौ यज्ञे प्रयोगः कर्त्तव्यः ॥ ७ ॥

---

* द्राह्यायणेनैतेन सूत्रद्वयं कृतम् ।

† द्राह्यायणोऽप्येवम् ।

तयोः पूर्वा श्येनस्याग्निष्टोमसाम्नि* ॥ ८ ॥

तयोर्विष्टुत्योर्या पूर्वा विष्टुतिः सा श्येनस्याग्निष्टोमसाम्नि कर्त्तव्यः ॥ ८ ॥

सत्त्रेषु दशरात्रे सर्वाः प्रयुञ्जीत † ॥ ९ ॥

इह दशरात्रे त्रिवृदादयः स्तोमाश्चतुर्विंशान्ताः सर्वे पठिताः अनेनोक्तं प्रथमाभिर्विष्टुतिभिः स्तोमविधानमनादेश इति सोऽयमाचार्य्यो दशरात्रे सर्वासां प्रयोगमादिशति सत्त्रेषु दशरात्रे सर्वाः प्रयुञ्जीतेति तत्रायं संशयः किं सत्त्रे दशरात्रे सर्वाः प्रयुञ्जीत अथ सत्त्रेषु दशरात्रेषु सर्वेषु सर्वाः प्रयुञ्जीतेति यदि तावत्सत्त्रे दशरात्रे सर्वाः प्रयुञ्जीत इतरेष्वहःसु न प्रयुञ्जीतेत्ययमभिप्रायः तेन दशरात्रप्रयोजकसर्वप्रयोगस्य न सत्त्रत्वम् अथ पुनः सत्त्रेषु यो दशरात्रस्तस्मिन् सर्वाः प्रयुञ्जीतेत्ययमभिप्रायः तत आहीनिके दशरात्रे प्राप्नोति सर्वप्रयोगः अत्रोच्यते उभयत्र सर्वप्रयोगः सत्त्रे चाहीनिके च इह हि सर्वाप्तिः प्रयोजिका सर्वप्रयोगस्य सा च सर्वाप्तिरुभयत्र दृश्यते सत्त्रे चाहीनिके च उभयत्र सर्वे स्तोमाः सर्वाणि पृष्ठानि सर्वाणि छन्दांसि प्रयुञ्जीतेति तस्माद्विष्टुतीनामपि प्रयोग उभयोरिष्यते ननु तत्रोच्यते यद्येवं सत्त्रग्रहणं न कर्त्तव्यं सत्त्रेषु दशरात्र इति उच्यते, यद्ययं सत्त्रग्रहणं न कुर्य्यात् त्रिककुब्दशरात्रादिष्वहीनिकेषु दशरात्रेषु सर्वः

---

* द्राह्यायणेऽप्येवम्।

† द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम्।

प्रयोगः स्यात् सोऽयमाचार्य्यः सत्रग्रहणं करोति यत्रैव हेतुसमत्वं तत्रैव सर्वत्रप्रयोगः इतरेषु नेति किं तद्धेतुसमत्वं सर्वाप्तिः सा च सर्वाप्तिस्तुल्या सत्रे चाहीने च तस्माद्द्वादशाहादिके दशरात्रे सर्वे चाहीनिके च विष्टुतीनां सर्वप्रयोगः स्यात् ॥ ९ ॥

अभिचरणीया उद्धृत्येति शाण्डिल्यः* ॥ १० ॥

शाण्डिल्य आह अस्तु सर्वत्रप्रयोगः किन्तु आभिचरणीया उद्धृत्य प्रयुञ्जीतेति ॥ १० ॥

शाण्डिल्यायनः कुलायिनीम् † ॥ ११ ॥

शाण्डिल्यायन एतस्मिन्नेव प्रयोगे कुलायिन्या अप्युद्धारं मन्यते ॥ ११ ॥

भस्त्राञ्चौ † ॥ १२ ॥

भस्त्राञ्च विष्टुतीम् उद्धरेदित्येवमुभावाचार्य्यौ मन्येते शाण्डिल्यः शाण्डिल्यायनश्च ॥ १२ ॥

धानञ्जप्यस्तामेव † ॥ ३१ ॥

धानञ्जप्य आचार्य्यस्तामेव उद्धरेदिति स्पष्टार्थः ‡ ॥ १३ ॥

---

* द्राह्यायणेन सूत्रद्वयेनैकसूत्रं कृतम्।

† द्राह्यायणोऽप्येवम्।

‡ धानञ्जप्यस्तु पुनर्भस्त्राया एव केवलाया उद्धारं मन्यते। इति पाठान्तरं पुस्तकान्तरे।

पथ्याभिर्होतृषामाणि विदध्यादपथ्याभिरितराणि* ॥१४॥

एवं सति सर्वप्रयोगे विष्टुतीनां स्तोत्रविन्यासः क्रियते सर्वस्मिन् दशरात्रे सर्वेषां स्तोमानां याः पथ्या विष्टुतयस्ताभिर्होतृषामाणि विदध्यात् अपथ्याभिरितराणि सर्वाणि स्तोत्राणि कुर्य्यात् होतृषामभ्यो यान्यन्यानि ॥ १४ ॥

समाप्तासु ता एवादितः पुनः प्रयुञ्जीत* ॥ १५ ॥

समाप्तासु सर्वासु विष्टुतिषु प्रत्यहन्ता एवादित आरभ्य पुनः प्रयुञ्जीत । १५ ॥

तथा कुर्वन् प्रागाथिकानि परिवर्त्तिन्या प्रथमस्येति शाण्डिल्यः* ॥ १६ ॥

तथा तेन प्रकारेण कुर्वन् यानि प्रागाथिकानि सामानि प्रथमेऽहनि भवन्ति रथन्तरनौधसकालेययज्ञायज्ञीयानि तानि परिवर्त्तिन्या विष्टुत्या कुर्य्यात् इतराण्यन्याभिः ॥ १६ ॥

सकृत् सर्वाः समाप्य पथ्ययैव तत ऊर्द्ध्वमिति धानञ्जय्यः* ॥ १७ ॥

सकृत्सर्वाः कृत्वा यान्यन्यानि स्तोत्राणि शिष्टानि तानि पथ्ययैव विष्टुत्या कुर्य्यात् इत्येवं धानञ्जय्य आचार्य्यो मन्यते किन्तु ॥ १७॥

---

* लाट्यायनेऽप्येवम्।

असमाप्तासु त्वपि होतॄणाम पर्य्ययैव तथा कुर्य्यात्* ॥१८॥

यद्येतेन प्रकारेण कुर्य्यात् ततो यद्यसमाप्तासु सर्वासु होतॄणामागच्छेत् पर्य्ययैव कुर्य्यात् ततः शेषाः समापयेत् ॥ १८ ॥

कुलायिनों चेत् प्रयुञ्जीत प्रथमस्याह्नो द्वितीयं पृष्ठन्तया विदध्यात्* ॥ १९ ॥

यदि कुलायिनों प्रयुञ्जीत ततस्तया द्वितीयं पृष्ठं विदध्यात् प्रथमग्रहणं नियमार्थं द्वितीयमेव पृष्ठं विदध्यात् क्रमागतां न कुर्य्यात् ॥ १९ ॥

षष्ठस्याह्नउत्तममुक्थमुत्तमया त्रयस्त्रिंशस्य विष्टुत्या विदध्यात् † ॥ २० ॥

षष्ठस्याह्न उत्तममेवोक्थम् उत्तमया त्रयस्त्रिंशस्य विष्टुत्या विदध्यात् अत्रापि षष्ठग्रहणं नियमार्थम् ॥ २० ॥

उक्तः प्रयोगो ब्राह्मणेन चतुश्चत्वारिंशे † ॥ २१ ॥

चतुश्चत्वारिंशे स्तोमे ब्राह्मणेन प्रयोग उक्तः द्विप्रकारः आज्यानां प्रथमा पृष्ठानां द्वितीयोक्थानां तृतीयेति पूर्वः आज्यानां सा होतुरित्यत आरभ्योत्तरः ॥ २१ ॥

---

* द्राह्यायणेन सूत्रद्वयमेकसूत्रं कृतम् तथा छेदविषये विशेषश्च कृत

† द्राह्यायणोऽप्येवम् ।

सवनसमीषन्तो पूर्वः प्रयोगः स्तोत्रसमीषन्त्युत्तरः* ॥२२॥

यः पूर्वः प्रयोगः स सवनसमीषन्तो प्रयोग उच्यते एकैकः सन् सवनमुपगच्छति इषतिर्गत्यर्थः उत्तरः प्रयोगः स्तोत्रसमीषन्तो प्रयोगः ॥ २२ ॥

तथा कुर्य्यादहर्भाजि* ॥ २३ ॥

अन्यत्रापि यद्यहर्भजेत चतुश्चत्वारिंशः अनेन प्रकारेणास्य विधानं कुर्य्यात् सवनसमीषन्तो प्रयोगं पथ्यया कुर्य्यात् स्तोत्रसमीषन्तो प्रयोगं वा ॥ २२ ॥

पथ्यामन्यत्र* ॥ २४ ॥

अन्यत्र अनहर्भाजि पथ्यामेव कुर्य्यात् ॥ २४ ॥

अष्टाचत्वारिंशस्योत्तरया मैत्रावरुणस्यैवाज्यं विदध्यात्* ॥ २५ ॥

अष्टाचत्वारिंशस्योत्तरया त्रिष्टुभा मैत्रावरुणस्यैवाज्यं कुर्य्यात् एवशब्दोऽवधारणार्थः अन्यानि सर्वाणि स्तोत्राणि पूर्वयैव ॥ २५ ॥

सर्व्वत्र वा छोटकसामानि* ॥ २६ ॥

सर्वस्मिन्नाहनि छोटकसामानि अष्टाचत्वारिंशस्योत्तरया त्रिष्टुभा विदध्यात् ॥ २६ ॥

---

* लाट्यायनोऽप्येवम् ।

मध्यमे मध्यमे वा सवनेषु* ॥ २७ ॥

मध्यमे मध्यमे स्तोत्रे उत्तरया विष्टुत्या कुर्य्यात् अथ सवनग्रहणं किमर्थमिति चेत् उच्यते वक्ष्यति द्वितीयचतुर्थे वोत्तरे वेति सवनेष्विति वर्त्तते ॥ २७ ॥

द्वितीयचतुर्थे वा* ॥ २८ ॥

द्वितीयचतुर्थे वा स्तोत्रे उत्तरया विष्टुत्या कर्त्तव्ये ॥ २८ ॥

उत्तरे वा* ॥ २९ ॥

उत्तरे वा स्तोत्रे उत्तरया विष्टुत्या कर्त्तव्ये सवनेष्विति वर्त्तते एव ॥ २९ ॥

अदभ्ररात्रेषु सत्रेषु पथ्या एवेति गौतमः* ॥ ३० ॥

अदभ्ररात्राणि यानि सत्राणि तेषु पथ्या एव विष्टुतयः स्युः इत्येवं गौतम आचार्य्यो मन्यते ॥ ३० ॥

सर्वा इति धानञ्जय्यः* ॥ ३१ ॥

अदभ्ररात्रेष्वपि सत्रेषु ये स्तोमाः तेषु सर्वा विष्टुतयः स्युरित्येवं धानञ्जय्य आचार्य्यो मन्यते ॥ ३१ ॥

---

* द्राह्यायणेऽप्येवम् ।

इति षष्ठस्य द्वितीया कण्डिका ।

अथ तृतीया कण्डिका ।

तृचसूक्तानामादिग्रहणेन विधिरनादेशे* ॥ १ ॥

इह मन्त्रकृत्तृचसूक्तानां ग्रहणं करिष्यति स्तोत्रविधौ तेषां प्रयोगं प्रति संशयः कथं प्रयोक्तव्यानीति सोऽयमाचार्य्यस्तेषां प्रयोगविधिं विवक्षुः शास्त्रमारभते तृचसूक्तानामादिग्रहणेन विधिरनादेशे इति तृचाश्च सूक्तानि च तिस्र ऋचः तृच इत्युपचर्य्यते सूक्तानि चतुर्ऋचप्रभृतीनि तेषामादिग्रहणे क्रियमाणे समस्तस्य तृचस्य सूक्तस्य वा प्रयोगः स्यात् अनादेशे यत्र त्वादेशः तत्र यथादेशं यथा अभ्रवेगुस्तव इति षडृचस्य तृचं पवस्व देववीरतीति दशर्चस्य तृचमुद्धरन्नुत्तमम् उपास्मै गायतानर इत्येकया वहिष्पवमानमिति ॥१॥

तृचोत्तमायां प्रतिलोमः* ॥ २ ॥

तृचोत्तमायामादिश्यमानायां प्रतिलोमस्तृचः प्रत्येतव्यः यथा प्रदेवोदासो अग्निरिति यज्ञायज्ञीयमग्निष्टोमसामेति ॥ २ ॥

मध्यमायाꣳ सैव* ॥ ३ ॥

तृचस्य मध्यमायामादिश्यमानायां सैव केवला प्रत्येतव्या यथास्म इन्द्राय यज्यव इति गायत्रञ्च श्रुतकवैष्टम्भकञ्च द्रप्सा इन्द्राय वायव इति गायत्रञ्च मार्गीयवञ्चेति ॥ ३ ॥

रेतस्यैकत्रिकस्य वहिष्पवमानम्* ॥ ४ ॥

---

* शाट्यायनोऽप्येवम् ।

एकत्रिकेः पठति उपास्मै गायतानर इत्येकया बहिष्पवमानमिति तत्रायं संशयः किं रेतस्या धर्म्मेण क्रियताम् अथ रथन्तरवर्णा धर्म्मेण उत आविकृतामेव क्रियतामिति एतस्मिन् संशय आह रेतस्यैकत्रिकस्य बहिष्पवमानमिति ॥ ४ ॥

उद्भिद्यनुरूपमेकर्चꣳ शाण्डिल्यः* ॥ ५ ॥

उद्भिदि सप्तिनि स्तोमे बहिष्पवमाने एवं पठति उपोषु जातमप्तुरमित्यनुरूप इति परिभाषा भवति तृचसूक्तानामादिग्रहणेन विधिरनादेश इति सोऽयं आचार्य्य आरभते उद्भिद्यनुरूपमेकर्चं शाण्डिल्य इति ॥ ५ ॥

स्तोत्रीयं गौतमधानञ्जप्यौ* ॥ ६ ॥

गौतमधानञ्जप्यावाचार्य्यौ स्तोत्रीयमेकर्चमिच्छतः ॥ ६ ॥

उत्तमौ तृचौ बहिष्पवमाने चातुर्मास्येषु † ॥ ७ ॥

चातुर्मास्येषु सर्व्वेष्वहःसु त्रिवृद्बहिष्पवमानानि भवन्ति तेषु च पञ्च प्रतीकान्यादिश्यन्ते प्रत्यहं तत्र कथं प्रयोग इति उच्यते, उत्तमावुत्तमौ तृचौ बहिष्पवमाने चातुर्मास्येषु अन्य एकर्चाः ॥ ७ ॥

तथा साहस्तोत्तमे † ॥ ८ ॥

---

* द्राह्यायणोऽप्येवम् ।

† द्राह्यायणेन सूत्रद्वयमेकसूत्रं कृतम् ।

यथा चातुर्मास्येषु तथा साद्यस्कोत्तमे उत्तमे उत्तमौ तृचौ अन्य एकर्चाः सर्व्वे ॥ ८ ॥

सर्वस्वारे च तृचाः* ॥ ९ ॥

सर्वस्वारे बहिष्पवमाने एकः सप्तर्चौ द्वौ न वर्चः पठति मशकः तेषामाद्यास्तृचाः स्युः स्तोमवशेन ॥ ९ ॥

वामदेव्ययज्ञायज्ञीयारण्येगेयपृष्ठपूर्वाणां तृचकरणमुत्तरयोः पवमानयोः † ॥ १० ॥

वामदेव्यादीनामुत्तरयोः पवमानयोर्विधीयमानानां माध्यन्दिनार्भवयोः तृचेषु क्रिया स्यात् ॥ १० ॥

अन्येषाञ्चाविप्रतिषेधः † ॥ ११ ॥

अन्येषाञ्च साम्नां माध्यन्दिनार्भवयोरादिश्यमानानां तृचे क्रिया स्यात् विप्रतिषेधोनास्ति अविप्रतिषेधोऽविरोधः ॥ ११ ॥

एकमेकर्चं कुर्वन् प्रथमायामादितः कुर्य्यात् ‡ ॥ १२ ॥

यद्येक एकर्चः कर्त्तव्यो भवति तं प्रथमायामादितः कुर्य्यात् यदि गायत्रं यदि बार्हतं यथा छन्दोमदशाहे द्वितीयेऽहन्यष्टाविंशे ॥ १२ ॥

द्वौ तस्यामेव ‡ ॥ १३ ॥

---

* शाट्यायनीये विशेषोऽस्ति ।

† शाट्यायनेन सूत्रद्वयमेकसूत्रं कृतम् ।

‡ शाट्यायनेऽप्येवम् ।

यदि द्वावेकर्चौ कर्त्तव्यौ स्यातां तस्यामेव प्रथमायां कुर्य्यात् यथा छन्दोमदशाहे एवं द्वितीयेऽहनि चतुश्चत्वारिंशे ॥ १३ ॥

त्रीनेकतृचे नाना स्तोत्रीयासु* ॥ १४ ॥

त्रीनेकर्चान् कुर्वन्नेकस्मिन् तृचे कुर्य्यात् नाना स्तोत्रीयासु नाना पृथगित्यर्थः यथा व्यूढेष्वग्निष्टोमेषु ॥ १४ ॥

चतुर्णां प्रथमायां द्वावितरौ नानोत्तरयोः* ॥ १५ ॥

यदि चतुर्णामेकर्चानां क्रिया स्यात् तदा प्रथमायां स्तोत्रीयायां द्वावेकर्चौ कुर्य्यात् इतरौ द्वावेकर्चौ पृथगुत्तरयोः स्तोत्रीययोः कुर्य्यात् ॥ १५ ॥

माध्यन्दिने चेदेको द्वौ वा बृहत्यामेव* ॥ १६ ॥

यदि माध्यन्दिने एक एकर्चः कर्त्तव्यो भवति द्वौ वा बृहत्यामेव कुर्य्यात् उदाहरणमत्रोक्तम् ॥ १६ ॥

त्रीन्यतरस्याꣳ सम्भवेयुः* ॥ १७ ॥

त्रीनेकर्चान् कुर्वन् यतरस्यां सम्भवः स्यात् गायत्र्यां बृहत्यां वा तस्यां कुर्य्युः ॥ १७ ॥

अनभ्यासा चेत् द्वयोरन्यतरं गायत्र्यां धानञ्जय्यः* ॥१८॥

यदि अनभ्यासा बृहती स्यात् ततो द्वयोरेकर्चयोरेकं गायत्र्यां कुर्य्यात् एकं बृहत्याम् एवं धानञ्जय्य आचार्य्यो मन्यते ॥ १८ ॥

---

* द्राह्यायणोऽप्येवम् ।

उभौ बृहत्याꣳ शाण्डिल्यः* ॥ १९ ॥

शाण्डिल्य आचार्य्य उभावेकर्चौ बृहत्यां कर्त्तव्यौ मन्यते ॥१९॥

साध्यासायाञ्चेदेकोऽध्यास्यायामेवान्ततः* ॥ २० ॥

यदि साध्यासायां बृहत्त्यां एक एकर्चः कर्त्तव्यो भवति अध्यास्यायामेव कुर्य्यात् सर्वेषां बार्हतानामन्ते यथा महाव्रते ॥ २० ॥

द्वौ तस्यां चादितश्च सा शशकर्णक्लृप्ता † ॥ २१ ॥

द्वावेकर्चौ कुर्वन् साध्यासायाञ्च कुर्य्यादध्यासायां आदौ च बृहत्यां सा शशकर्णक्लृप्ता तस्या इयं संज्ञा शशकर्णक्लृप्तेति उक्तं मशकेन तस्य शशकर्णक्लृप्ता बृहतीति ॥ २१ ॥

त्रिष्वध्यास्या लुप्यत* ॥ २२ ॥

त्रिष्वेकर्चेषु क्रियमाणेषु अध्यास्यायालोपः कर्त्तव्यः ॥ २२ ॥

चतुरो नाना स्तोत्रीयासु* ॥ २३ ॥

यदि चत्वार एकर्चाः कर्त्तव्याः स्युः ततो नाना स्तोत्रीयासु कुर्य्यात् त्रीन् पृथक् स्तोत्रीयासु चतुर्थमध्यास्यायाम् ॥ २३ ॥

द्वादशे बृहत्याꣳ सामतृचः* ॥ २४ ॥

द्वादशे स्तोमे बृहत्यां सामतृचः स्यात् यथा पुनस्तोमे ॥ २४ ॥

---

* आम्नाययोरप्येवम्।

† आम्नायद्वयेनैतेन सूत्रद्वयं कृतम्।

आर्भवे चेदेकोऽनुष्टुभि* ॥ २५ ॥

माध्यन्दिने विधिरुक्तः साम्प्रतमार्भव उच्यते यदि आर्भवे एक एकर्चः कर्त्तव्यो भवति तमनुष्टुभि कुर्य्यात् उक्तमेकर्चं कुर्वन् प्रथमायामादितः कुर्य्यादिति उक्तमुदाहरणम् ॥ २५ ॥

द्विप्रभृतीन् ककुप्प्रभृत्यानन्तर्य्येण* ॥ २६ ॥

द्विप्रभृतीनेकर्चानार्भवे कुर्वन् ककुभमारभ्य कुर्य्यादानन्तर्य्येण यथेन्द्रस्तोमे ॥ २६ ॥

उष्णिक्ककुभोस्तृचैकर्चत्वमव्याघातेन* ॥ २७ ॥

उष्णिक्ककुभोस्तृचैकर्चक्रिया अव्याघातेन स्यात् यदि ककुभमेकर्चां कुर्य्यात् उष्णिहमप्येकर्चं कुर्य्यात् यदि ककुभं तृचस्थां कुर्य्यात् उष्णिहमपि तृचस्थमेव कुर्य्यात् ननु किमिदमारभ्यते उक्तं द्विप्रभृतीन् ककुप्प्रभृत्यानन्तर्य्येणेति उच्यते ज्योतिष्टोमप्रकरणे ब्राह्मणमाह तासु संस्थितं तासु सफमिति तृचस्थतामाह सोऽयमाचार्य्यो नियमार्थमारभते कथम् उष्णिक्ककुभौ ज्योतिष्टोमे एकर्चौ स्यातामिति तथाकृत्वा मशकोऽपि एकर्चे उष्णिक्ककुभौ स्यातामिति ज्योतिष्टोमेऽभिप्रेत्य सम्पदं शास्ति ॥ २७ ॥

इति षष्ठस्य तृतीया कण्डिका ।

---

* द्राह्यायणोऽप्येवम् ।